SHRUTI-BODH

[Translation of the Vedas]

OR

Revelation Revealed

Royal 8 vo. 64 pp, Vedic Text & English Translation.

(English Edition)

PUBLISHED CONCURRENTLY IN 4 LANGUAGES,
English, Marathi, Hindi and Gujarati, every month.

Edited by

R. V. PATVARDHAN, B. A. LL. B.
A. B. KOLHATKAR, B. A. LL.
D. A. TULZAPURKAR, B. A. LL. B.

Vol. 2, No. 19
January 1914.

Yearly Rs. 4
Post free.

—:o:—

Single Copy, 8 Annas.

Shrutibodh Office,
47, Kalbadevi, Bombay.

॥ अथ तृतीयाष्टके तृतीयोऽध्यायः ॥ ३ ॥

॥ ४० ॥ ऋषिः—विश्वामित्रः । देवता—इन्द्रः । छन्दः—गायत्री ॥

॥ ४० ॥ इन्द्रं त्वा वृषभं वयं सुते सोमे हवामहे ।
स पाहि मध्वो अन्धसः ॥ १ ॥
इन्द्र क्रतुविदं सुतं सोमं हर्य पुरुष्टुत ।
पिबा वृषस्व तातृपिम् ॥ २ ॥
इन्द्र प्र णो धितावानं यज्ञं विश्वेभिर्देवेभिः ।
तिरः स्तवान विश्पते ॥ ३ ॥
इन्द्र सोमाः सुता इमे तव प्र यन्ति सत्पते ।
क्षयं चन्द्रास इन्दवः ॥ ४ ॥
दधिष्वा जठरे सुतं सोममिन्द्र वरेण्यम् ।
तव द्युक्षास इन्दवः ॥ ५ ॥ १ ॥

इंद्रं । त्वा । वृषभं । वयं । सुते । सोमे । हवामहे । सः । पाहि । मध्वः । अंधसः ॥ १ ॥ इंद्रं । क्रतुऽविदं । सुतं । सोमं । हर्य । पुरुऽस्तुत । पिब । आ । वृषस्व । ततृपिं ॥ २ ॥ इंद्रं । प्र । नः । धितऽवानं । यज्ञं । विश्वेभिः । देवेभिः । तिरः । स्तवान । विश्पते ॥ ३ ॥ इंद्रं । सोमाः । सुताः । इमे । तव । प्र । यंति । सत्ऽपते । क्षयं । चंद्रासः । इंदवः ॥ ४ ॥ दधिष्व । जठरे । सुतं । सोमं । इंद्र । वरेण्यं । तव । द्युक्षासः । इंदवः ॥ ५ ॥ १ ॥

गिर्वणः पाहि नः सुतं मधोर्धाराभिरज्यसे ।
इन्द्र त्वादातमिद्यशः ॥ ६ ॥

अभि द्युम्नानि वनिन इन्द्रं सचन्ते अक्षिता ।
पीत्वी सोमस्य वावृधे ॥ ७ ॥

अर्वावतो न आ गहि परावतश्च वृत्रहन् ।
इमा जुषस्व नो गिरः ॥ ८

यदन्तरा परावतमर्वावतं च हूयसे ।
इन्द्रेह तत आ गहि ॥ ९ ॥ २ ॥

॥ ४१ ॥ ऋषिः—विश्वामित्रः । देवता—इन्द्रः । छन्दः—गायत्री ॥

॥ ४१ ॥ आ तू न इन्द्र मद्र्यग्घुवान सोमपीतये ।
हरिभ्यां याह्यद्रिवः ॥ १ ॥

सत्तो होता न ऋत्वियस्तिस्तिरे बर्हिरानुषक् ।
अयुज्रन्प्रातरद्रयः ॥ २ ॥

गिर्वणः । पाहि । नः । सुतं । मधोः । धाराभिः । अज्यसे । इंद्र । त्वाऽदातं । इत् । यशः ॥ ६ ॥ अभि । द्युम्नानि । वनिनः । इंद्रं । सचंते । अक्षिता । पीत्वी । सोमस्य । ववृधे ॥ ७ ॥ अर्वाऽवतः । नः । आ । गहि । पराऽवतः । च । वृत्रऽहन् । इमाः । जुषस्व । नः । गिरः ॥ ८ ॥ यत् । अंतरा । पराऽवतं । अर्वाऽवतं । च । हूयसे । इंद्र । इह । ततः । आ । गहि ॥ ९ ॥ २ ॥

आ । तु । नः । इंद्र । मद्र्यक् । हुवानः । सोमऽपीतये । हरिऽभ्यां । याहि । अद्रिऽवः ॥ १ ॥ सत्तः । होता । नः । ऋत्वियः । तिस्तिरे । बर्हिः । आनुषक् । अयुंजन् । प्रातः । अद्रयः ॥ २ ॥

इमा ब्रह्म ब्रह्मवाहः क्रियन्त आ बर्हिः सीद ।
वीहि शूर पुरोळाशम् ॥ ३ ॥
ररन्धि सवनेषु ण एषु स्तोमेषु वृत्रहन् ।
उक्थेष्विन्द्र गिर्वणः ॥ ४ ॥
मतयः सोमपामुरुं रिहन्ति शवसस्पतिम् ।
इन्द्रं वत्सं न मातरः ॥ ५ ॥ ३ ॥
स मन्दस्वा ह्यन्धसो राधसे तन्वा महे ।
न स्तोतारं निदे करः ॥ ६ ॥
वयमिन्द्र त्वायवो हविष्मन्तो जरामहे ।
उत त्वमस्मयुर्वसो ॥ ७ ॥
मारे अस्मद्वि मुमुचो हरिप्रियार्वाङ्याहि ।
इन्द्र स्वधावो मत्स्वेह ॥ ८ ॥
अर्वाञ्चं त्वा सुखे रथे वहतामिन्द्र केशिना ।
घृतस्नू बर्हिरासदे ॥ ९ ॥ ४ ॥

इमा । ब्रह्म । ब्रह्मऽवाहः । क्रियंते । आ । बर्हिः । सीद । वीहि । शूर । पुरोळाशं ॥ ३ ॥ ररंधि । सवनेषु । नः । एषु । स्तोमेषु । वृत्रऽहन् । उक्थेषु । इंद्र । गिर्वणः ॥ ४ ॥ मतयः । सोमऽपां । उरुं । रिहंति । शवसः । पतिं । इंद्रं । वत्सं । न । मातरः ॥ ५ ॥ ३ ॥ सः । मंदस्व । हि । अंधसः । राधसे । तन्वा । महे । न । स्तोतारं । निदे । करः ॥ ६ ॥ वयं । इंद्र । त्वाऽयवः । हविष्मंतः । जरामहे । उत । त्वं । अस्मऽयुः । वसो इति ॥ ७ ॥ मा । आरे । अस्मत् । वि । मुमुचः । हरिंऽप्रिय । अर्वाङ् । याहि । इंद्र । स्वधाऽवः । मत्स्व । इह ॥ ८ ॥ अर्वाचं । त्वा । सुऽखे । रथे । वहतां । इंद्र । केशिना । घृतस्नू इति घृतऽस्नू । बर्हिः । आऽसदे ॥ ९ ॥ ४ ॥

॥ ४२ ॥ ऋषिः-विश्वामित्रः । देवता-इन्द्रः । छन्दः-गायत्री ॥

॥ ४२ ॥ उप॑ नः सु॒तमा ग॑हि सो॒मम॑ इन्द्र॒ गवा॑शिरम् ।
हरि॑भ्यां॒ यस्ते॑ अस्म॒युः ॥ १ ॥

तमि॑न्द्र मद॒मा ग॑हि ब॒र्हिष्ठां॒ ग्राव॑भिः सु॒तम् ।
कु॒वित्तु॑स्य तृप्णवः ॥ २ ॥

इन्द्र॑मित्था गिरो मम॒ाच्छो॒क्तिरि॒ता उ॒तः ।
आ॒कृते॑ सोम॒पीत॑ये ॥ ३ ॥

इन्द्रं॑ सोम॑स्य पी॒तये॒ स्तोमे॑भि॒रिह हु॑वामहे ।
उ॒क्थेभिः॑ कु॒विद॒ागम॑त् ॥ ४ ॥

इन्द्र॒ सोमा॑: सु॒ता इ॒मे तान्दधिष्व शतक्रतो ।
ज॒ठरे॑ वाजिनीवसो ॥ ५ ॥ ५ ॥

विश्वा॒ हि त्वा॑ धनञ्जयं वाजे॑षु दधृषं कवे ।
अधा॑ ते सुम्नमीमहे ॥ ६ ॥

उप॑ । नः॒ । सु॒तं । आ । ग॒हि॒ । सोम॑ । इ॒न्द्र॒ । गोऽआ॑शिरं । हरि॑ऽभ्यां । यः । ते॒ । अ॒स्म॒ऽयुः ॥ १ ॥ तं । इ॒न्द्र॒ । मदं॑ । आ । ग॒हि॒ । ब॒र्हिःऽस्थां॑ । ग्राव॑ऽभिः । सु॒तं । कु॒वित् । नु । अ॒स्य॒ । तृ॒प्ण॒वः॒ ॥ २ ॥ इ॒न्द्र॑ । इ॒त्था । गिरः॑ । मम॑ । अच्छ॑ । अ॒गुः॒ । इ॒षि॒ताः॒ । इ॒तः॒ । आऽकृ॑ते । सोम॑ऽपीतये ॥ ३ ॥ इन्द्र॑ । सोम॑स्य । पी॒तये॑ । स्तोमे॑भिः । इ॒ह । ह॒वा॒म॒हे॒ । उ॒क्थेभिः॑ । कु॒वित् । आऽग॑मत् ॥ ४ ॥ इन्द्र॑ । सोमाः॑ । सु॒ताः॒ । इ॒मे । तान् । द॒धि॒ष्व॒ । श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो । ज॒ठरे॑ । वा॒जि॒नी॒व॒सो॒ इति॑ वाजिनीऽवसो ॥ ५ ॥ ५ ॥ विश्वा॑ । हि । त्वा॒ । धन॑ऽजयं । वाजे॑षु । दधृषं । क॒वे॒ । अध॑ । ते॒ । सु॒म्नं । ई॒म॒हे॒ ॥ ६ ॥

इमामिन्द्र गवाशिरं यवाशिरं च नः पिब ।
आगत्या वृषभिः सुतम् ॥ ७ ॥
तुभ्येदिन्द्र स्व ओक्ये३सोमं चोदामि पीतये ।
एष रारन्तु ते हृदि ॥ ८ ॥
त्वां सुतस्य पीतये प्रत्नमिन्द्र हवामहे ।
कुक्षिकाम्सो अवस्यवः ॥ ९ ॥ ६ ॥

॥ ४३ ॥ ऋषिः—विश्वामित्रः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥
॥ ४३ ॥ आ याहि वीतये गृणानो हव्यदातये नि होता सत्सि बर्हिषि ।
प्रिया सखाया वि मुचोषि वृत्रहन्पिबा सोमानामर्णसः ॥ १ ॥
आ याहि पूर्वीरति चर्षणीरां अर्यो आदिश उर्वो नो हरिभ्याम् ।
इमा हि त्वा मतयः स्तोमतष्टा इन्द्र हवन्ते सख्यं जुषाणाः ॥ २ ॥
आ नो यज्ञं नमोवृधं सजोषा इन्द्र देव हरिभिर्याहि तूयम् ।
अहं हि त्वा मतिभिर्जोहवीमि सुतसोमाः स्वदमादो मघूनाम् ॥ ३ ॥

इमं । इंद्र । गोऽआशिरं । यवऽआशिरं । च । नः । पिब । आऽगत्य । वृषऽभिः । सुतं ॥ ७ ॥ तुभ्य । इत् । इंद्र । स्वे । ओक्ये । सोमं । चोदामि । पीतये । एषः । ररंतु । ते । हृदि ॥ ८ ॥ त्वां । सुतस्य । पीतये । प्रत्नं । इंद्र । हवामहे । कुक्षिकाम्सः । अवस्यवः ॥ ९ ॥ ६ ॥

आ । याहि । वीतये । गृणानः । हव्यऽदातये । नि । होता । सत्सि । बर्हिषि । प्रिया । सखाया । वि । मुच । उषः । वृत्रऽहन् । पिब । आ । सोमानां । अर्णसः ॥ १ ॥ आ । याहि । पूर्वीः । अति । चर्षणीः । आ । अर्यः । आऽशिषः । उर्वः । नः । हरिऽभ्यां । इमाः । हि । त्वा । मतयः । स्तोमऽतष्टाः । इंद्र । हवंते । सख्यं । जुषाणाः ॥ २ ॥ आ । नः । यज्ञं । नमःऽवृधं । सऽजोषाः । इंद्र । देव । हरिऽभिः । याहि । तूयं । अहं । हि । त्वा । मतिऽभिः । जोहवीमि । सुतऽसोमाः । स्वदऽमादः । मघूनां ॥ ३ ॥

आ च त्वामेता वृषणा वहातो हरी सखाया सुधुरा स्वङ्गा ।
धानावदिन्द्रः सवनं जुषाणः सखा सख्युः शृणवद्वन्दनानि ॥ ४ ॥
कुविन्मा गोपां करसे जनस्य कुविद्राजानं मघवन्नृजीषिन् ।
कुविन्म ऋषिं पपिवांसं सुतस्य कुविन्मे वस्वो अमृतस्य शिक्षाः ॥ ५ ॥
आ त्वा बृहन्तो हरयो युजाना अर्वागिन्द्र सधमादो वहन्तु ।
प्र ये द्विता दिव ऋञ्जन्त्याताः सुसम्मृष्टासो वृषभस्य मूराः ॥ ६ ॥
इन्द्र पिब वृषधूतस्य वृष्ण आ यं ते श्येन उशते जभार ।
यस्य मदे च्यावयसि प्र कृष्टीर्यस्य मदे अप गोत्रा ववर्थ ॥ ७
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि सञ्जितं धनानाम् ॥ ८ ॥ ७ ॥

आ । च । त्वा । एता । वृषणा । वहातः । हरी इति । सखाया । सुऽधुरा । सुऽअंगा । धानाऽवत् । इंद्रः । सवनं । जुषाणः । सखा । सख्युः । शृणवत् । वंदनानि ॥ ४ ॥ कुवित् । मा । गोपां । करसे । जनस्य । कुवित् । राजानं । मघऽवन् । ऋजीषिन् । कुवित् । मा । ऋषिं । पपिऽवांसं । सुतस्य । कुवित् । मे । वस्वः । अमृतस्य । शिक्षाः ॥ ५ ॥ आ । त्वा । बृहंतः । हरयः । युजानाः । अर्वाक् । इंद्र । सधऽमादः । वहंतु । प्र । ये । द्विता । दिवः । ऋंजंति । आताः । सुऽसंमृष्टासः । वृषभस्य । मूराः ॥ ६ ॥ इंद्र । पिब । वृषऽधूतस्य । वृष्णः । आ । यं । ते । श्येनः । उशते । जभार । यस्य । मदे । च्यवयसि । प्र । कृष्टीः । यस्य । मदे । अप । गोत्रा । ववर्थ ॥ ७ ॥ शुनं । हुवेम । मघऽवानं । इंद्रं । अस्मिन् । भरे । नृऽतमं । वाजऽसातौ । शृण्वंतं । उग्रं । ऊतये । समत्ऽसु । घ्नंतं । वृत्राणि । संऽजितं । धनानां ॥ ८ ॥ ७ ॥

॥ ४४ ॥ ऋषिः—विश्वामित्रः । देवता—इन्द्रः । छन्दः—बृहती ॥

॥ ४४ ॥ अयं ते अस्तु हर्यतः सोम आ हरिभिः सुतः ।
जुषाण इन्द्र हरिभिर्न आ गह्या तिष्ठ हरितं रथम् ॥ १ ॥
हर्यन्नुषसमर्चयः सूर्यं हर्यन्नरोचयः ।
विद्वांश्चिकित्वान्हर्यश्व वर्धस इन्द्र विश्वा अभि श्रियः ॥ २ ॥
द्यामिन्द्रो हरिधायसं पृथिवीं हरिवर्पसम् ।
अधारयद्धरितोर्भूरि भोजनं ययोरन्तर्हरिश्चरत् ॥ ३ ॥
जज्ञानो हरितो वृषा विश्वमा भाति रोचनम् ।
हर्यश्वो हरितं धत्त आयुधमा वज्रं बाह्वोर्हरिम् ॥ ४ ॥
इन्द्रो हर्यन्तमर्जुनं वज्रं शुक्रैरभीवृतम् ।
अपावृणोद्धरिभिरद्रिभिः सुतमुद्गा हरिभिराजत ॥ ५ ॥ ८ ॥

अयं । ते । अस्तु । हर्यतः । सोमः । आ । हरिऽभिः । सुतः । जुषाणः । इंद्र । हरिऽभिः । नः । आ । गहि । आ । तिष्ठ । हरितं । रथं ॥ १ ॥ हर्यन् । उषसं । अर्चयः । सूर्यं । हर्यन् । अरोचयः । विद्वान् । चिकित्वान् । हरिऽअश्व । वर्धसे । इंद्र । विश्वाः । अभि । श्रियः ॥ २ ॥ द्यां । इंद्रः । हरिऽधायसं । पृथिवीं । हरिऽवर्पसं । अधारयत् । हरितोः । भूरि । भोजनं । ययोः । अंतः । हरिः । चरत् ॥ ३ ॥ जज्ञानः । हरितः । वृषा । विश्वं । आ । भाति । रोचनं । हरिऽअश्वः । हरितं । धत्ते । आयुधं । आ । वज्रं । बाह्वोः । हरिं ॥ ४ ॥ इंद्रः । हर्यतं । अर्जुनं । वज्रं । शुक्रैः । अभिऽवृतं । अप । अवृणोत् । हरिऽभिः । अद्रिऽभिः । सुतं । उत् । गाः । हरिऽभिः । आजत ॥ ५ ॥ ८ ॥

॥ ४५ ॥ ऋषिः-विश्वामित्रः । देवता-इन्द्रः । छन्दः-बृहती ॥

॥ ४५ ॥ आ मन्त्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ।
मा त्वा के चिन्नि यमन्विं न पाशिनोऽति धन्वेव ताँ इहि ॥ १ ॥
वृत्रखादो वलंरुजः पुरां दर्मो अपामजः ।
स्थाता रथस्य हर्योरभिस्वर इन्द्रो दृळ्हा चिदारुजः ॥ २ ॥
गम्भीराँ उदधीरिव क्रतुं पुष्यसि गा इव ।
प्र सुगोपा यवसं धेनवो यथा हृदं कुल्या इवाशत ॥ ३ ॥
आ नस्तुजं रयिं भरांशं न प्रतिजानते ।
वृक्षं पक्वं फलेग्रुवि स्वर्विदं स्पार्हं गन्धारमं मदे ॥ ४ ॥
स्वयुरिन्द्र स्वराळसि स्मद्दिष्टिः स्वयशस्तरः ।
स नो वसुवान ओजसा पुरुहूत नमो नः सुत्यर्वसनः ॥ ५ ॥ २ ॥

आ । मंत्रैः । इंद्र । हरिऽभिः । याहि । मयूररोमऽभिः । मा । त्वा । के । चित् । नि । यमन् । विं । न । पाशिनः । अति । धन्वाऽइव । ताम् । इहि ॥ १ ॥ वृत्रऽखादः । वलंऽरुजः । पुरः । दर्मः । अपां । अजः । स्थाता । रथस्य । हर्योः । अभिऽस्वरे । इंद्रः । दृळ्हा । चित् । आऽरुजः ॥ २ ॥ गंभीरान् । उदधीन्ऽइव । क्रतुं । पुष्यसि । गाःऽइव । ग । सुऽगोपाः । यवसं । धेनवः । यथा । हृदं । कुल्याःऽइव । आशत ॥ ३ ॥ आ । नः । तुजं । रयिं । भर । अंशं । न । प्रतिऽजानते । वृक्षं । पक्वं । फलेग्रुवि । अंकीऽइव । रुरुहिं । इंद्र । गंधऽमादनं । मदे ॥४॥ स्वऽयुः । इंद्र । स्वऽराट् । असि । स्मत्ऽदिष्टिः । स्वयंऽशस्तरः । सः । वसुऽवानः । ओजसा । पुरुऽहूत । नमः । नः । सुऽअर्वसनः ॥ ५ ॥ २ ॥

॥ ४६ ॥ ऋषिः—विश्वामित्रः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥ ४६ ॥ युध्मस्य ते वृषभस्य स्वराज उग्रस्य यूनः स्थविरस्य घृष्वेः ।
अजूर्यतो वज्रिणो वीर्याणीन्द्र श्रुतस्य महतो महानि ॥ १ ॥
महाँ असि महिष वृष्ण्येभिर्धनस्पृदुग्र सहमानो अन्यान् ।
एको विश्वस्य भुवनस्य राजा स योधया च क्षयया च जनान् ॥ २ ॥
प्र मात्राभी रिरिचे रोचमानः प्र देवेभिर्विश्वतो अप्रतीतः ।
प्र मज्मना दिव इन्द्रः पृथिव्याः प्रोरोमहा अन्तरिक्षादृजीषी ॥ ३ ॥
उरुं गभीरं जनुषाभ्युग्रं विश्वव्यचसमवतं मतीनाम् ।
इन्द्रं सोमासः प्रदिविं सुतासः समुद्रं न स्रवत आ विशन्ति ॥ ४ ॥
यं सोममिन्द्र पृथिवीद्यावा गर्भं न माता बिभृतस्त्वाया ।
तं ते हिन्वन्ति तमु ते मृजन्त्यध्वर्यवो वृषभ पातवा उ ॥ ५ ॥ १० ॥

युध्मस्य । ते । वृषभस्य । स्वऽराजः । उग्रस्य । यूनः । स्थविरस्य । घृष्वेः । अजूर्यतः । वज्रिणः । वीर्याणि । इंद्र । श्रुतस्य । महतः । महानि ॥ १ ॥ महान् । असि । महिष । वृष्ण्येभिः । धनऽस्पृत् । उग्र । सहमानः । अन्यान् । एकः । विश्वस्य । भुवनस्य । राजा । सः । योधय । च । क्षयय । च । जनान् ॥ २ ॥ प्र । मात्राभिः । रिरिचे । रोचमानः । प्र । देवेभिः । विश्वतः । अप्रतिऽइतः । प्र । मज्मना । दिवः । इंद्रः । पृथिव्याः । प्र । उरोः । महः । अंतरिक्षात् । ऋजीषी ॥ ३ ॥ उरुं । गभीरं । जनुषा । अभि । उग्रं । विश्वऽव्यचसं । अवतं । मतीनां । इंद्रं । सोमासः । प्रऽदिविं । सुतासः । समुद्रं । न । स्रवतः । आ । विशंति ॥ ४ ॥ यं । सोमं । इंद्र । पृथिवी-द्यावा । गर्भं । न । माता । बिभृतः । त्वाऽया । तं । ते । हिन्वंति । तं । ऊं इति । ते । मृजंति । अध्वर्यवः । वृषभ । पातवै । ऊं इति ॥ ५ ॥ १० ॥

॥ ४९ ॥ ऋषिः—विश्वमित्रः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥४९॥ शंसा महामिन्द्रं यस्मिन्विश्वा आ कृष्टयः सोमपाः काममव्यन् ।
यं सुक्रतुं धिषणे विभ्वतष्टं घनं वृत्राणां जनयन्त देवाः ॥ १ ॥
यं नु नकिः पृतनासु स्वराजं द्विता तरति नृतमं हरिष्ठाम् ।
इनतमः सत्वभिर्यो ह शूषैः पृथुज्रयां अमिनादायुर्दस्योः ॥ २ ॥
सहावा पृत्सु तरणिर्नार्वा व्यानशी रोदसी मेहनावान् ।
भगो न कारे हव्यो मतीनां पितेव चारुः सुहवो वयोधाः ॥ ३ ॥
धर्ता दिवो रजसस्पृष्ट ऊर्ध्वो रथो न वायुर्वसुभिर्नियुत्वान् ।
क्षपां वस्ता जनिता सूर्यस्य विभक्ता भागं धिषणेव वाजम् ॥ ४ ॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि सञ्जितं धनानाम् ॥ ५ ॥ १३ ॥

शंस । महां । इंद्रं । यस्मिन् । विश्वाः । आ । कृष्टयः । सोमऽपाः । कामं । अव्यन् । यं । सुऽक्रतुं । धिषणे इति । विभ्वऽतष्टं । घनं । वृत्राणां । जनयंत । देवाः ॥ १ ॥ यं । नु । नकिः । पृतनासु । स्वऽराजं । द्विता । तरति । नृऽतमं । हरिऽस्थां । इनऽतमः । सत्वऽभिः । यः । ह । शूषैः । पृथुऽज्रयाः । अमिनात् । आयुः । दस्योः ॥ २ ॥ सहऽवा । पृत्ऽसु । तरणिः । न । अर्वा । विऽआनशिः । रोदसी इति । मेहनाऽवान् । भगः । न । कारे । हव्यः । मतीनां । पिताऽइव । चारुः । सुऽहवः । वयःऽधाः ॥ ३ ॥ धर्ता । दिवः । रजसः । पृष्टः । ऊर्ध्वः । रथः । न । वायुः । वसुऽभिः । नियुत्वान् । क्षपां । वस्ता । जनिता । सूर्यस्य । विऽभक्ता । भागं । धिषणाऽइव । वाजं ॥ ४ ॥ शुनं । हुवेम । मघऽवानं । इंद्रं । अस्मिन् । भरे । नृऽतमं । वाजऽसातौ । शृण्वंतं । उग्रं । ऊतये । समत्ऽसु । घ्नंतं । वृत्राणि । संऽजितं । धनानां ॥ ५ ॥ १३ ॥

॥ ५० ॥ ऋषिः-विश्वामित्रः । देवता-इन्द्रः । छन्दः-त्रिष्टुप् ॥

॥ ५० ॥ इन्द्रः स्वाहा पिबतु यस्य सोम आगत्या तुम्रो वृषभो मरुत्वान् ।
ओरुव्यचाः पृणतामेभिरन्नैरास्य हविस्तन्वः काममृध्याः ॥ १ ॥
आ ते सपर्यू जवसे युनज्मि ययोरनु प्रदिवः श्रुष्टिमावः ।
इह त्वा धेयुर्हरयः सुशिप्र पिबा त्वस्य सुषुतस्य चारोः ॥ २ ॥
गोभिर्मिमिक्षुं दधिरे सुपारमिन्द्रं ज्यैष्ठ्याय धायसे गृणानाः ।
मंदानः सोमं पपिवाँ ऋजीषिन्त्समस्मभ्यं पुरुधा गा इषण्य ॥ ३ ॥
इमं कामं मन्दया गोभिरश्वैश्चन्द्रवता राधसा पप्रथश्च ।
स्वर्यवो मतिभिस्तुभ्यं विप्रा इन्द्राय वाहः कुशिकासो अक्रन् ॥ ४ ॥

इंद्रः । स्वाहा । पिबतु । यस्य । सोमः । आऽगत्य । तुम्रः । वृषभः । मरुत्वान् । आ । उरुऽव्यचाः । पृणतां । एभिः । अन्नैः । आ । अस्य । हविः । तन्वः । कामं । ऋध्याः ॥ १ ॥ आ । ते । सपर्यू इति । जवसे । युनज्मि । ययोः । अनु । प्रऽदिवः । श्रुष्टि । आवः । इह । त्वा । धेयुः । हरयः । सुऽशिप्र । पिब । तु । अस्य । सुऽसुतस्य । चारोः ॥ २ ॥ गोभिः । मिमिक्षुं । दधिरे । सुऽपारं । इंद्रं । ज्यैष्ठ्याय । धायसे । गृणानाः । मंदानः । सोमं । पपिऽवान् । ऋजीषिन् । सं । अस्मभ्यं । पुरुधा । गाः । इषण्य ॥ ३ ॥ इमं । कामं । मंदय । गोभिः । अश्वैः । चंद्रऽवता । राधसा । पप्रथः । च । स्वःऽयवः । मतिऽभिः । तुभ्यं । विप्राः । इंद्राय । वाहः । कुशिकासः । अक्रन् ॥ ४ ॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि सञ्जितं धनानाम् ॥ ५ ॥ १४ ॥

॥ ५१ ॥ ऋषिः-विश्वामित्रः । देवता-इन्द्रः । छन्दः- त्रिष्टुप् ॥

॥ ५१ ॥ चर्षणीधृतं मघवानमुक्थ्यमिन्द्रं गिरो बृहतीरभ्यनूषत ।
वावृधानं पुरुहूतं सुवृक्तिभिरमर्त्यं जरमाणं दिवेदिवे ॥ १ ॥
शतक्रतुमर्णवं शाकिनं नरं गिरो म इन्द्रमुप यन्ति विश्वतः ।
वाजसनिं पूर्भिदं तूर्णिमप्तुरं धामसाचमभिषाचं स्वर्विदम् ॥ २ ॥
आकरे वसोर्जरिता पनस्यतेऽनेहसः स्तुभ इन्द्रो दुवस्यति ।
विवस्वतः सदन आ हि पिप्रिये सत्रासाहमभिमातिहनं स्तुहि ॥ ३ ॥

शुनं । हुवेम । मघऽवानं । इंद्रं । अस्मिन् । भरे । नृऽतमं । वाजऽसातौ । शृण्वंतं । उग्रं । ऊतये । समत्ऽसु । घ्नंतं । वृत्राणि । संऽजितं । धनानां ॥ ५ ॥

चर्षणिऽधृतं । मघऽवानं । उक्थ्यं । इंद्रं । गिरः । बृहतीः । अभि । अनूषत ।
ववृधानं । पुरुऽहूतं । सुऽवृक्तिऽभिः । अमर्त्यं । जरमाणं । दिवेऽदिवे ॥ १ ॥
शतऽक्रतुं । अर्णवं । शाकिनं । नरं । गिरः । मे । इंद्रं । उप । यंति । विश्वतः ।
वाजऽसनिं । पूःऽभिदं । तूर्णिं । अप्ऽतुरं । धामऽसाचं । अभिऽसाचं । स्वःऽविदं ॥२॥
आऽकरे । वसोः । जरिता । पनस्यते । अनेहसः । स्तुभः । इंद्रः । दुवस्यति ।
विऽवस्वतः । सदने । आ । हि । पिप्रिये । सत्राऽसाहं । अभिमातिऽहनं । स्तुहि ॥३॥

नृणामु त्वा नृतमं गीर्भिरुक्थैरभि प्र वीरमर्चता सबाधः ।
सं सहसे पुरुमायो जिहीते नमो अस्य प्रदिव एक ईशे ॥ ४ ॥
पूर्वीरस्य निष्षिधो मर्त्येषु पुरू वसूनि पृथिवी बिभर्ति ।
इन्द्राय धाव ओषधीरुतापो रयिं रक्षन्ति जीरयो वनानि ॥ ५ ॥ १५ ॥
तुभ्यं ब्रह्माणि गिर इन्द्र तुभ्यं सत्रा दधिरे हरिवो जुषस्व ।
बोध्याऽपिरवसो नूतनस्य सखे वसो जरितृभ्यो वयो धाः ॥ ६ ॥
इन्द्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य ।
तव प्रणीती तव शूर शर्मन्ना विवासन्ति कवयः सुयज्ञाः ॥ ७ ॥

नृणां । ऊं इति । त्वा । नृऽतमं । गीःऽभिः । उक्थैः । अभि । प्र । वीरं । अर्चत । सऽबाधः । सं । सहसे । पुरुऽमायः । जिहीते । नमः । अस्य । प्रऽदिवः । एकः । ईशे ॥ ४ ॥ पूर्वीः । अस्य । निःऽसिधः । मर्त्येषु । पुरु । वसूनि । पृथिवी । बिभर्ति । इंद्राय । धावः । ओषधीः । उत । आपः । रयिं । रक्षंति । जीरयः । वनानि ॥ ५ ॥ १५ ॥ तुभ्यं । ब्रह्माणि । गिरः । इंद्र । तुभ्यं । सत्रा । दधिरे । हरिऽवः । जुषस्व । बोधि । आपिः । अवसः । नूतनस्य । सखे । वसो इति । जरितृऽभ्यः । वयः । धाः ॥ ६ ॥ इंद्र । मरुत्वः । इह । पाहि । सोमं । यथा । शार्याते । अपिबः । सुतस्य । तव । प्रऽनीती । तव । शूर । शर्मन् । आ । विवासंति । कवयः । सुऽयज्ञाः ॥ ७ ॥

स वावशान इह पाहि सोमं मरुद्भिरिन्द्र सखिभिः सुतं नः ।
जातं यत्त्वा परि देवा अभूषन्महे भराय पुरुहूत विश्वे ॥ ८ ॥
अप्तूर्यै मरुत आपिरेषोऽमन्दन्निन्द्रमनु दातिवाराः ।
तेभिः साकं पिबतु वृत्रखादः सुतं सोमं दाशुषः स्वे सधस्थे ॥ ९ ॥
इदं ह्यन्वोजसा सुतं राधानां पते । पिबा त्वस्य गिर्वणः ॥ १० ॥
यस्ते अनु स्वधामसत्सुते नि यच्छ तन्वम् । स त्वा ममत्तु सोम्यम् ॥ ११ ॥
प्र ते अश्नोतु कुक्ष्योः प्रेन्द्र ब्रह्मणा शिरः । प्र बाहू शूर राधसे ॥ १२ ॥ १६ ॥

सः । वावशानः । इह । पाहि । सोमं । मरुत्ऽभिः । इंद्र । सखिऽभिः । सुतं । नः । जातं । यत् । त्वा । परि । देवाः । अभूषन् । महे । भराय । पुरुऽहूत । विश्वे ॥ ८ ॥ अप्ऽतूर्ये । मरुतः । आपिः । एषः । अमंदन् । इंद्रं । अनु । दातिऽवाराः । तेभिः । साकं । पिबतु । वृत्रऽखादः । सुतं । सोमं । दाशुषः । स्वे । सधऽस्थे ॥ ९ ॥ इदं । हि । अनु । ओजसा । सुतं । राधानां । पते । पिब । तु । अस्य । गिर्वणः ॥ १० ॥ यः । ते । अनु । स्वधां । असत् । सुते । नि । यच्छ । तन्वं । सः । त्वा । ममत्तु । सोम्यं ॥ ११ ॥ प्र । ते । अश्नोतु । कुक्ष्योः । प्र । इंद्र । ब्रह्मणा । शिरः । प्र । बाहू इति । शूर । राधसे ॥ १२ ॥ १६ ॥

॥ ५२ ॥ ऋषिः—विश्वामित्रः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥ ५२ ॥ धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् । इन्द्रं प्रातर्जुषस्व नः॥१॥

पुरोळाशं पचत्यं जुषस्वेन्द्रा गुरस्व च । तुभ्यं हव्यानि सिस्रते ॥ २ ॥

पुरोळाशं च नो घसो जोषयासे गिरश्च नः । वधूयुरिव योषणाम् ॥ ३ ॥

पुरोळाशं सनश्रुत प्रातःसावे जुषस्व नः । इन्द्र क्रतुर्हि ते बृहन् ॥ ४ ॥

माध्यन्दिनस्य सवनस्य धानाः पुरोळाशमिन्द्र कृष्वेह चारुम् ।
प्र यत्स्तोता जरिता तूर्णयर्थो वृषायमाण उप गीर्भिरीट्टे ॥ ५ ॥ १७ ॥

तृतीये धानाः सवने पुरुष्टुत पुरोळाशमाहुतं मामहस्व नः ।
ऋभुमन्तं वाजवन्तं त्वा कवे प्रयस्वन्त उप शिक्षेम धीतिभिः ॥ ६ ॥

धानाऽवंतं । करंभिणं । अपूपऽवंतं । उक्थिनं । इंद्रं । प्रातः । जुषस्व । नः ॥ १ ॥ पुरोळाशं । पचत्यं । जुषस्व । इंद्र । आ । गुरस्व । च । तुभ्यं । हव्यानि । सिस्रते ॥ २ ॥ पुरोळाशं । च । नः । घसः । जोषयासे । गिरः । च । नः । वधूयुःऽइव । योषणां ॥ ३ ॥ पुरोळाशं । सनऽश्रुत । प्रातःऽसावे । जुषस्व । नः । इंद्र । क्रतुः । हि । ते । बृहन् ॥ ४ ॥ माध्यंदिनस्य । सवनस्य । धानाः । पुरोळाशं । इंद्र । कृष्व । इह । चारुं । प्र । यत् । स्तोता । जरिता । तूर्णिऽअर्थः । वृषऽयमाणः । उप । गीःऽभिः । ईट्टे ॥ ५ ॥ १७ ॥ तृतीये । धानाः । सवने । पुरुऽस्तुत । पुरोळाशं । आऽहुतं । ममहस्व । नः । ऋभुऽमंतं । वाजंऽवंतं । त्वा । कवे । प्रयस्वंतः । उप । शिक्षेम । धीतिऽभिः ॥ ६ ॥

पूषण्वते ते चकृमा करम्भं हरिवते हर्यश्वाय धानाः ।
अपूपमद्धि सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ॥ ७ ॥
प्रति धाना भरत तूयमस्मै पुरोळाशं वीरतमाय नृणाम् ।
दिवेदिवे सदृशीरिन्द्र तुभ्यं वर्धन्तु त्वा सोमपेयाय धृष्णो ॥ ८ ॥ १८ ॥

॥ ५३ ॥ ऋषिः—विश्वामित्रः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥ ५३ ॥ इन्द्रापर्वता बृहता रथेन वामीरिष आ वहतं सुवीराः ।
वीतं हव्यान्यध्वरेषु देवा वर्धेथां गीर्भिरिळया मदन्ता ॥ १ ॥
तिष्ठा सु कं मघवन्मा परा गाः सोमस्य नु त्वा सुषुतस्य यक्षि ।
पितुर्न पुत्रः सिचमा रभे त इन्द्र स्वादिष्टया गिरा शचीवः ॥ २ ॥

पूषण्ऽवते । ते । चकृम । करंभं । हरिंऽवते । हरिंऽअश्वाय । धानाः । अपूपं । अद्धि । सऽगणः । मरुत्ऽभिः । सोमं । पिब । वृत्रऽहा । शूर । विद्वान् ॥ ७ ॥ प्रति । धानाः । भरत । तूयं । अस्मै । पुरोळाशं । वीरऽतमाय । नृणां । दिवेऽदिवे । सऽदृशीः । इंद्र । तुभ्यं । वर्धंतु । त्वा । सोमऽपेयाय । धृष्णो इति ॥ ८ ॥ १८ ॥

इंद्रापर्वता । बृहता । रथेन । वामीः । इषः । आ । वहतं । सुऽवीराः । वीतं । हव्यानि । अध्वरेषु । देवा । वर्धेथां । गीःऽभिः । इळया । मदंता ॥ १ ॥ तिष्ठ । सु । कं । मघऽवन् । मा । परा । गाः । सोमस्य । नु । त्वा । सुऽसुतस्य । यक्षि । पितुः । न । पुत्रः । सिचं । आ । रभे । ते । इंद्र । स्वादिष्टया । गिरा । शचीऽवः ॥२॥

शंसावाध्वर्यो प्रति मे गृणीहीन्द्राय वाहः कृणवाव जुष्टम् ।
एदं बर्हिर्यजमानस्य सीदाथा च भूदुक्थमिन्द्राय शस्तम् ॥ ३ ॥
जायेदस्तं मघवन्त्सेदु योनिस्तदित्त्वा युक्ता हरयो वहन्तु ।
यदा कदा च सुनवाम सोममग्निष्ट्वा दूतो धन्वात्यच्छ ॥ ४ ॥
परा याहि मघवन्ना च याहीन्द्र भातरुभयत्रा ते अर्थम् ।
यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो रासभस्य ॥ ५ ॥ १९ ॥
अपाः सोममस्तमिन्द्र प्र याहि कल्याणीर्जाया सुरणं गृहे ते ।
यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत् ॥ ६ ॥

शंसाव । अध्वर्यो इति । प्रति । मे । गृणीहि । इंद्राय । वाहः । कृणवाव । जुष्टं । आ । इदं । बर्हिः । यजमानस्य । सीद । अथ । च । भूत् । उक्थं । इंद्राय । शस्तं ॥ ३ ॥ जाया । इत् । अस्तं । मघऽवन् । सा । इत् । ऊं इति । योनिः । तत् । इत् । त्वा । युक्ताः । हरयः । वहंतु । यदा । कदा । च । सुनवाम । सोमं । अग्निः । त्वा । दूतः । धन्वाति । अच्छ ॥ ४ ॥ परा । याहि । मघऽवन् । आ । च । याहि । इंद्र । भ्रातः । उभयत्र । ते । अर्थं । यत्र । रथस्य । बृहतः । निऽधानं । विऽमोचनं । वाजिनः । रासभस्य ॥ ५ ॥ १९ ॥ अपाः । सोमं । अस्तं । इंद्र । प्र । याहि । कल्याणीः । जाया । सुऽरणं । गृहे । ते । यत्र । रथस्य । बृहतः । निऽधानं । विऽमोचनं । वाजिनः । दक्षिणाऽवत् ॥ ६ ॥

इमे भोजा अङ्गिरसो विरूपा दिवस्पुत्रासो असुरस्य वीराः ।
विश्वामित्राय ददतो मघानि सहस्रसावे प्र तिरन्त आयुः ॥ ७ ॥

रूपंरूपं मघवा बोभवीति मायाः कृण्वानस्तन्वं१परि स्वाम् ।
त्रिर्यद्दिवः परि मुहूर्तमागात्स्वैर्मन्त्रैरनृतुपा ऋतावा ॥ ८ ॥

महाँ ऋषिर्देवजा देवजूतोऽस्तभ्नात्सिन्धुमर्णवं नृचक्षाः ।
विश्वामित्रो यदवहत्सुदासमप्रियायत कुशिकेभिरिन्द्रः ॥ ९ ॥

हंसा इव कृणुथ श्लोकमद्रिभिर्मदन्तो गीर्भिरध्वरे सुते सचा ।
देवेभिर्विप्रा ऋषयो नृचक्षसो वि पिबध्वं कुशिकाः सोम्यं मधु ॥१०॥२०॥

इमे । भोजाः । अंगिरसः । विऽरूपाः । दिवः । पुत्रासः । असुरस्य । वीराः ।
विश्वामित्राय । ददतः । मघानि । सहस्रऽसावे । प्र । तिरंते । आयुः ॥ ७ ॥
रूपंऽरूपं । मघऽवा । बोभवीति । मायाः । कृण्वानः । तन्वं । परि । स्वां । त्रिः ।
यत् । दिवः । परि । मुहूर्तं । आ । अगात् । स्वैः । मंत्रैः । अनृतुऽपाः ।
ऋतऽवा ॥ ८ ॥ महान् । ऋषिः । देवऽजाः । देवऽजूतः । अस्तभ्नात् । सिंधुं ।
अर्णवं । नृऽचक्षाः । विश्वामित्रः । यत् । अवहत् । सुऽदासं । अप्रियायत ।
कुशिकेभिः । इंद्रः ॥ ९ ॥ हंसाःऽइव । कृणुथ । श्लोकं । अद्रिऽभिः । मदंतः ।
गीःऽभिः । अध्वरे । सुते । सचा । देवेभिः । विप्राः । ऋषयः । नृऽचक्षसः । वि ।
पिबध्वं । कुशिकाः । सोम्यं । मधु ॥ १० ॥ २० ॥

उप प्रेत कुशिकाश्चेतयध्वमश्वं राये प्र मुञ्चता सुदासः ।
राजा वृत्रं जङ्घनत्प्रागपागुदगथा यजाते वर आ पृथिव्याः ॥ ११ ॥
य इमे रोदसी उभे अहमिन्द्रमतुष्टवम् ।
विश्वामित्रस्य रक्षति ब्रह्मेदं भारतं जनम् ॥ १२ ॥
विश्वामित्रा अरासत ब्रह्मेन्द्राय वज्रिणे ।
करदिन्नः सुराधसः ॥ १३ ॥
किं ते कृण्वंति कीकटेषु गावो नाशिरं दुह्रे न तपन्ति घर्मं ।
आ नो भर प्रमगन्दस्य वेदो नैचाशाखं मघवन्रन्धया नः ॥ १४ ॥
ससर्परीरमतिं बाधमाना बृहन्मिमाय जमदग्निदत्ता ।
आ सूर्यस्य दुहिता ततान श्रवो देवेष्वमृतमजुर्यम् ॥ १५ ॥ २१ ॥

उप । प्र । इत । कुशिकाः । चेतयध्वं । अश्वं । राये । प्र । मुंचत । सुऽदासः ।
राजा । वृत्रं । जंघनत् । प्राक् । अपाक् । उदक् । अथ । यजाते । वरे । आ ।
पृथिव्याः ॥ ११ ॥ यः । इमे इति । रोदसी इति । उभे इति । अहं । इंद्रं ।
अतुष्टवं । विश्वामित्रस्य । रक्षति । ब्रह्म । इदं । भारतं । जनं ॥ १२ ॥ विश्वामित्राः ।
अरासत । ब्रह्म । इंद्राय । वज्रिणे । करत् । इत् । नः । सुऽराधसः ॥ १३ ॥ किं ।
ते । कृण्वंति । कीकटेषु । गावः । न । आऽशिरं । दुह्रे । न । तपंति । घर्मं । आ ।
नः । भर । प्रऽमगंदस्य । वेदः । नैचाऽशाखं । मघऽवन् । रंधय । नः ॥ १४ ॥
ससर्परीः । अमतिं । बाधमाना । बृहत् । मिमाय । जमदग्निऽदत्ता । आ । सूर्यस्य ।
दुहिता । ततान । श्रवः । देवेषु । अमृतं । अजुर्यं ॥ १५ ॥ २१ ॥

ससर्परीरभरत्तूयमेभ्योऽधि श्रवः पाञ्चजन्यासु कृष्टिषु ।
सा पक्ष्या३नव्यमायुर्दधाना यां मे पलस्तिजमदग्नयो ददुः ॥ १६ ॥
स्थिरौ गावौ भवतां वीळुरक्षो मेषा वि वर्हि मा युगं वि शारि ।
इन्द्रः पातल्ये ददतां शरीतोरिष्टनेमे अभि नः सचस्व ॥ १७ ॥
बलं धेहि तनूषु नो बलमिन्द्रानळुत्सु नः ।
बलं तोकाय तनयाय जीवसे त्वं हि बलदा असि ॥ १८ ॥
अभि व्ययस्व खदिरस्य सारमोजो धेहि स्पन्दने शिंशपायाम् ।
अक्षं वीळो वीळित वीळयस्व मा यामादस्मादव जीहिपो नः ॥ १९ ॥
अयमस्मान्वनस्पतिर्मा च हा मा च रीरिषत् ।
स्वस्त्या गृहेभ्य आवसा आ विमोचनात् ॥ २० ॥ २२ ॥

ससर्परीः । अभरत् । तूयं । एभ्यः । अधि । श्रवः । पांचऽजन्यासु । कृष्टिषु । सा । पक्ष्या । नव्यं । आयुः । दधाना । यां । मे । पलस्तिऽजमदग्नयः । ददुः ॥ १६ ॥ स्थिरौ । गावौ । भवतां । वीळुः । अक्षः । मा । ईषा । वि । वर्हि । मा । युगं । वि । शारि । इंद्रः । पातल्ये३ इति । ददतां । शरीतोः । अरिष्टऽनेमे । अभि । नः । सचस्व ॥ १७ ॥ बलं । धेहि । तनूषु । नः । बलं । इंद्र । अनळुत्ऽसु । नः । बलं । तोकाय । तनयाय । जीवसे । त्वं । हि । बलऽदाः । असि ॥ १८ ॥ अभि । व्ययस्व । खदिरस्य । सारं । ओजः । धेहि । स्पंदने । शिंशपायां । अक्षं । वीळो इति । वीळित । वीळयस्व । मा । यामात् । अस्मात् । अव । जीहिपः । नः ॥ १९ ॥ अयं । अस्मान् । वनस्पतिः । मा । च । हाः । मा । च । रिरिषत् । स्वस्ति । आ । गृहेभ्यः । आ । अवऽसै । आ । विऽमोचनात् ॥ २० ॥ २२ ॥

इन्द्रोतिभिर्बहुलाभिर्नो अद्य यावच्छ्रेष्ठाभिर्मघवञ्छूर जिन्व ।
यो नो द्वेष्टयधरः सस्पदीष्ट यमु द्विष्मस्तमु प्राणो जहातु ॥ २१ ॥
परशुं चिद्वि तपति शिम्बलं चिद्वि वृश्चति ।
उखा चिदिन्द्र येषन्ती प्रयस्ता फेनमस्यति ॥ २२ ॥
न सायकस्य चिकिते जनासो लोधं नयन्ति पशु मन्यमानाः ।
नावाजिनं वाजिना हासयन्ति न गर्दभं पुरो अश्वान्नयन्ति ॥ २३ ॥
इम इन्द्र भरतस्य पुत्रा अपपित्वं चिकितुर्न प्रपित्वम् ।
हिन्वन्त्यश्वमरणं न नित्यं ज्यावाजं परि णयन्त्याजौ ॥ २४ ॥ २३ ॥ ४ ॥

इंद्र । ऊतिऽभिः । बहुलाभिः । नः । अद्य । यात्ऽश्रेष्ठाभिः । मघऽवन् । शूर । जिन्व । यः । नः । द्वेष्टि । अधरः । सः । पदीष्ट । यं । ऊं इति । द्विष्मः । तं । ऊं इति । प्राणः । जहातु ॥ २१ ॥ परशुं । चित् । वि । तपति । शिंबलं । चित् । वि । वृश्चति । उखा । चित् । इंद्र । येषंती । प्रऽयंस्ता । फेनं । अस्यति ॥ २२ ॥ न । सायकस्य । चिकिते । जनासः । लोधं । नयंति । पशुं । मन्यमानाः । न । अवाजिनं । वाजिना । हासयंति । न । गर्दभं । पुरः । अश्वात् । नयंति ॥ २३ ॥ इमे । इंद्र । भरतस्य । पुत्राः । अपऽपित्वं । चिकितुः । नः । प्रऽपित्वं । हिन्वंति । अश्वं । अरणं । न । नित्यं । ज्यांऽवाजं । परि । नयंति । आजौ ॥ २४ ॥ २३ ॥

॥ पंचमोऽनुवाकः ॥ ५ ॥

॥ ५४ ॥ ऋषिः-प्रजापतिः । देवता-विश्वेदेवाः । छन्दः-त्रिष्टुप् ॥

॥ ५४ ॥ इमं महे विदथ्याय शूषं शश्वत्कृत्व ईड्याय प्र जभ्रुः ।
शृणोतु नो दम्येभिरनीकैः शृणोत्वग्निर्दिव्यैरजस्रः ॥ १ ॥
महिं महे दिवे अर्चा पृथिव्यै कामो म इच्छञ्चरति प्रजानन् ।
ययोर्ह स्तोमे विदथेषु देवाः संपर्यवो मादयन्ते सचायोः ॥ २ ॥
युवोर्ऋतं रोदसी सत्यमस्तु महे षु णः सुविताय प्र भूतम् ।
इदं दिवे नमो अग्ने पृथिव्यै संपर्यामि प्रयसा यामि रत्नम् ॥ ३ ॥
उतो हि वां पूर्व्या आविविद्र ऋतावरी रोदसी सत्यवाचः ।
नरश्चिद्वां समिथे शूरसातौ ववन्दिरे पृथिवि वेविदानाः ॥ ४ ॥ २४ ॥

इमं । महे । विदथ्याय । शूषं । शश्वत् । कृत्वः । ईड्याय । प्र । जभ्रुः ।
शृणोतु । नः । दम्येभिः । अनीकैः । शृणोतु । अग्निः । दिव्यैः । अजस्रः ॥ १ ॥
महिं । महे । दिवे । अर्च । पृथिव्यै । कामः । मे । इच्छन् । चरति ।
प्रऽजानन् । ययोः । ह । स्तोमे । विदथेषु । देवाः । सपर्यवः । मादयन्ते । सचा ।
आयोः ॥ २ ॥ युवोः । ऋतं । रोदसी इति । सत्यं । अस्तु । महे । सु । नः ।
सुवितायं । प्र । भूतं । इदं । दिवे । नमः । अग्ने । पृथिव्यै । सपर्यामि । प्रयसा ।
यामि । रत्नं ॥ ३ ॥ उतो इति । हि । वां । पूर्व्याः । आऽविविद्रे । ऋतवरी
इत्यृतऽवरी । रोदसी इति । सत्यऽवाचः । नरः । चित् । वां । संऽइथे । शूरऽसातौ ।
ववंदिरे । पृथिवि । वेविदानाः ॥ ४ ॥

को अद्धा वेद क इह प्र वोचदेवाँ अच्छा पथ्या३ का समेति ।
दक्षं भ एषामवमा सदांसि परेषु या गुह्येषु व्रतेषु ॥ ५ ॥ २४ ॥
कविर्नृचक्षा अभि षीमचष्ट ऋतस्य योना विघृते मदन्ती ।
नाना चक्राते सदनं यथा वेः समानेन क्रतुना संविदाने ॥ ६ ॥
समान्या वियुते दूरेअंते ध्रुवे पदे तस्थतुर्जागरूके ।
उत स्वसारा युवती भवन्ती आदु ब्रुवाते मिथुनानि नाम ॥ ७ ॥
विश्वेदेते जनिमा सं विविक्तो महो देवान्बिभ्रती न व्यथेते ।
एजद्ध्रुवं पत्यते विश्वमेकं चरत्पतत्रि विषुणं वि जातम् ॥ ८ ॥
सना पुराणमध्येम्यारान्महः पितुर्जनितुर्जामि तन्नः ।
देवासो यत्र पनितार एवैरुरौ पथि व्युते तस्थुरन्तः ॥ ९ ॥

कः । अद्धा । वेद । कः । इह । प्र । वोचत् । देवान् । अच्छ । पथ्या । का । सं । एति । दक्षे । एषां । अवमा । सदांसि । परेषु । या । गुह्येषु । व्रतेषु ॥ ५ ॥ २४ ॥ कविः । नृऽचक्षाः । अभि । सीं । अचष्ट । ऋतस्य । योना । विऽघृते इति विऽघृते । मदंती इति । नाना । चक्राते इति । सदनं । यथा । वेः । समानेन । क्रतुना । संविदाने इति संऽविदाने ॥ ६ ॥ समान्या । वियुते इति विऽयुते । दूरेअंते इति दूरेऽअंते । ध्रुवे । पदे । तस्थतुः । जागरूके इति । उत । स्वसारा । युवती इति । भवंती इति । आत् । ऊं इति । ब्रुवाते इति । मिथुनानि । नाम ॥ ७ ॥ विश्वा । इत् । एते इति । जनिम । सं । विविक्तः । महः । देवान् । बिभ्रती इति । न । व्यथेते इति । एजत् । ध्रुवं । पत्यते । विश्वं । एकं । चरत् । पतत्रि । विषुणं । वि । जातं ॥ ८ ॥ सना । पुराणं । अधि । एमि । आरात् । महः । पितुः । जनितुः । जामि । तत् । नः । देवासः । यत्र । पनितारः । एवैः । उरौ । पथि । विऽयुते । तस्थुः । अंतरिति ॥ ९ ॥

इमं स्तोमं रोदसी प्र ब्रवीम्यृदूदराः शृणवन्नग्निजिह्वाः ।
मित्रः सम्राजो वरुणो युवान आदित्यासः कवयः पप्रथानाः ॥ १० ॥ २५ ॥
हिरण्यपाणिः सविता सुजिह्वस्त्रिरा दिवो विदथे पत्यमानः ।
देवेषु च सवितः श्लोकमश्रेरादस्मभ्यमा सुव सर्वतातिम् ॥ ११ ॥
सुकृत्सुपाणिः स्ववाँ ऋतावा देवस्त्वष्टावसे तानि नो धात्
पूषण्वन्तं ऋभवो मादयध्वमूर्ध्वग्रावाणो अध्वरमतष्ट ॥ १२ ॥
विष्णुरेथा मरुतः ऋष्टिमन्तो दिवो मर्या ऋतजाता अयासः ।
सरस्वती शृणवन्यज्ञियासो धातारयिं सहवीरं तुरासः ॥ १३ ॥
विष्णुं स्तोमासः पुरुदस्मकर्का भगस्येव कारिणो यामनि ग्मन् ।
उरुक्रमः ककुहो यस्य पूर्वीर्न मर्धन्ति युवतयो जनित्रीः ॥ १४ ॥

इमं । स्तोमं । रोदसी इति । प्र । ब्रवीमि । ऋदूदराः । शृणवन् । अग्निऽजिह्वाः ।
मित्रः । सम्ऽराजः । वरुणः । युवानः । आदित्यासः । कवयः । पप्रथानाः ॥१०॥२५॥
हिरण्यऽपाणिः । सविता । सुऽजिह्वः । त्रिः । आ । दिवः । विदथे । पत्यमानः ।
देवेषु । च । सवितरिति । श्लोकं । अश्रेः । आत् । अस्मभ्यं । आ । सुव ।
सर्वऽतातिं ॥ ११ ॥ सुऽकृत् । सुऽपाणिः । स्वऽवान् । ऋतऽवा । देवः । त्वष्टा ।
अवसे । तानि । नः । धात् । पूषण्ऽवंतः । ऋभवः । मादयध्वं । ऊर्ध्वऽग्रावानः ।
अध्वरं । अतष्ट ॥ १२ ॥ विष्णुऽइरथाः । मरुतः । ऋष्टिऽमंतः । दिवः । मर्याः ।
ऋतऽजाताः । अयासः । सरस्वती । शृणवन् । यज्ञियासः । धातः । रयिं । सहऽवीरं ।
तुरासः ॥ १३ ॥ विष्णुं । स्तोमासः । पुरुऽदस्मं । अर्काः । भगस्यऽइव । कारिणः ।
यामनि । ग्मन् । उरुऽक्रमः । ककुदः । यस्य । पूर्वीः । न । मर्धंति । युवतयः ।
जनित्रीः ॥ १४ ॥

इन्द्रो विश्वैर्वीर्यैः पत्यमान उभे आ पप्रौ रोदसी महित्वा ।
पुरंदरो वृत्रहा धृष्णुषेणः सद्यृभ्यां न आ भरा भूरिं पश्वः ॥ १५ ॥ २६ ॥
नासत्या मे पितरा बन्धुपृच्छा सजात्यमश्विनोहचारु नाम ।
युवं हि स्थो रयिदौ नो रयीणां दात्रं रक्षेथे अकवैरदब्धा ॥ १६ ॥
महत्तदः कवयश्चारु नाम यद्ध देवा भवथ विश्व इन्द्रे ।
सख्ं ऋभुभिः पुरुहूत प्रियेभिरिमां धियं सातये तक्षता नः ॥ १७ ॥
अर्यमा णो अदितिर्यज्ञियासोऽदब्धानि वरुणस्य व्रतानि ।
युयोत नो अनपत्यानि गन्तोः प्रजावान्नः पशुमाँ अस्तु गातुः ॥ १८ ॥
देवानां दूतः पुरुध प्रसूतोऽनागान्नो वोचतु सर्वतातां ।
शृणोतु नः पृथिवी द्यौरुतापः सूर्यो नक्षत्रैरुर्वन्तरिक्षम् ॥ १९ ॥

इंद्रः । विश्वैः । वीर्यैः । पत्यमानः । उभे इति । आ । पप्रौ । रोदसी इति । महित्वा । पुरंऽदरः । वृत्रऽहा । धृष्णुऽसेनः । सद्यृभ्यं । नः । आ । भर । भूरिं । पश्वः ॥ १५ ॥ २६ ॥ नासत्या । मे । पितरा । बंधुऽपृच्छा । सऽजात्यं । अश्विनोः । चारु । नाम । युवं । हि । स्थः । रयिऽदौ । नः । रयीनां । दात्रं । रक्षेथे इति । अकवैः । अदब्धा ॥ १६ ॥ महत् । तत् । वः । कवयः । चारु । नाम । यत् । ह । देवाः । भवथ । विश्वे । इंद्रे । सखा । ऋभुऽभिः । पुरुऽहूत । प्रियेभिः । इमां । धियं । सातये । तक्षत । नः ॥ १७ ॥ अर्यमा । नः । अदितिः । यज्ञियासः । अदब्धानि । वरुणस्य । व्रतानि । युयोत । नः । अनपत्यानि । गंतोः । प्रजाऽवान् । नः । पशुऽमान् । अस्तु । गातुः ॥ १८ ॥ देवानां । दूतः । पुरुध । प्रऽसूतः । अनागान् । नः । वोचतु । सर्वऽतातां । शृणोतु । नः । पृथिवी । द्यौः । उत । आपः । सूर्यः । नक्षत्रैः । उरु । अंतरिक्षं ॥ १९ ॥

शृण्वन्तु नो वृषणः पर्वतासो ध्रुवक्षेमास इळया मदन्तः ।
आदित्यैर्नो अदितिः शृणोतु यच्छन्तु नो मरुतः शर्म भद्रम् ॥ २० ॥
सदा सुगः पितुमाँ अस्तु पन्था मध्वा देवा ओषधीः सं पिपृक्त ।
भगो मे अग्ने सख्ये न मृध्या उद्रायो अश्यां सदनं पुरुक्षोः ॥ २१ ॥
स्वदस्व हव्या समिषो दिदीह्यस्मद्र्यक्सं मिमीहि श्रवांसि ।
विश्वाँ अग्ने पृत्सु ताञ्जेषि शत्रूनहा विश्वा सुमना दीदिही नः ॥२२॥२७॥

॥ ५५ ॥ ऋषिः—प्रजापतिः । देवता—विश्वेदेवाः । छन्दः—त्रिष्टुप् ॥

॥ ५५ ॥ उषसः पूर्वा अध यद्व्युष्टिष्वहद्रि जज्ञे अक्षरं पदे गोः ।
व्रता देवानामुप नु प्रभूषन्महद्देवानामसुरत्वमेकम् ॥ १ ॥
मो षू णो अत्र जुहुरन्त देवा मा पूर्वे अग्ने पितरः पदज्ञाः ।
पुराण्योः सद्मनोः केतुरन्तर्महद्देवानामसुरत्वमेकम् ॥ २ ॥

शृण्वंतु । नः । वृषणः । पर्वतासः । ध्रुवऽक्षेमासः । इळया । मदंतः । आदित्यैः । नः । अदितिः । शृणोतु । यच्छंतु । नः । मरुतः । शर्म । भद्रं ॥ २० ॥ सदा । सुऽगः । पितुऽमान् । अस्तु । पंथाः । मध्वा । देवाः । ओषधीः । सं । पिपृक्त । भगः । मे । अग्ने । सख्ये । न । मृध्याः । उत् । रायः । अश्यां । सदनं । पुरुऽक्षोः ॥ २१ ॥ स्वदस्व । हव्या । सं । इषः । दिदीहि । अस्मत्ऽयक् । सं । मिमीहि । श्रवांसि । विश्वान् । अग्ने । पृतऽसु । तान् । जेषि । शत्रून् । अहा । विश्वा । सुऽमनाः । दीदिहि । नः ॥ २२ ॥ २७ ॥

उषसः । पूर्वाः । अध । यत् । विऽऊषुः । महत् । वि । जज्ञे । अक्षरं । पदे । गोः । व्रता । देवानां । उप । नु । प्रऽभूषन् । महत् । देवानां । असुरऽत्वं । एकं ॥ १ ॥ मो इति । सु । नः । अत्र । जुहुरंत । देवाः । मा । पूर्वे । अग्ने । पितरः । पदऽज्ञाः । पुराण्योः । सद्मनोः । केतुः । अंतः । महत् । देवानां । असुरऽत्वं । एकं ॥ २ ॥

वि मे पुरुत्रा पतयन्ति कामाः शम्यच्छा दीध्ये पूर्व्याणि ।
सामिद्धे अग्नावृतमिद्वदेम महद्देवानामसुरत्वमेकम् ॥ ३ ॥
समानो राजा विभृतः पुरुत्रा शये शयासु प्रयुतो वनानु ।
अन्या वत्सं भरति क्षेति माता महद्देवानामसुरत्वमेकम् ॥ ४ ॥
आक्षित्पूर्वास्वपरा अनूरुत्सद्यो जातासु तरुणीष्वन्तः ।
अन्तर्वतीः सुवते अप्रवीता महद्देवानामसुरत्वमेकम् ॥ ५ ॥ २८ ॥
शयुः परस्तादध नु द्विमातार्वन्धनश्चरति वत्स एकः ।
मित्रस्य ता वरुणस्य व्रतानि महद्देवानामसुरत्वमेकम् ॥ ६ ॥
द्विमाता होता विदथेषु सम्राळन्वग्रं चरति क्षेति बुध्नः ।
प्र रण्यानि रण्यवाचो भरन्ते महद्देवानामसुरत्वमेकम् ॥ ७ ॥

वि । मे । पुरुऽत्रा । पतयंति । कामाः । शमि । अच्छ । दीध्ये । पूर्व्याणि ।
सम्ऽइद्धे । अग्नौ । ऋतं । इत् । वदेम । महत् । देवानां । असुरऽत्वं । एकं ॥ ३ ॥
समानः । राजा । विऽभृतः । पुरुऽत्रा । शये । शयासु । प्रऽयुतः । वना । अनु ।
अन्या । वत्सं । भरति । क्षेति । माता । महत् । देवानां । असुरऽत्वं । एकं । ॥ ४ ॥
आऽक्षित् । पूर्वासु । अपराः । अनूरुत् । सद्यः । जातासु । तरुणीषु । अंतरिति ।
अंतःऽवतीः । सुवते । अप्रऽवीताः । महत । देवानां । असुरऽत्वं । एकं ॥ ५ ॥ २८ ॥
शयुः । परस्तात् । अध । नु । द्विऽमाता । अवंधनः । चरति । वत्सः । एकः ।
मित्रस्य । ता । वरुणस्य । व्रतानि । महत् । देवानां । असुरऽत्वं । एकं ॥ ६ ॥
द्विऽमाता । होता । विदथेषु । सम्ऽराट् । अनु । अग्रं । चरति । क्षेति । बुध्नः । प्र ।
रण्यानि । रण्यऽवाचः । भरंते । महत् । देवानां । असुरऽत्वं । एकं ॥ ७ ॥

शूरस्येव युध्यतो अन्तमस्य प्रतीचीनं ददृशे विश्वमायत् ।
अन्तर्मतिश्चरति निष्षिधं गोर्महद्देवानामसुरत्वमेकम् ॥ ८ ॥
नि वेवेति पलितो दूत आसु अन्तर्महाँश्चरति रोचनेन ।
वपूंषि बिभ्रदभि नो वि चष्टे महद्देवानामसुरत्वमेकम् ॥ ९ ॥
विष्णुर्गोपाः परमं पाति पाथः प्रिया धामान्यमृता दधानः ।
अग्निष्टा विश्वा भुवनानि वेद महद्देवानामसुरत्वमेकम् ॥ १० ॥ २९ ॥
नाना चक्राते यम्या३वपूंषि तयोरन्यद्रोचते कृष्णमन्यत् ।
श्यावी च यदरुषी च स्वसारौ महद्देवानामसुरत्वमेकम् ॥ ११ ॥
माता च यत्र दुहिता च धेनू सबर्दुघे धापयेते समीची ।
ऋतस्य ते सदसीळे अन्तर्महद्देवानामसुरत्वमेकम् ॥ १२ ॥

शूरस्यऽइव । युध्यतः । अंतमस्य । प्रतीचीनं । ददृशे । विश्वं । आऽयत् । अंतः । मतिः । चरति । निःऽसिधं । गोः । महत् । देवानां । असुरऽत्वं । एकं ॥ ८ ॥ नि । वेवेति । पलितः । दूतः । आसु । अंतः । महान् । चरति । रोचनेन । वपूंषि । बिभ्रत् । अभि । नः । वि । चष्टे । महत् । देवानां । असुरऽत्वं । एकं ॥ ९ ॥ विष्णुः । गोपाः । परमं । पाति । पाथः । प्रिया । धामानि । अमृता । दधानः । अग्निः । ता । विश्वा । भुवनानि । वेद । महत् । देवानां । असुरऽत्वं । एकं ॥ १० ॥ २९ ॥ नाना । चक्राते इति । यम्या । वपूंषि । तयोः । अन्यत् । रोचते । कृष्णं । अन्यत् । श्यावी । च । यत् । अरुषी । च । स्वसारौ । महत् । देवानां । असुरऽत्वं । एकं ॥ ११ ॥ माता । च । यत्र । दुहिता । च । धेनू इति । सबर्दुघे इति सबःऽदुघे । धापयेते इति । समीची इति संऽईची । ऋतस्य । ते इति । सदसि । ईळे । अंतः । महत् । देवानां । असुरऽत्वं । एकं ॥ १२ ॥

अन्यस्या वत्सं रिहती मिमाय कया भुवा नि दधे धेनुरूधः ।
ऋतस्य सा पयसापिन्वतेळा महद्देवानामसुरत्वमेकम् ॥ १३ ॥
पद्या वस्ते पुरुरूपा वपूंष्यूर्ध्वा तस्थौ त्र्यविं रेरिहाणा ।
ऋतस्य सद्म वि चरामि विद्वान्महद्देवानामसुरत्वमेकम् ॥ १४ ॥
पदे इव निहिते दस्मे अन्तस्तयोरन्यदुप आविरन्यत् ।
सध्रीचीना पथ्या सा विषूची महद्देवानामसुरत्वमेकम् ॥ १५ ॥ ३० ॥
आ धेनवो धुनयन्तामशिश्वीः सबर्दुघाः शशया अप्रदुग्धाः ।
नव्या नव्या युवतयो भवन्तीर्महद्देवानामसुरत्वमेकम् ॥ १६ ॥
यदन्यासु वृषभो रोरवीति सो अन्यस्मिन्यूथे नि दधाति रेतः ।
स हि क्षपावान्त्स भगः स राजा महद्देवानामसुरत्वमेकम् ॥ १७ ॥

अन्यस्याः । वत्सं । रिहती । मिमाय । कया । भुवा । नि । दधे । धेनुः । ऊधः ।
ऋतस्य । सा । पयसा । अपिन्वत । इळा । महत् । देवानां । असुरऽत्वं । एकं ॥ १३ ॥
पद्या । वस्ते । पुरुऽरूपा । वपूंषि । ऊर्ध्वा । तस्थौ । त्रिऽअविं । रेरिहाणा ।
ऋतस्य । सद्म । वि । चरामि । विद्वान् । महत् । देवानां । असुरऽत्वं । एकं ॥ १४ ॥
पदे इवेति पदेऽइव । निहिते इति निऽहिते । दस्मे । अंतरिति । तयोः । अन्यत् ।
गुह्यं । आविः । अन्यत् । सध्रीचीना । पथ्या । सा । विषूची । महत् । देवानां ।
असुरऽत्वं । एकं ॥ १५ ॥ ३० ॥ आ । धेनवः । धुनयंतां । अशिश्वीः ।
सबःऽदुघाः । शशयाः । अप्रऽदुग्धाः । नव्याःऽनव्याः । युवतयः । भवंतीः । महत् ।
देवानां । असुरऽत्वं । एकं ॥ १६ ॥ यत् । अन्यासु । वृषभः । रोरवीति । सः ।
अन्यस्मिन् । यूथे । नि । दधाति । रेतः । सः । हि । क्षपाऽवान् । सः । भगः । सः ।
राजा । महत् । देवानां । असुरऽत्वं । एकं ॥ १७ ॥

वीरस्य नु स्वश्व्यं जनासः प्र नु वोचाम विदुरस्य देवाः ।
षोळ्हा युक्ताः पञ्चपञ्चा वहन्ति महद्देवानामसुरत्वमेकम् ॥ १८ ॥
देवस्त्वष्टा सविता विश्वरूपः पुपोष प्रजाः पुरुधा जजान ।
इमा च विश्वा भुवनान्यस्य महद्देवानामसुरत्वमेकम् ॥ १९ ॥
मही समैरच्चम्वा समीची उभे ते अस्य वसुना न्यृष्टे ।
शृण्वे वीरो विन्दमानो वसूनि महद्देवानामसुरत्वमेकम् २०
इमां च नः पृथिवीं विश्वधायां उपं क्षेति हितमित्रो न राजा ।
पुरःसदः शर्मसदो न वीरा महद्देवानामसुरत्वमेकम् ॥ २१ ॥
निष्षिध्वरीस्त ओषधीरुतापो रयिं त इन्द्र पृथिवी बिभर्ति ।
सखायस्ते वामभाजः स्याम महद्देवानामसुरत्वमेकम् ॥ २२ ॥ ३१ ॥ ३ ॥

वीरस्य । नु । सुऽअश्व्यं । जनासः । प्र । नु । वोचाम । विदुः । अस्य । देवाः ।
षोळ्हा । युक्ताः । पंचऽपंच । आ । वहंति । महत् । देवानां । असुरऽत्वं ।
एकं ॥ १८ ॥ देवः । त्वष्टा । सविता । विश्वऽरूपः । पुपोष । प्रऽजाः । पुरुधा ।
जजान । इमा । च । विश्वा । भुवनानि । अस्य । महत् । देवानां । असुरऽत्वं ।
एकं ॥ १९ ॥ मही इति । सं । ऐरत् । चम्वा । समीची इति संऽईची । उभे इति ।
ते इति । अस्य । वसुना । न्यृष्टे इति निऽऋष्टे । शृण्वे । वीरः । विंदमानः । वसूनि ।
महत् । देवानां । असुरऽत्वं । एकं ॥ २० ॥ इमां । च । नः । पृथिवीं ।
विश्वऽधायाः । उप । क्षेति । हितऽमित्रः । न । राजा । पुरःऽसदः । शर्मऽसदः ।
न । वीराः । महत् । देवानां । असुरऽत्वं । एकं ॥ २१ ॥ निःऽसिध्वरीः । ते ।
ओषधीः । उत । आपः । रयिं । ते । इंद्र । पृथिवी । बिभर्ति । सखायः । ते ।
वामऽभाजः । स्याम । महत् । देवानां । असुरऽत्वं । एकं ॥ २२ ॥ ३१ ॥

॥ इति तृतीयाष्टके तृतीयोऽध्यायः ॥ ३ ॥

॥ अथ तृतीयाष्टके चतुर्थोऽध्यायः ॥ ४ ॥

॥ ५६ ॥ ऋषिः-प्रजापतिः । देवता-विश्वेदेवाः । छन्दः- त्रिष्टुप् ॥

॥ ५६ ॥ न ता मिनन्ति मायिनो न धीरा व्रता देवानाँ प्रथमा ध्रुवाणि ।
न रोदसी अदुहा वेद्याभिर्न पर्वता निनमे तस्थिवांसः ॥ १ ॥
षड्गवाँ एको अचरन्बिभर्तृतं वषिष्ठमुप गाव आगुः ।
तिस्रो महीरुपरास्तस्थुरत्या गुहा द्वे निहिते दर्श्येका ॥ २ ॥
त्रिपाजस्यो वृषभो विश्वरूप उत त्र्युधा पुरुध प्रजावान् ।
त्र्यनीकः पत्यते माहिनावान्त्स रेतोधा वृषभः शश्वतीनाम् ॥ ३ ॥
अभीक आसां पदवीरबोध्यादित्यानामहे चारु नाम ।
आर्पश्चिदस्मा अरमन्त देवीः पृथग्व्रजन्तीः परि षीमवृञ्जन् ॥ ४ ॥

॥ अथ तृतीयाष्टके चतुर्थोऽध्यायः ॥ ४ ॥

न । ता । मिनंति । मायिनः । न । धीराः । व्रता । देवानाँ । प्रथमा । ध्रुवाणि । न । रोदसी इति । अदुहा । वेद्याभिः । न । पर्वताः । निऽनमे । तस्थिऽवांसः ॥ १ ॥ षट् । भारान् । एकः । अचरन् । बिभर्ति । ऋतं । वषिष्ठं । उप । गावः । आ । अगुः । तिस्रः । महीः । उपराः । तस्थुः । अत्याः । गुहा । द्वे इति । निहिते इति निऽहिते । दर्शि । एका ॥ २ ॥ त्रिऽपाजस्यः । वृषभः । विश्वऽरूपः । उत । त्रिऽउधा । पुरुध । प्रजाऽवान् । त्रिऽअनीकः । पत्यते । माहिनऽवान् । सः । रेतःऽधाः । वृषभः । शश्वतीनां ॥ ३ ॥ अभीके । आसां । पदऽवीः । अबोधि । आदित्यानां । अहे । चारु । नाम । आर्पः । चित् । अस्मै । अरमंत । देवीः । पृथक् । व्रजंतीः । परि । सीं । अवृंजन् ॥ ४ ॥

ओ षधस्था सिन्धवस्त्रिः कवीनामुत त्रिमाता विदथेषु सम्राट् ।
ऋतावरीर्योषणास्तिस्रो अप्यास्त्रिरा दिवो विदथे पत्यमानाः ॥ ५ ॥
त्रिरा दिवः सवितर्वार्याणि दिवेदिव आ सुव त्रिर्नो अह्नः ।
त्रिधातु राय आ सुवा वसूनि भगं त्रातर्धिषणे सातये धाः ॥ ६ ॥
त्रिरा दिवः सविता सोमवीति राजाना मित्रावरुणा सुपाणी ।
आपश्चिदस्य रोदसी चिदुर्वी रत्नं भिक्षन्त सवितुः सवाय ॥ ७ ॥
त्रिरुत्तमा दुष्णशा रोचनानि त्रयो राजन्त्यसुरस्य वीराः ।
ऋतावान इषिरा दूळभासस्त्रिरा दिवो विदथे सन्तु देवाः ॥ ८ ॥ १ ॥

ओ । सधऽस्थाः । सिंधवः । त्रिः । कवीनां । उत । त्रिऽमाता । विदथेषु । सम्ऽराट् ।
ऋतऽवरीः । योषणाः । तिस्रः । अप्याः । त्रिः । आ । दिवः । विदथे ।
पत्यमानाः ॥ ५ ॥ त्रिः । आ । दिवः । सवितः । वार्याणि । दिवेऽदिवे । आ ।
सुव । त्रिः । नः । अह्नः । त्रिऽधातु । रायः । आ । सुव । वसूनि । भगं ।
त्रातः । धिषणे । सातये । धाः ॥ ६ ॥ त्रिः । आ । दिवः । सविता ।
सोमवीति । राजाना । मित्रावरुणा । सुपाणी इति सुऽपाणी । आपः । चित् ।
अस्य । रोदसी इति । चित् । उर्वी इति । रत्नं । भिक्षंत । सवितुः । सवाय ॥ ७ ॥
त्रिः । उत्ऽतमा । दुष्ऽनशा । रोचनानि । त्रयः । राजंति । असुरस्य । वीराः ।
ऋतऽवानः । इषिराः । दुःऽदभासः । त्रिः । आ । दिवः । विदथे । संतु । देवाः ॥८॥१॥

॥ ५७ ॥ ऋषिः-विश्वामित्रः । देवता-विश्वेदेवाः । छन्दः-त्रिष्टुप् ॥

॥ ५७ ॥ प्र मे विविक्वाँ अविदन्मनीषां धेनुं चरन्तीं प्रयुतामगोपाम् ।
सद्यश्चिया दुदुहे भूरि धासेरिन्द्रस्तदग्निः पनितारो अस्याः ॥ १ ॥
इन्द्रः सु पूषा वृषणा सुहस्ता दिवो न प्रीताः शशयं दुदुह्रे ।
विश्वे यदस्यां रणयन्त देवाः प्र वोऽत्र वसवः सुम्नमश्याम् ॥ २ ॥
या जामयो वृष्णं इच्छन्ति शक्तिं नमस्यन्तीर्जानते गर्भमस्मिन् ।
अच्छा पुत्रं धेनवो वावशाना महश्चरन्ति बिभ्रतं वपूंषि ॥ ३ ॥
अच्छा विवक्मि रोदसी सुमेके आव्यो युजानो अध्वरे मनीषा ।
इमा उ ते मनवे भूरिवारा ऊर्ध्वा भवन्ति दर्शता यजत्राः ॥ ४ ॥

प्र । मे । विविक्वान् । अविदत् । मनीषां । धेनुं । चरंतीं । प्रऽयुतां । अगोपां । सद्यः । चित् । या । दुदुहे । भूरि । धासेः । इंद्रः । तत् । अग्निः । पनितारः । अस्याः ॥ १ ॥ इंद्रः । सु । पूषा । वृषणा । सुऽहस्ता । दिवः । न । प्रीताः । शशयं । दुदुह्रे । विश्वे । यत् । अस्यां । रणयंत । देवाः । प्र । वः । अत्र । वसवः । सुम्नं । अश्यां ॥ २ ॥ याः । जामयः । वृष्णे । इच्छंति । शक्ति । नमस्यंतीः । जानते । गर्भं । अस्मिन् । अच्छ । पुत्रं । धेनवः । वावशानाः । महः । चरंति । बिभ्रतं । वपूंषि ॥ ३ ॥ अच्छ । विवक्मि । रोदसी इति । सुमेके इति सुऽमेके । आव्यः । युजानः । अध्वरे । मनीषा । इमाः । ऊं इति । ते । मनवे । भूरिऽवाराः । ऊर्ध्वाः । भवंति । दर्शताः । यजत्राः ॥ ४ ॥

या ते जिह्वा मधुमती सुमेधा अग्ने देवेष्वुच्यते ऊर्ची ।
तयेह विश्वाँ अवसे यजत्राना सादय पायया च मधूनि ॥ ५ ॥
या ते अग्ने पर्वतस्येव धारासश्चन्ती पीपयदेव चित्रा ।
तामस्मभ्यं प्रमतिं जातवेदो वसो रास्व सुमतिं विश्वजन्याम् ॥ ६ ॥ २ ॥

॥ ५८ ॥ ऋषिः-विश्वामित्रः । देवता-अश्विनौ । छन्दः-त्रिष्टुप् ॥

॥ ५८ ॥ धेनुः प्रत्नस्य काम्यं दुहानान्तः पुत्रश्चरति दक्षिणायाः ।
आ द्योतनि वहति शुभ्रयामोषसः स्तोमो अश्विनावजीगः ॥ १ ॥
सुयुग्वहन्ति प्रति वामृतेनोर्ध्वा भवन्ति पितरेव मेधाः ।
जरेथामस्मद्रि पणेर्मनीषां युवोरवश्चकृमा यातमर्वाक् ॥ २ ॥

या । ते । जिह्वा । मधुऽमती । सुऽमेधाः । अग्ने । देवेषु । उच्यते । ऊर्ची । तया । इह । विश्वान् । अवसे । यजत्रान् । आ । सादय । पायय । च । मधूनि ॥ ५ ॥
या । ते । अग्ने । पर्वतस्यऽइव । धारा । असश्चंती । पीपयत् । देव । चित्रा । ताम् । अस्मभ्यं । प्रऽमतिं । जातऽवेदः । वसो इति । रास्व । सुऽमतिं । विश्वऽजन्याम् ॥६॥२॥

धेनुः । प्रत्नस्य । काम्यं । दुहाना । अंतरिति । पुत्रः । चरति । दक्षिणायाः । आ । द्योतनि । वहति । शुभ्रऽयामा । उषसः । स्तोमः । अश्विनौ । अजीगरिति ॥ १ ॥ सुऽयुक् । वहंति । प्रति । वां । ऋतेन । ऊर्ध्वाः । भवंति । पितराऽइव । मेधाः । जरेथां । अस्मत् । वि । पणेः । मनीषां । युवोः । अवः । चकृम । आ । यातं । अर्वाक् ॥ २ ॥

सुयुग्भिरश्वैः सुकृता रथेन दस्राविमं शृणुतं श्लोकमद्रेः ।
किमङ्ग वां प्रत्यवर्तिं गमिष्ठाहुर्विप्रासो अश्विना पुराजाः ॥ ३ ॥
आ मन्येथामा गतं कच्चिदेवैर्विश्वे जनासो अश्विना हवन्ते ।
इमा हि वां गोऋजीका मधूनि प्र मित्रासो न ददुरुस्रो अग्रे ॥ ४ ॥
तिरः पुरू चिदश्विना रजांस्याङ्गूषो वां मघवाना जनेषु ।
एह यातं पथिभिर्देवयानैर्दस्राविमे वां निधयो मधूनाम् ॥ ५ ॥ ३ ॥
पुराणमोकः सख्यं शिवं वां युवोर्नरा द्रविणं जह्नाव्यम् ।
पुनः कृण्वानाः सख्या शिवानि मध्वा मदेम सह नू समानाः ॥ ६ ॥

सुयुक्ऽभिः । अश्वैः । सुऽकृता । रथेन । दस्रौ । इमं । शृणुतं । श्लोकं । अद्रेः । किं । अंग । वां । प्रति । अवर्तिं । गमिष्ठा । आहुः । विप्रासः । अश्विना । पुराऽजाः ॥ ३ ॥ आ । मन्येथां । आ । गतं । कत् । चित् । एवैः । विश्वे । जनासः । अश्विना । हवंते । इमा । हि । वां । गोऽऋजीका । मधूनि । प्र । मित्रासः । न । ददुः । उस्रः । अग्रे ॥ ४ ॥ तिरः । पुरु । चित् । अश्विना । रजांसि । आंगूषः । वां । मघऽवाना । जनेषु । आ । इह । यातं । पथिऽभिः । देवऽयानैः । दस्रौ । इमे । वां । निऽधयः । मधूनां ॥ ५ ॥ ३ ॥ पुराणं । ओकः । सख्यं । शिवं । वां । युवोः । नरा । द्राविणं । जह्नाव्यां । पुनरिति । कृण्वानाः । सख्या । शिवानि । मध्वा । मदेम । सह । नु । समानाः ॥ ६ ॥

अश्विना वायुना युवं सुदक्षा नियुद्भिश्च सजोषसा युवाना ।
नासत्या तिरोअह्न्यं जुषाणा सोमं पिबतमस्रिधा सुदानू ॥ ७ ॥
अश्विना परि वामिषः पुरूचीरीयुर्गीर्भिर्यतमाना अमृध्राः ।
रथो ह वामृतजा अद्रिजूतः परि द्यावापृथिवी याति सद्यः ॥ ८ ॥
अश्विना मधुमत्तमो युवाकुः सोमस्तं पातमा गतं दुरोणे ।
रथो ह वां भूरि वर्पः करिक्रत्सुतावतो निष्कृतमागमिष्ठः ॥ ९ ॥ ४ ॥

॥ ५९ ॥ ऋषिः—विश्वामित्रः । देवता—मित्रः । छन्दः—त्रिष्टुप् ॥

॥ ५९ ॥ मित्रो जनान्यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम् ।
मित्रः कृष्टीरनिमिषाभि चष्टे मित्राय हव्यं घृतवज्जुहोत ॥ १ ॥

अश्विना । वायुना । युवं । सुऽदक्षा । नियुत्ऽभिः । च । सऽजोषसा । युवाना ।
नासत्या । तिरःऽअह्न्यं । जुषाणा । सोमं । पिबतं । अस्रिधा । सुदानू इति सुऽदानू ॥७॥
अश्विना । परि । वां । इषः । पुरूचीः । ईयुः । गीःऽभिः । यतमानाः । अमृध्राः ।
रथः । ह । वां । ऋतऽजाः । अद्रिऽजूतः । परि । द्यावापृथिवी इति ।
याति । सद्यः ॥ ८ ॥ अश्विना । मधुमत्ऽतमः । युवाकुः । सोमः । तं । पातं ।
आ । गतं । दुरोणे । रथः । ह । वां । भूरि । वर्पः । करिक्रत् । सुतऽवतः ।
निःऽकृतं । आऽगमिष्ठः ॥ ९ ॥ ४ ॥

मित्रः । जनान् । यातयति । ब्रुवाणः । मित्रः । दाधार । पृथिवीं । उत ।
द्यां । मित्रः । कृष्टीः । अनिऽमिषा । अभि । चष्टे । मित्राय । हव्यं ।
घृतऽवत् । जुहोत ॥ १ ॥

प्र स मित्र मर्तो अस्तु प्रयस्वान्यस्त आदित्य शिक्षति व्रतेन ।
न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात् ॥ २ ॥
अनमीवास इळया मदन्तो मितज्ञवो वरिमन्ना पृथिव्याः ।
आदित्यस्य व्रतमुपक्षियन्तो वयं मित्रस्य सुमतौ स्याम ॥ ३ ॥
अयं मित्रो नमस्यः सुशेवो राजा सुक्षत्रो अजनिष्ट वेधाः ।
तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ॥ ४ ॥
महाँ आदित्यो नमसोपसद्यो यातयज्जनो गृणते सुशेवः ।
तस्मा एतत्पन्यतमाय जुष्टमग्नौ मित्राय हविरा जुहोत ॥ ५ ॥ ५ ॥
मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि ।
द्युम्नं चित्रश्रवस्तमम् ॥ ६ ॥

प्र । सः । मित्र । मर्तः । अस्तु । प्रयस्वान् । यः । ते । आदित्य । शिक्षति । व्रतेन । न । हन्यते । न । जीयते । त्वाऽऊतः । न । एनं । अंहः । अश्नोति । अंतितः । न । दूरात् ॥ २ ॥ अनमीवासः । इळया । मदंतः । मितऽज्ञवः । वरिमन् । आ । पृथिव्याः । आदित्यस्य । व्रतं । उपऽक्षियंतः । वयं । मित्रस्य । सुऽमतौ । स्याम ॥ ३ ॥ अयं । मित्रः । नमस्यः । सुऽशेवः । राजा । सुऽक्षत्रः । अजनिष्ट । वेधाः । तस्य । वयं । सुऽमतौ । यज्ञियस्य । अपि । भद्रे । सौमनसे । स्याम ॥ ४ ॥ महान् । आदित्यः । नमसा । उपऽसद्यः । यातयत्ऽजनः । गृणते । सुऽशेवः । तस्मै । एतत् । पन्यंऽतमाय । जुष्टं । अग्नौ । मित्राय । हविः । आ । जुहोत ॥ ५ ॥ ५ ॥ मित्रस्य । चर्षणिऽधृतः । अवः । देवस्य । सानसि । द्युम्नं । चित्रश्रवःऽतमं ॥ ६ ॥

अभि यो महिना दिवं मित्रो बभूव सप्रथाः ।
अभि श्रवोभिः पृथिवीम् ॥ ७ ॥
मित्राय पञ्च येमिरे जना अभिष्टिशवसे ।
स देवान्विश्वान्बिभर्ति ॥ ८ ॥
मित्रो देवेष्वायुषु जनाय वृक्तबर्हिषे ।
इषं इष्टव्रता अकः ॥ ९ ॥ ६ ॥

॥ ६० ॥ ऋषिः—विश्वामित्रः । देवता—ऋभवः । छन्दः—जगती ॥

॥ ६० ॥ इहेह वो मनसा बन्धुता नर उशिजो जग्मुरभि तानि वेदसा ।
याभिर्मायाभिः प्रतिजूतिवर्पसः सौधन्वना यज्ञियं भागमानश ॥ १ ॥
याभिः शचीभिश्चमसाँ अपिंशत यया धिया गामरिणीत चर्मणः ।
येन हरी मनसा निरतक्षत तेन देवत्वमृभवः समानश ॥ २ ॥

अभि । यः । महिना । दिवं । मित्रः । बभूव । सऽप्रथाः । अभि । श्रवःऽभिः । पृथिवीं ॥ ७ ॥ मित्राय । पंच । येमिरे । जनाः । अभिष्टिऽशवसे । सः । देवान् । विश्वान् । बिभर्ति ॥ ८ ॥ मित्रः । देवेषु । आयुषु । जनाय । वृक्तऽबर्हिषे । इषः । इष्टऽव्रताः । अकरित्यकः ॥ ९ ॥ ६ ॥

इहऽइह । वः । मनसा । बंधुता । नरः । उशिजः । जग्मुः । अभि । तानि । वेदसा । याभिः । मायाभिः । प्रतिजूतिऽवर्पसः । सौधन्वनाः । यज्ञियं । भागं । आनश ॥ १ ॥ याभिः । शचीभिः । चमसान् । अपिंशत । यया । धिया । गां । अरिणीत । चर्मणः । येन । हरी इति । मनसा । निःऽअतक्षत । तेन । देवऽत्वं । ऋभवः । सं । आनश ॥ २ ॥

इन्द्रस्य सख्यमृभवः समानशुर्नप्तोर्नपातो अपसो दधन्विरे ।
सौधन्वनासो अमृतत्वमेरिरे विष्वी शमीभिः सुकृतः सुकृत्यया ॥ ३ ॥
इन्द्रेण याथ सरथं सुते सचाँ अथो वशानां भवथा सह श्रिया ।
न वः प्रतिमै सुकृतानि वाघतः सौधन्वना ऋभवो वीर्याणि च ॥ ४ ॥
इन्द्र ऋभुभिर्वाजवद्भिः समुक्षितं सुतं सोमं आ वृषस्वा गभस्त्योः ।
धियेषितो मघवन्दाशुषो गृहे सौधन्वनेभिः सह मत्स्वा नृभिः ॥ ५ ॥
इन्द्र ऋभुमान्वाजवान्मत्स्वेह नोऽस्मिन्त्सवने शच्या पुरुष्टुत ।
इमानि तुभ्यं स्वसराणि येमिरे व्रता देवानां मनुषश्च धर्मभिः ॥ ६ ॥

इंद्रस्य । सख्यं । ऋभवः । सं । आनशुः । नप्तोः । नपातः । अपसः । दधन्विरे ।
सौधन्वनासः । अमृतऽत्वं । आ । ईरिरे । विष्वी । शमीभिः । सुऽकृतः ।
सुऽकृत्यया ॥ ३ ॥ इंद्रेण । याथ । सऽरथं । सुते । सचा । अथो इति । वशानां ।
भवथ । सह । श्रिया । न । वः । प्रतिऽमै । सुऽकृतानि । वाघतः । सौधन्वनाः ।
ऋभवः । वीर्याणि । च ॥ ४ ॥ इंद्र । ऋभुऽभिः । वाजवत्ऽभिः । संऽउक्षितं । सुतं ।
सोमं । आ । वृषस्व । गभस्त्योः । धिया । इषितः । मघऽवन् । दाशुषः । गृहे ।
सौधन्वनेभिः । सह । मत्स्व । नृऽभिः ॥ ५ ॥ इंद्र । ऋभुऽमान् । वाजऽवान् ।
मत्स्व । इह । नः । अस्मिन् । सवने । शच्या । पुरुऽस्तुत । इमानि । तुभ्यं ।
स्वसराणि । येमिरे । व्रता । देवानां । मनुषः । च । धर्मऽभिः ॥ ६ ॥

इन्द्रं ऋभुभिर्वाजिभिर्वाजयन्निह स्तोमं जरितुरुप याहि यज्ञियम् ।
शतं केतेभिरिषिरेभिरायवे सहस्रणीथो अध्वरस्य होमनि ॥ ७ ॥ ७ ॥

॥ ६१ ॥ ऋषिः—विश्वामित्रः । देवता—उषः । छन्दः—त्रिष्टुप् ॥

॥ ६१ ॥ उषो वाजेन वाजिनि प्रचेताः स्तोमं जुषस्व गृणतो मघोनि ।
पुराणी देवि युवतिः पुरंधिरनु व्रतं चरसि विश्ववारे ॥ १ ॥
उषो देव्यमर्त्या वि भाहि चन्द्ररथा सूनृता ईरयंती ।
आ त्वा वहन्तु सुयमासो अश्वा हिरण्यवर्णा पृथुपाजसो ये ॥ २ ॥
उषः प्रतीची भुवनानि विश्वोर्ध्वा तिष्ठस्यमृतस्य केतुः ।
समानमर्थं चरणीयमाना चक्रमिव नव्यस्या वृतस्व ॥ ३ ॥

इंद्रं । ऋभुऽभिः । वाजिऽभिः । वाजयन् । इह । स्तोमं । जरितुः । उप । याहि । यज्ञियं । शतं । केतेभिः । इषिरेभिः । आयवे । सहस्रऽनीथः । अध्वरस्य । होमनि ॥ ७ ॥ ७ ॥

उषः । वाजेन । वाजिनि । प्रऽचेताः । स्तोमं । जुषस्व । गृणतः । मघोनि । पुराणी । देवि । युवतिः । पुरंऽधिः । अनु । व्रतं । चरसि । विश्वऽवारे ॥ १ ॥ उषः । देवि । अमर्त्या । वि । भाहि । चंद्रऽरथा । सूनृताः । ईरयंती । आ । त्वा । वहंतु । सुऽयमासः । अश्वाः । हिरण्यऽवर्णा । पृथुऽपाजसः । ये ॥ २ ॥ उषः । प्रतीची । भुवनानि । विश्वा । ऊर्ध्वा । तिष्ठसि । अमृतस्य । केतुः । समानं । अर्थं । चरणीयमाना । चक्रंऽइव । नव्यसि । आ । वृतस्व ॥ ३ ॥

अव स्यूमेव चिन्वती मघोन्युषा याति स्वसरस्य पत्नी ।
स्वर्जनन्ती सुभगा सुदंसा आन्ताद्दिवः पप्रथ आ पृथिव्याः ॥ ४ ॥
अच्छा वो देवीमुषसं विभातीं प्र वो भरध्वं नमसा सुवृक्तिम् ।
ऊर्ध्वं मधुधा दिवि पाजो अश्रेत्प्र रोचना रुरुचे रण्वसंदृक् ॥ ५ ॥
ऋतावरी दिवो अर्कैरबोध्या रेवती रोदसी चित्रमस्थात् ।
आयतीमग्न उषसं विभातीं वाममेषि द्रविणं भिक्षमाणः ॥ ६ ॥
ऋतस्य बुध्न उषसामिषण्यन्वृषा मही रोदसी आ विवेश ।
मही मित्रस्य वरुणस्य माया चन्द्रेव भानुं वि दधे पुरुत्रा ॥ ७ ॥ ८ ॥

अव । स्यूमंऽइव । चिन्वती । मघोनीं । उषाः । याति । स्वसरस्य । पत्नीं । स्वः । जनंती । सुऽभगा । सुऽदंसाः । आ । अंतात् । दिवः । पप्रथे । आ । पृथिव्याः ॥ ४ ॥
अच्छं । वः । देवीं । उषसं । विऽभातीं । प्र । वः । भरध्वं । नमसा । सुऽवृक्ति । ऊर्ध्वं । मधुधा । दिवि । पाजः । अश्रेत् । प्र । रोचना । रुरुचे । रण्वऽसंदृक् ॥ ५ ॥
ऋतऽवंरी । दिवः । अर्कैः । अबोधि । आ । रेवतीं । रोदसी इति । चित्रं । अस्थात् । आऽयतीं । अग्ने । उषसं । विऽभातीं । वामं । एषि । द्रविणं । भिक्षमाणः ॥ ६ ॥
ऋतस्य । बुध्ने । उषसां । इषण्यन् । वृषा । मही इति । रोदसी इति । आ । विवेश । मही । मित्रस्य । वरुणस्य । माया । चंद्राऽइव । भानुं । वि । दधे । पुरुऽत्रा ॥ ७ ॥ ८ ॥

॥ ६२ ॥ ऋषिः-विश्वामित्रः । देवता-इन्द्रावरुणौ । छन्दः-त्रिष्टुप् ॥

॥ ६२ ॥ इमा उ वां भूमयो मन्यमाना युवावते न तुज्या अभूवन् ।
कं त्यदिन्द्रावरुणा यशो वां येन स्मा सिनं भरथः सखिभ्यः ॥ १ ॥
अयमु वां पुरुतमो रयीयञ्छश्वत्तममवसे जोहवीति ।
सजोषाविन्द्रावरुणा मरुद्भिर्दिवा पृथिव्या शृणुतं हवं मे ॥ २
अस्मे तदिन्द्रावरुणा वसु ष्यादस्मे रयिर्मरुतः सर्ववीरः ।
अस्मान्वरूत्रीः शरणैरवन्त्वस्मान्होत्रा भारती दक्षिणाभिः ॥ ३ ॥
बृहस्पते जुषस्व नो हव्यानि विश्वदेव्य ।
रास्व रत्नानि दाशुषे ॥ ४ ॥

इमाः । उं इति । वां । भूमयः । मन्यमानाः । युवाऽवते । न । तुज्याः । अभूवन् ।
कं । त्यत् । इंद्रावरुणा यशः । वां । येन । स्म । सिनं । भरथः । सखिऽभ्यः ॥ १ ॥
अयं । उंऽइति । वां । पुरुऽतमः । रयिऽयन् । शश्वत्ऽतमं । अवसे । जोहवीति ।
सऽजोषौ । इंद्रावरुणा । मरुत्ऽभिः । दिवा । पृथिव्या । शृणुतं । हवं । मे ॥ २ ॥
अस्मे इति । तत् । इंद्रावरुणा । वसु । स्यात् । अस्मे इति । रयिः । मरुतः । सर्वऽवीरः ।
अस्मान् । वरूत्रीः । शरणैः । अवंतु । अस्मान् । होत्रा । भारती । दक्षिणाभिः ॥३॥
बृहस्पते । जुषस्व । नः । हव्यानि । विश्वऽदेव्य । रास्व । रत्नानि । दाशुषे ॥ ४ ॥

शुचिंमर्कैर्बृहस्पतिमध्वरेषु नमस्यत ।

अनाम्योज आ चक्रे ॥ ५ ॥ ९ ॥

वृषभं चर्षणीनां विश्वरूपमदाभ्यम् ।

बृहस्पतिं वरेण्यम् ॥ ६ ॥

इयं ते पूषन्नाघृणे सुष्टुतिर्देव नव्यसी ।

अस्माभिस्तुभ्यं शस्यते ॥ ७ ॥

तां जुषस्व गिरं मम वाजयन्तीमवा धियम् ।

वधूयुरिव योषणाम् ॥ ८ ॥

यो विश्वाभि विपश्यति भुवना सं च पश्यति ।

स नः पूषाविता भुवत् ॥ ९ ॥

शुचिं । अर्कैः । बृहस्पतिं । अध्वरेषु । नमस्यत । अनामि । ओजः । आ । चक्रे ॥ ५ ॥ ९ ॥ वृषभं । चर्षणीनां । विश्वऽरूपं । अदाभ्यं । बृहस्पतिं । वरेण्यं ॥ ६ ॥ इयं । ते । पूषन् । आघृणे । सुऽस्तुतिः । देव । नव्यसी । अस्माभिः । तुभ्यं । शस्यते ॥ ७ ॥ तां । जुषस्व । गिरं । मम । वाजऽयंतीं । अव । धियं । वधूयुःऽइव । योषणां ॥ ८ ॥ यः । विश्वा । अभि । विऽपश्यति । भुवना । सं । च । पश्यति । सः । नः । पूषा । अविता । भुवत् ॥ ९ ॥

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।

धियो यो नः प्रचोदयात् ॥ १० ॥ १० ॥

देवस्य सवितुर्वयं वाजयन्तः पुरंध्या ।

भगस्य रातिमीमहे ॥ ११ ॥

देवं नरः सवितारं विप्रा यज्ञैः सुवृक्तिभिः ।

नमस्यन्ति धियेषिताः ॥ १२ ॥

सोमो जिगाति गातुविद्देवानामेति निष्कृतम् ।

ऋतस्य योनिमासदम् ॥ १३ ॥

सोमो अस्मभ्यं द्विपदे चतुष्पदे च पशवे ।

अनमीवा इषस्करत् ॥ १४ ॥

तत् । सवितुः । वरेण्यं । भर्गः । देवस्य । धीमहि । धियः । यः । नः । प्रऽचोदयात् ॥ १० ॥ १० ॥ देवस्य । सवितुः । वयं । वाजऽयंतः । पुरंऽध्या । भगस्य । रातिं । ईमहे ॥ ११ ॥ देवं । नरः । सवितारं । विप्राः । यज्ञैः । सुवृक्तिऽभिः । नमस्यंति । धिया । इषिताः ॥ १२ ॥ सोमः । जिगाति । गातुऽवित् । देवानां । एति । निःऽकृतं । ऋतस्य । योनिं । आऽसदं ॥ १३ ॥ सोमः । अस्मभ्यं । द्विपदे । चतुःऽपदे । च । पशवे । अनमीवाः । इषः । करत् ॥ १४ ॥

अस्माकमायुर्वर्धयन्नभिमातीः सहमानः ।

सोमः सधस्थमासदत् ॥ १५ ॥

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् ।

मध्वा रजाँसि सुक्रतू ॥ १६ ॥

उरुशंसा नमोवृधा मह्ना दक्षस्य राजथः ।

द्राघिष्ठाभिः शुचिव्रता ॥ १७ ॥

गृणाना जमदग्निना योनावृतस्य सीदतम् ।

पातं सोममृतावृधा ॥ १८ ॥ ११ ॥ ५ ॥ ३ ॥

अस्माकं । आयुः । वर्धयन् । अभिऽमातीः । सहमानः । सोमः । सधऽस्थं । आ । असदत् ॥ १५ ॥ आ । नः । मित्रावरुणा । घृतैः । गव्यूतिं । उक्षतं । मध्वा । रजाँसि । सुक्रतू इति सुऽक्रतू ॥ १६ ॥ उरुऽशंसा । नमःऽवृधा । मह्ना । दक्षस्य । राजथः । द्राघिष्ठाभिः । शुचिऽव्रता ॥ १७ ॥ गृणाना । जमत्ऽअग्निना । योनौ । ऋतस्य । सीदतं । पातं । सोमं । ऋतऽवृधा ॥ १८ ॥ ११ ॥

॥ इति तृतीयाष्टके तृतीयं मंडलं समाप्तं ॥ ३ ॥

॥ अथ चतुर्थं मण्डलम् ॥

॥ प्रथमोऽनुवाकः ॥ १ ॥

॥ १ ॥ ऋषिः—वामदेवः । देवता—अग्निः । छन्दः—जगती ॥

॥१॥ त्वां ह्यग्ने सदमित्समन्यवो देवासो देवमरतिं न्येरिरे इति क्रत्वा न्येरिरे ।
अमर्त्यं यजत मर्त्येष्वा देवमादेवं जनत प्रचेतसं
विश्वामादेवं जनत प्रचेतसम् ॥ १ ॥
स भ्रातरं वरुणमग्न आ ववृत्स्व देवाँ अच्छा सुमती
यज्ञवनसं ज्येष्ठं यज्ञवनसम् ।
ऋतावानमादित्यं चर्षणीधृतम् राजानं चर्षणीधृतम् ॥ २ ॥
सखे सखायमभ्या ववृत्स्वाशुं न चक्रं रथ्येव रंह्यास्मभ्यं दस्म रंह्या ।
अग्ने मृळीकं वरुणे सचा विदो मरुत्सु विश्वभानुषु ।
तोकाय तुजे शुशुचान शं कृध्यस्मभ्यं दस्म शं कृधि ॥ ३ ॥

त्वां । हि । अग्ने । सदं । इत् । सऽमन्यवः । देवासः । देवं । अरतिं । निऽएरिरे । इति । क्रत्वा । निऽएरिरे । अमर्त्यं । यजत । मर्त्येषु । आ । देवं । आऽदेवं । जनत । प्रऽचेतसं । विश्वं । आऽदेवं । जनत । प्रऽचेतसं ॥ १ ॥ सः । भ्रातरं । वरुणं । अग्ने । आ । ववृत्स्व । देवान् । अच्छ । सुऽमती । यक्षऽवनसं । ज्येष्ठं । यज्ञऽवनसं । ऋतऽवानं । आदित्यं । चर्षणिऽधृतं । राजानं । चर्षणिऽधृतं ॥ २ ॥ सखे । सखायं । अभि । आ । ववृत्स्व । आशुं । न । चक्रं । रथ्याऽइव । रंह्या । अस्मभ्यं । दस्म । रंह्या । अग्ने । मृळीकं । वरुणे । सचा । विदः । मरुत्ऽसु । विश्वऽभानुषु । तोकाय । तुजे । शुशुचान । शं । कृधि । अस्मभ्यं । दस्म । शं । कृधि ॥ ३ ॥

त्वं नो अग्ने वरुणस्य विद्वान्देवस्य हेळोऽव यासिसीष्ठाः ।
यजिष्ठो बह्नितमः शोशुचानो विश्वा द्वेषांसि प्र मुमुग्ध्यस्मत् ॥ ४ ॥
स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अव यक्ष्व नो वरुणं ररांणो वीहि मृळीकं सुहवो न एधि ॥ ५ ॥ १२ ॥
अस्य श्रेष्ठा सुभगस्य सन्दृग्देवस्य चित्रतमा मर्त्येषु ।
शुचि घृतं न तप्तमघ्न्यायाः स्पार्हा देवस्य मंहनेव धेनोः ॥ ६ ॥
त्रिरस्य ता परमा सन्ति सत्या स्पार्हा देवस्य जनिमान्यग्नेः ।
अनन्ते अन्तः परिवीत आगाच्छुचिः शुक्रो अर्यो रोरुचानः ॥ ७ ॥
स दूतो विश्वेदभि वष्टि सद्मा होता हिरण्यरथो रंसुजिह्वः ।
रोहिद्अश्वो वपुष्यो विभावा सदा रण्वः पितुमतीव संसत् ॥ ८ ॥

त्वं । नः । अग्ने । वरुणस्य । विद्वान् । देवस्य । हेळः । अव । यासिसीष्ठाः । यजिष्ठः । बह्नितमः । शोशुचानः । विश्वा । द्वेषांसि । प्र । मुमुग्धि । अस्मत् ॥ ४ ॥ सः । त्वं । नः । अग्ने । अवमः । भव । ऊती । नेदिष्ठः । अस्याः । उषसः । विऽउष्टौ । अव । यक्ष्व । नः । वरुणं । ररांणः । वीहि । मृळीकं । सुऽहवः । नः । एधि ॥ ५ ॥ १२ ॥ अस्य । श्रेष्ठा । सुऽभगस्य । संऽदृक् । देवस्य । चित्रऽतमा । मर्त्येषु । शुचि । घृतं । न । तप्तं । अघ्न्यायाः । स्पार्हा । देवस्य । मंहनाऽइव । धेनोः ॥ ६ ॥ त्रिः । अस्य । ता । परमा । संति । सत्या । स्पार्हा । देवस्य । जनिमानि । अग्नेः । अनंते । अंतरिति । परिऽवीतः । आ । अगात् । शुचिः । शुक्रः । अर्यः । रोरुचानः ॥ ७ ॥ सः । दूतः । विश्वा । इत् । अभि । वष्टि । सद्म । होता । हिरण्यऽरथः । रंसुऽजिह्वः । रोहित्ऽअश्वः । वपुष्यः । विभाऽवा । सदा । रण्वः । पितुमतीऽइव । संऽसत् ॥ ८ ॥

स चेतयन्मनुषो यज्ञबन्धुः प्र तं मह्या रशनया नयन्ति ।
स क्षेत्यस्य दुर्यासु साधन्देवो मर्तस्य सधनित्वमाप ॥ ९ ॥
स तू नो अग्निर्नयतु प्रजानन्नच्छा रत्नं देवभक्तं यदस्य ।
धिया यद्विश्वे अमृता अकृण्वन्द्यौष्पिता जनिता सत्यमुक्षन् ॥ १० ॥ १३ ॥
स जायत प्रथमः पस्त्यासु महो बुध्ने रजसो अस्य योनौ ।
अपादशीर्षा गुहमानो अन्तायोयुवानो वृषभस्य नीळे ॥ ११ ॥
प्र शर्ध आर्त प्रथमं विपन्यँ ऋतस्य योना वृषभस्य नीळे ।
स्पार्हो युवा वपुष्यो विभावा सप्त प्रियासोऽजनयन्त वृष्णे ॥ १२ ॥
अस्माकमत्र पितरो मनुष्या अभि प्र सेदुर्ऋतमाशुषाणाः ।
अश्मव्रजाः सुदुघा वव्रे अन्तरुदुस्रा आजन्नुषसो हुवानाः ॥ १३ ॥

सः । चेतयत् । मनुषः । यज्ञऽबन्धुः । प्र । तं । मह्या । रशनया । नयंति । सः । क्षेति । अस्य । दुर्यासु । साधन् । देवः । मर्तस्य । सधनिऽत्वं । आप ॥ ९ ॥ सः । तु । नः । अग्निः । नयतु । प्रऽजानन् । अच्छ । रत्नं । देवऽभक्तं । यत् । अस्य । धिया । यत् । विश्वे । अमृताः । अकृण्वन् । द्यौः । पिता । जनिता । सत्यं । उक्षन् ॥ १० ॥ १३ ॥ सः । जायत । प्रथमः । पस्त्यासु । महः । बुध्ने । रजसः । अस्य । योनौ । अपात् । अशीर्षा । गुहमानः । अंता । आऽयोयुवानः । वृषभस्य । नीळे ॥ ११ ॥ प्र । शर्धः । आर्त । प्रथमं । विपन्या । ऋतस्य । योना । वृषभस्य । नीळे । स्पार्हः । युवा । वपुष्यः । विभाऽवा । सप्त । प्रियासः । अजनयंत । वृष्णे ॥ १२ ॥ अस्माकं । अत्र । पितरः । मनुष्याः । अभि । प्र । सेदुः । ऋतं । आशुषाणाः । अश्मऽव्रजाः । सुऽदुघाः । वव्रे । अंतः । उत् । उस्राः । आजन् । उषसः । हुवानाः ॥ १३ ॥

ते मर्मृजत दद्दवांसो अद्रिं तदेषामन्ये अभितो वि वोचन् ।
पश्वयंन्त्रासो अभि कारमर्चन्विदन्त ज्योतिश्चकृपन्त धीभिः ॥ १४ ॥
ते गव्यता मनसा दृघ्रमुब्धं गा येमानं परि षन्तमद्रिम् ।
दृळ्हं नरो वचसा दैव्येन व्रजं गोमन्तमुशिजो वि वव्रुः ॥ १५ ॥ १४ ॥
ते मन्वत प्रथमं नाम धेनोस्त्रिः सप्त मातुः परमाणि विन्दन् ।
तज्जानतीरभ्यनूषत व्रा आविर्भुवदरुणीर्यशसा गोः ॥ १६ ॥
नेशत्तमो दुधितं रोचत द्यौरुद्देव्या उषसो भानुरर्त ।
आ सूर्यो बृहतस्तिष्ठदज्राँ ऋजु मर्तेषु वृजिना च पश्यन् ॥ १७ ॥
आदित्पश्चा बुबुधाना व्यख्यन्नादिद्रत्नं धारयन्त द्युभक्तम् ।
विश्वे विश्वासु दुर्यासु देवा मित्र धिये वरुण सत्यमस्तु ॥ ८८ ॥

ते । मर्मृजत । ददृवांसः । अद्रिं । तत् । एषां । अन्ये । अभितः । वि । वोचन् ।
पश्वऽयंत्रासः । अभि । कारं । अर्चन् । विदंत । ज्योतिः । चकृपंत । धीभिः ॥ १४ ॥
ते । गव्यता । मनसा । दृघ्रं । उब्धं । गाः । येमानं । परि । संतं । अद्रिं । दृळ्हं ।
नरः । वचसा । दैव्येन । व्रजं । गोऽमंतं । उशिजः । वि । वव्रुरिति वव्रुः ॥ १५ ॥ १४ ॥
ते । मन्वत । प्रथमं । नाम । धेनोः । त्रिः । सप्त । मातुः । परमाणि । विंदन् । तत् ।
जानतीः । अभि । अनूषत । व्राः । आविः । भुवत् । अरुणीः । यशसा । गोः ॥ १६ ॥
नेशत् । तमः । दुधितं । रोचत । द्यौः । उत् । देव्याः । उषसः । भानुः । अर्त ।
आ । सूर्यः । बृहतः । तिष्ठत् । अज्रान् । ऋजु । मर्तेषु । वृजिना । च । पश्यन् ॥ १७ ॥
आत् । इत् । पश्वा । बुबुधानाः । वि । अख्यन् । आत् । इत् । रत्नं । धारयंत ।
द्युऽभक्तं । विश्वे । विश्वासु । दुर्यासु । देवाः । मित्र । धिये । वरुण । सत्यं । अस्तु ॥ १८ ॥

अच्छा वोचेय शुशुचानमग्निं होतारं विश्वभरसं यजिष्ठम् ।
शुच्यूधो अतृणन्न गवामन्धो न पूतं परिषिक्तमंशोः ॥ १९ ॥
विश्वेषामदितिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणाम् ।
अग्निर्देवानामवं आवृणानः सुमृळीको भवतु जातवेदाः ॥ २० ॥ १५ ॥

॥ २ ॥ ऋषिः—वामदेवः । देवता—अग्निः । छन्दः—त्रिष्टुप् ॥

॥ २ ॥ यो मर्त्येष्वमृतं ऋतावा देवो देवेष्वरतिर्निधायि ।
होता यजिष्ठो मह्ना शुचध्यै हव्यैरग्निर्मनुष ईरयध्यै ॥ १ ॥
इह त्वं सूनो सहसो नो अद्य जातो जाताँ उभयाँ अन्तरग्ने ।
दूत ईयसे युयुजान ऋंष्व ऋजुमुष्कान्वृषणः शुक्राँश्च ॥ २ ॥

अच्छ । वोचेय । शुशुचानं । अग्निं । होतारं । विश्वऽभरसं । यजिष्ठं । शुचिं । ऊधः । अतृणत् । न । गवां । अंधः । न । पूतं । परिऽसिक्तं । अंशोः ॥ १९ ॥ विश्वेषां । अदितिः । यज्ञियानां । विश्वेषां । अतिथिः । मानुषाणां । अग्निः । देवानां । अवः । आऽवृणानः । सुऽमृळीकः । भवतु । जातऽवेदाः ॥ २० ॥ १५ ॥

यः । मर्त्येषु । अमृतः । ऋतऽवा । देवः । देवेषु । अरतिः । निऽधायि । होता । यजिष्ठः । मह्ना । शुचध्यै । हव्यैः । अग्निः । मनुषः । ईरयध्यै ॥ १ ॥ इह । त्वं । सूनो इति । सहसः । नः । अद्य । जातः । जातान् । उभयान् । अंतः । अग्ने । दूतः । ईयसे । युयुजानः । ऋष्व । ऋजुऽमुष्कान् । वृषणः । शुक्रान् । च ॥ २ ॥

अत्या वृधस्नू रोहिता घृतस्नू ऋतस्य मन्ये मनसा जविष्ठा ।
अन्तरीयसे अरुषा युजानो युष्मांश्च देवान्विश आ च मर्तान् ॥ ३ ॥
अर्यमणं वरुणं मित्रमेषामिन्द्राविष्णू मरुतो अश्विनोत ।
स्वश्वो अग्ने सुरथः सुराधा एदु वह सुहविषे जनाय ॥ ४ ॥
गोमाँ अग्नेऽविमाँ अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः ।
इळावाँ एषो असुर प्रजावान्दीर्घो रयिः पृथुबुध्नः सभावान् ॥ ५ ॥ १६ ॥
यस्ते इध्मं जभरत्सिस्विदानो मूर्धानं वा ततपते त्वाया ।
भुवस्तस्य स्वतवाँः पायुरग्ने विश्वस्मात्सीमघायत उरुष्य ॥ ६ ॥
यस्ते भरादग्नियते चिदन्नं निशिषन्मन्द्रमतिथिमुदीरत ।
आ देवयुरिनधते दुरोणे तस्मिन्रयिर्ध्रुवो अस्तु दास्वान् ॥ ७ ॥

अत्या । वृधस्नू इति वृधऽस्नू । रोहिता । घृतस्नू इति घृतऽस्नू । ऋतस्य । मन्ये । मनसा । जविष्ठा । अंतः । ईयसे । अरुषा । युजानः । युष्मान् । च । देवान् । विशः । आ । च । मर्तान् ॥ ३ ॥ अर्यमणं । वरुणं । मित्रं । एषां । इंद्राविष्णू इति । मरुतः । अश्विना । उत । सुऽअश्वः । अग्ने । सुऽरथः । सुऽराधाः । आ । इत् । ऊं इति । वह । सुऽहविषे । जनाय ॥ ४ ॥ गोऽमान् । अग्ने । अविऽमान् । अश्वी । यज्ञः । नृवत्ऽसखा । सदं । इत् । अप्रऽमृष्यः । इळाऽवान् । एषः । असुर । प्रजाऽवान् । दीर्घः । रयिः । पृथुऽबुध्नः । सभाऽवान् ॥ ५ ॥ १६ ॥ यः । ते । इध्मं । जभरत् । सिस्विदानः । मूर्धानं । वा । ततपते । त्वाऽया । भुवः । तस्य । स्वऽतवान् । पायुः । अग्ने । विश्वस्मात् । सीं । अघऽयतः । उरुष्य ॥ ६ ॥ यः । ते । भरात् । अग्नियते । चित् । अन्नं । निऽशिषत् । मंद्रं । अतिथिं । उत्ऽईरत् । आ । देवऽयुः । इनधते । दुरोणे । तस्मिन् । रयिः । ध्रुवः । अस्तु । दास्वान् ॥ ७ ॥

यस्त्वा दोषा य उषसि प्रशंसात्प्रियं वा त्वा कृणवते हविष्मान् ।
अश्वो न स्वे दम आ हेम्यावान्तमंहसः पीपरो दाश्वांसम् ॥ ८ ॥
यस्तुभ्यमग्ने अमृताय दाशद्दुवस्त्वे कृणवते यतस्रुक् ।
न स राया शशमानो वि योषन्नैनमंहः परि वरदायोः ॥ ९ ॥
यस्य त्वमग्ने अध्वरं जुजोषो देवो मर्तस्य सुधितं ररांणः ।
प्रीतेदसद्धोत्रा सा यविष्ठासाम यस्य विधतो वृधासः ॥ १० ॥ १७ ॥
चित्तिमचित्तिं चिनवद्वि विद्वान्पृष्ठेव वीता वृजिना च मर्तान् ।
राये च नः स्वपत्याय देव दितिं च रास्वादितिमुरुष्य ॥ ११ ॥

यः । त्वा । दोषा । यः । उषसि । प्रऽशंसात् । प्रियं । वा । त्वा । कृणवते ।
हविष्मान् । अश्वः । न । स्वे । दमे । आ । हेम्याऽवान् । तं । अंहसः । पीपरः ।
दाश्वांसं ॥ ८ ॥ यः । तुभ्यं । अग्ने । अमृताय । दाशत् । दुवः । त्वे इति ।
कृणवते । यतऽस्रुक् । न । सः । राया । शशमानः । वि । योषत् । न । एनं । अंहः ।
परि । वरत् । अघऽयोः ॥ ९ ॥ यस्य । त्वं । अग्ने । अध्वरं । जुजोषः । देवः ।
मर्तस्य । सुऽधितं । ररांणः । प्रीता । इत् । असत् । होत्रा । सा । यविष्ठ । असाम ।
यस्य । विधतः । वृधासः ॥ १० ॥ १७ ॥ चित्तिं । अचित्तिं । चिनवत् । वि ।
विद्वान् । पृष्ठाऽइव । वीता । वृजिना । च । मर्तान् । राये । च । नः । सुऽअपत्याय ।
देव । दितिं । च । रास्व । अदितिं । उरुष्य ॥ ११ ॥

कविं शशासुः कवयोऽदब्धा निधारयन्तो दुर्यास्वायोः ।
अतस्त्वं दृश्याँ अग्न एतान्पड्भिः पश्येरद्भुताँ अर्य एवैः ॥ १२ ॥
त्वमग्ने वाघते सुप्रणीतिः सुतसोमाय विधते यविष्ठ ।
रत्नं भर शशमानाय घृष्वे पृथुश्चन्द्रमवसे चर्षणिप्राः ॥ १३ ॥
अधा ह यद्वयमग्ने त्वाया पड्भिर्हस्तेभिश्चकृमा तनूभिः ।
रथं न क्रन्तो अपसा भुरिजोरृतं येमुः सुध्य आशुषाणाः ॥ १४ ॥
अधा मातुरुषसः सप्त विप्रा जायेमहि प्रथमा वेदसो नॄन् ।
दिवस्पुत्रा अङ्गिरसो भवेमाद्रिं रुजेम धनिनं शुचन्तः ॥ १५ ॥ १८ ॥
अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशुषाणाः ।
शुचीदयन्दीधितिमुक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन् ॥ १६ ॥

कविं । शशासुः । कवयः । अदब्धाः । निऽधारयंतः । दुर्यासु । आयोः । अतः ।
त्वं । दृश्यान् । अग्ने । एतान् । पट्ऽभिः । पश्येः । अद्भुतान् । अर्यः । एवैः ॥ १२ ॥
त्वं । अग्ने । वाघते । सुऽप्रणीतिः । सुतऽसोमाय । विधते । यविष्ठ । रत्नं । भर ।
शशमानाय । घृष्वे । पृथु । चंद्रं । अवसे । चर्षणिऽप्राः ॥ १३ ॥ अध । ह । यत् ।
वयं । अग्ने । त्वाऽया । पट्ऽभिः । हस्तेभिः । चकृम । तनूभिः । रथं । न । क्रंतः ।
अपसा । भुरिजोः । ऋतं । येमुः । सुऽध्यः । आशुषाणाः ॥ १४ ॥ अध । मातुः ।
उषसः । सप्त । विप्राः । जायेमहि । प्रथमाः । वेधसः । नॄन् । दिवः । पुत्राः ।
अंगिरसः । भवेम । अद्रिं । रुजेम । धनिनं । शुचंतः ॥ १५ ॥ १८ ॥ अध । यथा ।
नः । पितरः । परासः । प्रत्नासः । अग्ने । ऋतं । आशुषाणाः । शुचिं । इत् ।
अयन् । दीधितिं । उक्थऽशासः । क्षामं । भिंदंतः । अरुणीः । अप । व्रन् ॥ १६ ॥

सुकर्मांणः सुरुचो देवयन्तोऽयो न देवा जनिमा धमन्तः ।
शुचन्तो अग्निं वावृधन्त इन्द्रमूर्वं गव्यं परिषदन्तो अग्मन् ॥ १७ ॥
आ यूथेव क्षुमति पश्वो अख्यद्देवानां यज्जनिमान्त्युग्र ।
मर्तानां चिदुर्वशीरकृप्रन्वृधे चिदर्य उपरस्यायोः ॥ १८ ॥
अकर्म ते स्वपसो अभूम ऋतमवस्रन्नुषसो विभातीः ।
अनूनमग्निं पुरुधा सुदीतिं देवस्य मंमृजतश्चारु चक्षुः ॥ १९ ॥
एता ते अग्न उचथानि वेधोऽवोचाम कवये ता जुषस्व ।
उच्छोचस्व कृणुहि वस्यसो नो महो रायः पुरुवार प्र यन्धि ॥ २० ॥ १९ ॥

सुऽकर्माणः । सुऽरुचः । देवऽयंतः । अयः । न । देवाः । जनिम । धमंतः । शुचंतः । अग्निं । वावृधंतः । इंद्रं । ऊर्वं । गव्यं । परिऽसदंतः । अग्मन् ॥ १७ ॥ आ । यूथाऽइव । क्षुऽमतिं । पश्वः । अख्यत् । देवानां । यत् । जनिम । अंति । उग्र । मर्तानां । चित् । उर्वशीः । अकृप्रन् । वृधे । चित् । अर्यः । उपरस्य । आयोः ॥१८॥ अकर्म । ते । सुऽअपसः । अभूम । ऋतं । अवस्रन् । उषसः । विभातीः । अनूनं । अग्निं । पुरुधा । सुऽदीतिं । देवस्य । ममृजतः । चारु । चक्षुः ॥ १९ ॥ एता । ते । अग्ने । उचथानि । वेधः । अवोचाम । कवये । ता । जुषस्व । उत् । शोचस्व । कृणुहि । वस्यसः । नः । महः । रायः । पुरुऽवार । प्र । यंधि ॥ २० ॥ १९ ॥

॥ १ ॥ ऋषिः—वामदेवः । देवता—अग्निः । छन्दः—त्रिष्टुप् ॥

॥ १ ॥ आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः ।
अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ॥ १ ॥
अयं योनिश्चकृमा यं वयं ते जायेव पत्य उशती सुवासाः ।
अर्वाचीनः परिवीतो नि षीदेमा उ ते स्वपाक प्रतीचीः ॥ २ ॥
आशृण्वते अदितये मन्म नृचक्षसे सुमृळीकाय वेधः ।
देवाय शस्तिममृताय शंस ग्रावेव सोता मधुषुद्यमीळे ॥ ३ ॥
त्वं चिन्नः शम्या अग्ने अस्या ऋतस्य बोध्यृतचित्स्वाधीः ।
कदा ते उक्था सधमाद्यानि कदा भवन्ति सख्या गृहे ते ॥ ४ ॥

आ । वः । राजानं । अध्वरस्य । रुद्रं । होतारं । सत्यऽयजं । रोदस्योः ।
अग्निं । पुरा । तनयित्नोः । अचित्तात् । हिरण्यऽरूपं । अवसे । कृणुध्वं ॥ १ ॥
अयं । योनिः । चकृम । यं । वयं । ते । जायाऽइव । पत्ये । उशती । सुऽवासाः ।
अर्वाचीनः । परिऽवीतः । नि । सीद । इमाः । ऊं इति । ते । सुऽअपाक ।
प्रतीचीः ॥ २ ॥ आऽशृण्वते । अदितये । मन्म । नृऽचक्षसे । सुऽमृळीकाय ।
वेधः । देवाय । शस्तिं । अमृताय । शंस । ग्रावाऽइव । सोता । मधुऽसुत् । यं ।
ईळे ॥ ३ ॥ त्वं । चित् । नः । शम्यै । अग्ने । अस्याः । ऋतस्य । बोधि ।
ऋतऽचित् । सुऽआधीः । कदा । ते । उक्था । सधऽमाद्यानि । कदा । भवंति ।
सख्या । गृहे । ते ॥ ४ ॥

कथा ह तद्वरुणाय त्वमग्ने कथा दिवे गर्हसे कन्न आगः ।
कथा मित्राय मीळ्हुषे पृथिव्यै ब्रवः कदर्यम्णे कद्भगाय ॥ ५ ॥ २० ॥
कद्विष्ण्यांसु वृधसानो अग्ने कद्वाताय प्रतवसे शुभंये ।
परिज्मने नासत्याय क्षे ब्रवः कदग्ने रुद्राय नृघ्ने ॥ ६ ॥
कथा महे पुष्टिम्भरायं पूष्णे कद्रुद्राय सुमखाय हविर्दे ।
कद्विष्णव उरुगायाय रेतो ब्रवः कदग्ने शरवे बृहत्यै ॥ ७ ॥
कथा शर्धाय मरुतामृताय कथा सूरे बृहते पृच्छयमानः ।
प्रति ब्रवोऽदितये तुराय साध दिवो जातवेदश्चिकित्वान् ॥ ८ ॥

कथा । ह । तत् । वरुणाय । त्वं । अग्ने । कथा । दिवे । गर्हसे । कत् । नः । आगः ।
कथा । मित्राय । मीळ्हुषे । पृथिव्यै । ब्रवः । कत् । अर्यम्णे । कत् । भगाय ॥५॥२०॥
कत् । विष्ण्यांसु । वृधसानः । अग्ने । कत् । वाताय । प्रऽतवसे । शुभंऽये । परिऽज्मने ।
नासत्याय । क्षे । ब्रवः । कत् । अग्ने । रुद्राय । नृऽघ्ने ॥ ६ ॥ कथा । महे ।
पुष्टिऽभराय । पूष्णे । कत् । रुद्राय । सुऽमखाय । हविःऽदे । कत् । विष्णवे ।
उरुऽगायाय । रेतः । ब्रवः । कत् । अग्ने । शरवे । बृहत्यै ॥ ७ ॥ कथा । शर्धाय ।
मरुतां । ऋताय । कथा । सूरे । बृहते । पृच्छयमानः । प्रति । ब्रवः । अदितये ।
तुराय । साध । दिवः । जातऽवेदः । चिकित्वान् ॥ ८ ॥

ऋतेनं ऋतं नियतमीळ आ गोरामा सचा मधुमत्पक्वमग्ने ।
कृष्णा सती रुशता धासिनैषा जामर्येण पयसा पीपाय ॥ ९ ॥
ऋतेन हि ष्मा वृषभश्चिदुक्तः पुमाँ अग्निः पयसा पृष्ठयेन ।
अस्पन्दमानो अचरद्वयोधा वृषा शुक्रं दुदुहे पृश्निरूधः ॥ १० ॥ २१ ॥
ऋतेनाद्रिं व्यसन्भिदन्तः समङ्गिरसो नवन्त गोभिः ।
शुनं नरः परि षदन्नुषासमाविः स्वरभवज्जाते अग्नौ ॥ ११ ॥
ऋतेनं देवीरमृता अमृक्ता अर्णोभिरापो मधुमद्भिरग्ने ।
वाजी न सर्गेषु प्रस्तुभानः प्र सदमित्स्रवितवे दधन्युः ॥ १२ ॥

ऋतेनं । ऋतं । निऽयतं । ईळे । आ । गोः । आमा । सचा । मधुऽमत् । पक्वं ।
अग्ने । कृष्णा । सती । रुशता । धासिना । एषा । जामर्येण । पयसा । पीपाय ॥९॥
ऋतेनं । हि । स्म । वृषभः । चित् । अक्तः । पुमान् । अग्निः । पयसा । पृष्ठयेन ।
अस्पंदमानः । अचरत् । वयःऽधाः । वृषा । शुक्रं । दुदुहे । पृश्निः । ऊधः ॥१०॥२१॥
ऋतेनं । अद्रिं । वि । असन् । भिदंतः । सं । अंगिरसः । नवंत । गोभिः । शुनं ।
नरः । परि । सदन् । उषसं । आविः । स्वः । अभवत् । जाते । अग्नौ ॥ ११ ॥
ऋतेनं । देवीः । अमृताः । अमृक्ताः । अर्णःऽभिः । आपः । मधुमत्ऽभिः । अग्ने ।
वाजी । न । सर्गेषु । प्रऽस्तुभानः । प्र । सदं । इत् । स्रवितवे । दधन्युः ॥ १२ ॥

मा कस्यं यक्षं सदमिद्धुरो गा मा वेशस्यं प्रमिनतो मापेः ।
मा भ्रातुरग्ने अनृजोर्ऋणं वेर्मा सख्युर्दक्षं रिपोर्भुजेम ॥ १३ ॥
रक्षा णो अग्ने तव रक्षणेभी रारक्षाणः सुमख प्रीणानः ।
प्रतिं स्फुर वि रुज वीड्वंहो जहि रक्षो महि चिद्वावृधानम् ॥ १४ ॥
एभिर्भव सुमना अग्ने अर्केरिमान्स्पृंश मन्मभिः शूर वाजान् ।
उत ब्रह्माण्यंगिरो जुषस्व सं ते शस्तिर्देववाता जरेत ॥ १५ ॥
एता विश्वा विदुषे तुभ्यं वेधो नीथान्यग्ने निण्या वचांसि ।
निवचना कवये काव्यान्यशंसिषं मतिभिर्विप्र उक्थैः ॥ १६ ॥ २२ ॥

मा । कस्यं । यक्षं । सदं । इत् । दुरः । गाः । मा । वेशस्यं । प्रऽमिनतः । मा । आपेः । मा । भ्रातुः । अग्ने । अनृजोः । ऋणं । वेः । मा । सख्युः । दक्षं । रिपोः । भुजेम ॥ १३ ॥ रक्ष । नः । अग्ने । तव । रक्षणेभिः । ररक्षाणः । सुऽमख । प्रीणानः । प्रतिं । स्फुर । वि । रुज । वीळु । अंहः । जहि । रक्षः । महि । चित् । वावृधानं ॥ १४ ॥ एभिः । भव । सुऽमनाः । अग्ने । अर्कैः । इमान् । स्पृश । मन्मंऽभिः । शूर । वाजान् । उत । ब्रह्माणि । अंगिरः । जुषस्व । सं । ते । शस्तिः । देवऽवाता । जरेत ॥ १५ ॥ एता । विश्वा । विदुषे । तुभ्यं । वेधः । नीथानि । अग्ने । निण्या । वचांसि । निऽवचना । कवये । काव्यानि । अशंसिषं । मतिऽभिः । विप्रः । उक्थैः ॥ १६ ॥ २२ ॥

॥ ४ ॥ ऋषिः-वामदेवः । देवता-अग्निः । छन्दः-त्रिष्टुप् ॥

॥ ४ ॥ कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन ।
तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥ १ ॥
तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः ।
तपूंष्यग्ने जुह्वा पतङ्गान्त्संन्दितो वि सृज विष्वगुल्काः ॥ २ ॥
प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।
यो नो दूरे अघशंसो यो अन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत् ॥ ३ ॥
उदग्ने तिष्ठ प्रत्या तनुष्व न्यमित्राँ ओषतात्तिग्महेते ।
यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ॥ ४ ॥

कृणुष्व । पाजः । प्रऽसितिं । न । पृथ्वीं । याहि । राजाऽइव । अमऽवान् । इभेन । तृष्वीं । अनु । प्रऽसितिं । द्रूणानः । अस्ता । असि । विध्य । रक्षसः । तपिष्ठैः ॥ १ ॥ तव । भ्रमासः । आशुऽया । पतंति । अनु । स्पृश । धृषता । शोशुचानः । तपूंषि । अग्ने । जुह्वा । पतंगान् । असंऽदितः । वि । सृज । विष्वक् । उल्काः ॥ २ ॥ प्रति । स्पशः । वि । सृज । तूर्णिऽतमः । भव । पायुः । विशः । अस्याः । अदब्धः । यः । नः । दूरे । अघऽशंसः । यः । अंति । अग्ने । माकिः । ते । व्यथिः । आ । दधर्षीत् ॥ ३ ॥ उत् । अग्ने । तिष्ठ । प्रति । आ । तनुष्व । नि । अमित्रान् । ओषतात् । तिग्मऽहेते । यः । नः । अरातिं । समिऽधान । चक्रे । नीचा । तं । धक्षि । अतसं । न । शुष्कं ॥ ४ ॥

ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ।
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्र मृणीहि शत्रून् ॥ ५ ॥ २३ ॥
स तें जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत् ।
विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि दुरो अभि द्यौत् ॥ ६ ॥
सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः ।
पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना सासदिष्टिः ॥ ७ ॥
अर्चामि ते सुमतिं घोष्यर्वाक्सं ते वावाता जरतामियं गीः ।
स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून् ॥ ८ ॥

ऊर्ध्वः । भव । प्रति । विध्य । अधि । अस्मत् । आविः । कृणुष्व । दैव्यानि । अग्ने । अव । स्थिरा । तनुहि । यातुऽजूनाम् । जामिं । अजामिं । प्र । मृणीहि । शत्रून् ॥ ५ ॥ २३ ॥ सः । ते । जानाति । सुऽमतिं । यविष्ठ । यः । ईवते । ब्रह्मणे । गातुं । ऐरत् । विश्वानि । अस्मै । सुऽदिनानि । रायः । द्युम्नानि । अर्यः । वि । दुरः । अभि । द्यौत् ॥ ६ ॥ सः । इत् । अग्ने । अस्तु । सुऽभगः । सुऽदानुः । यः । त्वा । नित्येन । हविषा । यः । उक्थैः । पिप्रीषति । स्वे । आयुषि । दुरोणे । विश्वा । इत् । अस्मै । सुऽदिना । सा । असत् । इष्टिः ॥ ७ ॥ अर्चामि । ते । सुऽमतिं । घोषिं । अर्वाक् । सं । ते । ववातां । जरतां । इयं । गीः । सुऽअश्वाः । त्वा । सुऽरथाः । मर्जयेम । अस्मे इति । क्षत्राणि । धारयेः । अनु । द्यून् ॥ ८ ॥

इह त्वा भूर्या चरेदुप त्मन्दोषावस्तर्दीदिवांसमनु द्यून् ।
क्रीळन्तस्त्वा सुमनसः सपेमाभि द्युम्ना तस्थिवांसो जनानाम् ॥ ९ ॥
यस्त्वा स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन ।
तस्य त्राता भवसि तस्य सखा यस्ते आतिथ्यमानुषग्जुजोषत् ॥१०॥२४॥
महो रुजामि बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय ।
त्वं नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः ॥ ११ ॥
अस्वप्नजस्तरणयः सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठाः ।
ते पायवः सध्र्यञ्चो निषद्याग्ने तवं नः पान्त्वमूर ॥ १२ ॥

इह । त्वा । भूरि । आ । चरेत् । उप । त्मन् । दोषाऽवस्तः । दीदिऽवांसं । अनु । द्यून् । क्रीळंतः । त्वा । सुऽमनसः । सपेम । अभि । द्युम्ना । तस्थिऽवांसः । जनानां ॥ ९ ॥ यः । त्वा । सुऽअश्वः । सुऽहिरण्यः । अग्ने । उपऽयाति । वसुंऽमता । रथेन । तस्य । त्राता । भवसि । तस्य । सखा । यः । ते । आतिथ्यं । आनुषक् । जुजोषत् ॥ १० ॥ २४ ॥ महः । रुजामि । बंधुता । वचःऽभिः । तत् । मा । पितुः । गोतमात् । अनु । इयाय । त्वं । नः । अस्य । वचसः । चिकिद्धि । होतः । यविष्ठ । सुक्रतो इतिं सुऽक्रतो । दमूनाः ॥ ११ ॥ अस्वप्नऽजः । तरणयः । सुऽशेवाः । अतंद्रासः । अवृकाः । अश्रमिष्ठाः । ते । पायवः । सध्र्यंचः । निऽसद्य । अग्ने । तवं । नः । पांतु । अमूर ॥ १२ ॥

ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन् ।
ररक्ष तान्त्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥ १३

त्वया वयं सधन्य१स्त्वोतास्तव प्रणीत्यश्याम वाजान् ।
उभा शंसा सूदय सत्यतातेऽनुष्ठुया कृणुह्यह्रयाण ॥ १४ ॥

अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभाय ।
दहाशसो रक्षसः पाह्य१स्मान्दुहो निदो मित्रमहो अवद्यात् ॥१५॥२५॥४॥

ये । पायवः । मामतेयं । ते । अग्ने । पश्यंतः । अंधं । दुःऽइतात् । अरक्षन् । ररक्षं । तान् । सुऽकृतः । विश्वऽवेदाः । दिप्संतः । इत् । रिपवः । न । अह । देभुः ॥ १३ ॥ त्वया । वयं । सुऽधन्यः । त्वाऽऊताः । तव । प्रऽनीती । अश्याम । वाजान् । उभा । शंसा । सूदय । सत्यऽताते । अनुष्ठुया । कृणुहि । अह्रयाण ॥ १४ ॥ अया । ते । अग्ने । संऽइधा । विधेम । प्रति । स्तोमं । शस्यमानं । गृभाय । दह । अशसः । रक्षसः । पाहि । अस्मान् । दुहः । निदः । मित्रऽमहः । अवद्यात ॥ १५ ॥ २५ ॥ ४ ॥

॥ इति तृतीयाष्टके चतुर्थोऽध्यायः ॥ ४ ॥

ADHYAYA 3.

SOOKTA 40.

Rishi–Vishwamitra; Deity–Indra.

Having extracted the Soma we are invoking thee, O Indra. Therefore do thou drink of the sweet juice. 1

Accept graciously the extracted Soma that gives wisdom, O Indra, praised of many ! Drink and swallow the delectable juice. 2

Promote with all the gods, O Indra, O lord praised by the people, our sacrifice rich in obtations. 3

These extracted Soma juices that are delightful, are running to thy seat, O Indra, lord of the good. 4

Hold in thy stomach, O Indra, the excellent extracted Soma—thine (are) these heavenly juices. 5

---

१ इन्द्र, सोमे सुते त्वा वृषभं वयं हवामहे । स मध्वः अंधसः पाहि ।

२ पुरुष्टुत इन्द्र, क्रतुविदं सुतं सोमं हर्य । पिब । तातृपिं आ वृपस्य ।

३ इन्द्र, स्तवान विश्पते, विश्वेभिः देवेभिः नः धितावानं यज्ञं प्र तिर ।

४ इंद्र, सत्पते, इमे सुताः चन्द्रासः इंदवः सोमाः तव क्षयं प्र यन्ति ।

५ इंद्र, वरेण्यं सुतं सोमं जठरे दधिष्व । वृक्षासः इंदवः तव ।

Drink of the extracted juice, O Thou fond of praise! Thou art being filled with streams of the sweat (Soma). Thou only art the giver of glory, O Indra! 6

The rich Oblalious of the liberal Sacrificer run towards Indra uninterruptedly. (Indra) has grown mighty by having drunk the Soma. 7

Come unto us, O Killer of Vritra, from near and from afar. Accept these our hymns. 8

Though thou mayest have been called to a distant place, and to one near at hand, or to an intermediate place, do thou come here thence, O Indra. 9

SOOKTA 41.

Rishi–Vishwamitra; Deity–Indra.

Being praised come hither quickly unto us with thy yellow horses, to drink the Soma, O Indra, wielder of the thunderbolt. 1

Our invoker has sat down, who always knows the season. The grass has been spread continuously; the pressing stones have been set to work in the early morning. 2

---

६ गिर्वणः, नः सुतं पाहि । मधोः धाराभिः अज्यसे । इंद्र, यशः त्वादातं इत् ।

७ वनिनः वृत्रहन्नि अक्षिता ईंद्रं अभि सचंते । सोमस्य पीत्वी वावृधे ।

८ वृत्रहन्, अर्वावतः परावतः च नः आ गहि ।

९ इंद्र (वयं) इह हूयसे । यत् अंतरा पराऽवतः अर्वाऽवतं च आ गहि ।

१ अद्रिवः इंद्र, हुवानः सोमपीतये मद्यक् नः हरिभ्यां आ तु याहि ।

२ ऋत्वियः नः होता सत्तः । बर्हिः आनुषक् तिस्तिरे । प्रातः अद्रयः अयुज्रन्

These hymns are being made, O thou who dost accept a hymn. Come and sit on the grass. Eat the offering, O brave Indra. 3

Take pleasure in our offerings of Soma, also in these hymns, O killer of Vritra, (and) in the prayers, O Indra fond of praise. 4

The hymns lick with fondness Indra the drinker of Soma, the great lord of strength, even as mothers lick their calf. 5

Be exhilarated, therefore, with the Soma to (give us) great wealth. Make not (thy) praiser an object of evil words. 6

Fond of thee, and having prepared the offering we are praising thee, O Indra ! Be thou also, fond of us, O Vasu ! 7

Do not unharness (thy horses) far from us, O thou who lovest the golden horses ! Come hither. Be exhilatated here, O mighly Indra. 8

May thy maned horses bring thee hither, O Indra, in thy comfortable chariot—(thy horses) dripping with ghee to sit, on the grass. 9 (4)

---

३ ब्रह्मवाहः शूर, इमा ब्रह्म क्रियन्ते । आ बर्हिः सीद । पुरोळाशं वीहि ।

४ वृत्रहन् गिर्वणः इंद्र, एषु नः सवनेषु स्तोमेषु उक्थेषु रारन्धि ।

५ मातरः वत्सं न सोमपां उर्वं शवसः पतिं इंद्र मतयः रिहंति ।

६ सः महे राधसे तन्वा अंधसः महस्व । स्तोतारं निदे न करः ।

७ इंद्र, त्वायवः हरिष्मंतः धयं जरामहे । उत वसो, त्वं अस्मयुः ।

८ हरिप्रिय, अस्मत् आरे मा वि मुमुचः । स्वधावः इंद्र, इह मत्स्व ।

९ इंद्र, केशिना तव अश्वौ त्वा सुखे रथे अर्वाञ्च वहतां । घृतस्नू बर्हिः आसदे ।

SOOKTA 42.

Rishi–Vishwamitra; Deity–Indra.

Come to our extracted Soma mixed with milk, with thy yellow horses, O Indra, (and) in thy (chariot) which (is) fond of us. 1

Come to that exhilarating Soma extracted with the stone and placed on the grass. Be thou greatly delighted with it. 2

May my hymns sent forth from here with sincerity go towards Indra to send him hither for drinking the Soma. 3

With praises we invoke Indra hither to drink the Soma. May he come by (our) prayers. 4

These Somas have been extracted. Hold them in thy belly, O Indra, possessed of hundred talents, O thou possessed of wealth. 5

We know, O wise (Indra), that thou art the conquerar of spoil and defeater of the enemies in battles. Therefore we are imploring thy bounty, O Indra. 6

---

१ इंद्र, यः ते अस्मयुः हरिभ्यां नः गवाशिरं सुतं सोमं उप आ गहि ।

२ इंद्र, आवभिः सुतं बर्हिःष्ठां तं मदं आ गहि । कुवित् नु अस्य तृप्णवः ।

३ इत् इत्था इषिताः मम गिरः इंद्रं अच्छ सोमपीतये आव्रते अगुः ।

४ सोमस्य पीतये इंद्रं स्तोमैः इह हवामहे । उक्थेभिः कुवित् आगमत् ।

५ इंद्र, इमे सोमाः सुताः । रातक्रतो वाजिनीवसो तान् जठरे दधिष्व ।

६ हि कवे त्वा वाजेषु धनंजयं दधृषं विप्र । अध ते सुम्नं ईमहे ।

Come, O Indra, and drink this Our Soma mixed with milk and extracted with the strong pressing stones. 7

I send, for thee alone to drink, O Indra, the Soma towards thy own home. May it play in thy heart. 8

We, the Kusikas, desirous of help, are invoking thee the ancient One, O Indra, to drink the Soma. 9 (6)

SOOKTA 43.

Rishi–Vishwamitra; Deity–Indra.

Come hither mounted on thy chariot. To thee only belongs from ancient time the drinking of the Soma. Unharness the horses thy dear friends, near the sacred grass. These bearers of the oblation are calling thee. 1

Come thou, leaving many other people; come to our earnest prayers with thy yellow horses. These hymns, composed by the poets, (and) desirous of (thy) friendship, are invoking thee, O Indra ! 2

Come quickly, O resplendent Indra, accompanied by thy yellow horses to our sacrifice that prospers with hymns. For offering the sacrificial obtation mixed with ghee, I am again and again invoking thee with praises to the drinking chamber of the delicious Somas. 3

---

७ इंद्र, वृषभिः सुतं इमं गवाशिरं यवाशिरं च नः आगत्य पिब ।

८ इंद्र, तुभ्य इत् स्वे ओक्ये सोमं चोदामि । एष ते हृदि रारंतु ।

९ इंद्र, अवस्यवः कुशिकासः सोमस्य पीतये प्रध्नं त्वां हवामहे ।

१ बंधुरेष्टाः अर्वाङ उप आ याहि । सोमपेयं अनु प्र दिवः तव इत् । प्रिया सखाया उप बर्हिः वि मुच । इमे हव्यवाहः त्वां हवंते ।

२ पूर्वीः चर्षणीः अति आ याहि । हरिभ्यां नः अर्यः आशिषः आ । हि इंद्र, स्तोमतष्टः सख्य जुवाणाः इमा मतयः त्वा हवंते ।

३ देव इंद्र, हरिभिः सजोषाः नमोवृधं नः यज्ञं तूयं आ याहि । हि घृतप्रयाः अहं मतिभिः त्वा मधूनां सधमादे जोहवीमि ।

May these thy friends the strong, well-yoked and handsome yellow horses bring thee hither.—May my friend Indra, enjoying the soma-offering accompanied with fried barley, hear the prayers of (this) his friend. 4

Do make me a protector of the people, Do (make me) a King, O liberal One to whom Soma is offered ! Do make me a sage that has drunk the Soma, Do bestow on me the immortal wealth. 5

May te great yellow horses that are exhilarated along with thee, O Indra, bring thee hither being yoked (to the chariot); (those) quick (horses) which, well-touched by thee, the hero, run in straight ways in the two directions of the heaven. 6

Drink, O Indra, of the strong Soma prepared by the strong heroes; the Soma which the Hawk brought for thee that lovest (to drink it); in the exhilaration of which thou didst overthrow the mighty enemies; in the exhilaration of which thou didst throw open the strongholds of the cows. 7

Let us invoke for blessing in this fight, in (this) battle, Indra, possessed of wealth, (and) most brave—(invoke) in battles for protection mighty (Indra), who hears (our prayer), who slays the enemies, and who wins booties, 8 (7)

---

४ च त्वाम् एता सखाया सुधुरा सुअंगा वृषणा हरी आ वहातः । सखा इंद्रः धानावत् सवनं जुषाणः सख्युः वंदनानि शृणवत् ।

५ इंद्र, कुवित् मा जनस्य गोपां करसे । मघवन् ऋजीषिन्, कुवित् राजानं । मा सुतस्य पपिवांसं ऋषिं कुवित् । कुवित् मे अमृतस्य वस्वः शिक्षाः ।

६ इंद्रं, वृहंतः सधमादः हरयः युजानाः त्वा अर्वाक् आ वहंतु । ये शूराः वृषभस्य सुसंमृष्टासः दिवः आताः द्विता प्र ऋञ्जंति ।

७ इंद्र, वृषवृतस्य वृष्णः पिव । यं उशते ते श्येनः आ जभार । यस्यं मदे कृष्टीः प्र च्यावयसि । यस्य मदे गोत्रा अप वर्वर्थ ।

८ अस्मिन् भरे वाजसातौ मघवानं नृतमं इंद्रं शुनं हुवेम शृण्वंतं उग्रं वृत्राणि ध्रंतं धनानां संजितं समत्सु ऊतये ।

SOOKTA 44.

Rishi–Vishwamitra; Deity–Indra.

Let this nice Soma extracted by the nice (stones) be thine. Enjoying, (it) come to us, O Indra, with thy golden horses. Mount thy golden chariot. 1

Desiring the nice Soma, thou dost make the Ushas shine; desiring the nice Soma, thou dost make the sun shine. Knowing and obsrving everything thou, O Indra, possessed of yellow horses, dost promote all glories. 2

Indra upholds the heaven that nourishes the yellow Soma, and the earth of good shape, the great nourishing place of his yellow horses. And between the two, goes the good (Indra). 3

So soon as he has appeared, the good hero illuminates all brilliant space. (Indra) possessed of yellow horses bears the yellow weapon—the yellow thunderbolt–on his shoulders. 4

Indra discovered the lovely, white, strong Soma, extracted with the good stones. He released the cows with his yellow horses. 5

---

१ हरिभिः सुतः हर्यतः अयं सोमः ते अस्तु । इंद्र, जुषाणः हरिभिः नः आ गहि । हरितं रथं आ तिष्ठ ।

२ हर्यन् उषसं अर्चयः हर्यन् सूर्यं अरोचयः हर्यः च, इंद्र, विद्वान् चिकित्वान् विश्वाः श्रियः अभि वर्धसे ।

३ इंद्रः हरिधायसं यां हरिवर्पसं हरितोः भूरि भोजनं पृथिवीं अधारयत् । ययोः अंतः हरिः चरत् ।

४ वृषा जज्ञानः विश्वं रोचनं आ भाति । हर्यश्वः हरितं आयुधं धत्ते । हरिं आ बाह्वोः ।

५ इंद्रः हर्यतं अर्जुनं शुक्रैः अभिवृतं वज्रं हरिभिः अद्रिभिः सुतं अप अवृणोत् । हरिभिः गाः उदाजत् ।

SOOKTA 45.

Rishi–Vishwamitra; Deity–Indra.

Come, O Indra, with thy joyous yellow horses, having hair like the plumage of a peacock. Let no one catch thee, even as the hunters (catch) a bird. Come across them as over the deserts. 1

Indra (is) the destroyer of Vritra, the slayer of Vala, the shatterer of the (enemies') fortresses, the releaser of the waters; he that mounts his chariot to drive his yellow horses, the breaker of even those that are strong. 2

Thou dost fill the perfomer of the sacrifice like the deep sea, yea, like the cows. As the well-guarded cows (run) to the grass (or) as the canals to the lake, even so the (streams of Soma) run (to thee). 3

Bring to us wealth that shall overawe (the enemies), as a (father) gives a portion of his wealth to (his son) that knows his right. Shake down to us, O Indra, wealth that shall fulfil our desire even as a man with a hook (shakes) a tree for a ripe frint. 4

Thou art independent, and a ruler by thy own right. (Thou art) of good rule (and) of independent renown. Growing strong with prowess be, O thou praised by many, the best giver of good property to us. 5

---

१ इंद्र, मयूररोमाभिः मंद्रैः हरिभिः आ याहि । विं नः पाशिनः त्वा केचित् मा नि यमन् । तान् धन्वेव अति इहि ।

२ इंद्रः वृत्रखादः, वलं रुजः, पुरां दर्मः, अपां अजः हयोः अभि स्वरे रथस्य स्थाता दळहा चित् आ रुजः ।

३ गम्भीरान् उदधीन् इव गाः इव क्रतुं पुष्यसि । सुगोपाः धेनवः यवसं यथा कुल्याहदं इव प्र आशत ।

४ प्रतिजानते अंशं न तुजं रयिं न आ भर । इंद्र, पक्वं फलं वृक्षं अंकीव संपारणं वसु धूनुहि ।

५ इंद्र, स्वयुः स्वराट् स्मद्दिष्टिः स्वयशस्तरः असि । पुरुहूत, स त्वं ओजसा वावृधानः नः सुश्रवस्तमः भव ।

SOOKTA 46.

Rishi–Vishwamitra; Deity–Indra.

Great are the exploits of thee the great One,—thou, O Indra, who art warlike, heroic, reigning in thy own right, mighty, ever young, eternal, overpowering, undecaying, wielding the thunderbolt, and renowned. 1

Thou art great, O mighty Indra. With thy powers thou art a conqueror of riches, a subjugator of others, O terrible one! Thou art the supreme king of the universe. Therefore, do thou conquer and settle the people. 2

Resplendent Indra excels the mountains, Indra, unmeasured on all sides, excels the gods, Indra excels heaven and earth by his power; he, to whom the Soma is offered, excels the vast and great firmament. 3

The extracted Somas have from ancient times entered Indra, even as the rivers enter the sea, Indra who is vast, deep, mighty, the capacious lake of hymns offered. 4

The priests are offering to thee that Soma, are purifying, O hero, for thee to drink that Soma, which, O Indra the earth and heaven bears through love for thee, as a mother (bears) a fœtus. 5 (10)

---

१ इन्द्र, युध्मस्य वृषभस्य स्वराजः उग्रस्य यूनः स्थविरस्य धृष्वे अजूर्यत वज्रिणः श्रुतस्य महतः ते वीर्याणि महानि ।

२ महिष, महान् असि । उग्र, धनस्पृत् वृष्ण्येभिः अन्यान् सहमानः । विश्वस्य भुवनस्य एकः राजा । स जनान् योधय च क्षयय च ।

३ रोचमानः मात्राभिः च प्र रिरिचे । विश्वतोप्रतीतः देवेभिः प्र । इन्द्रः मज्मना दिवः पृथिव्याः प्र । ऋजीषी उरोः महः अन्तरिक्षात् प्र ।

४ उरुं गभीरं जनुषा उग्रं मतीनां निश्चव्यचसं अपतं इन्द्रं सुतासः सोमासः समुद्रं सवतः न प्रदिवि आ विशति ।

५ इन्द्र, गर्भं माता न यं सोमं त्वाया पृथिवीद्यावा बिभ्रतः त अध्वर्यवः ते ते द्विन्वन्ति । तव ऊं वृषभ ते पातवा ऊं सृजन्ति ।

SOOKTA 47.

Rishi Vishwamitra; Deity–Indra.

Do thou, O Indra, the hero, with the Maurts, drink the Soma for the battle, for thy exhilaration according to thy strength. Pour the wave of the sweet juice into thy belly. Thou hast ever been the king of the extracred Somas. 1

Do thou, O brave Indra, drink the Soma, thou accompanied by thy troops of the Maruts, thou the killer of Vritra and full of knowledge. Strike the evemies, destroy the foes. And make us free from fear on every side. 2

And O Indra that drinkest in seasons, drink thou our extracted Soma along with thy friends, the brilliant Maruts, with whom thou sharest the (Soma), the Maruts who helped thee to kill Vritra, (and who) gave thee strength. 3

Drink the Soma, O Indra accompanied by the wise Maruts who strengthened thee, O Maghavan, in killing the serpent; who (strengthened) thee, O thou possessed of yellow horses, in the fight with Shambara; who (strengthened) thee in the fight for the cows, and who cheer thee even now. 4

Let us invoke here for new favours that mighty hero accompanied by the Maruts, who has mighty enemies, who is heavenly, who guides and conquers all, and who is the mighty giver of strength. 5

---

१ इंद्र मरुत्वान् वृषभः सोमं रणाय मदाय अनुष्वधं पिब । तृप्तः ऊर्मिं आ जठरे पिन्वस्व । इंद्र सुतानां प्रदिवः राजा असि ।

२ इंद्र, शूर, वृत्रहा विद्वान् मरुद्भिः सजोषाः सगणः सोमं पिब । शत्रून् जहि । मृधः अप तुदस्व अथ नः विश्वतः अभयं कृणुहि ।

३ उत, इंद्र, ऋतुपाः सखिभिः देवेभिः नः सुतं पिब । यान् मरुतः आ अभजः, ये त्वा वृत्रं अन्वहन्, तुभ्यं ओजः अदधुः ।

४ हरिवः, मघवन्, ये अहिहत्ये, ये शाम्बरे ये गविष्टौ त्वा अवर्धनू ये विप्राः त्वा नूनं अनुमदन्ति मरुद्भिः सगणः, इंद्र, सोमं पिब ।

५ मरुत्वन्तं, वृषभं, वावृधानं, अकवारिं, दिव्यं, शासं, विश्वाहं, उग्रं, सहोदां त इंद्र नूतनाय अवसे इह हुवेम ।

SOOKTA 48.

Rishi–Vishwamitra; Deity–Indra.

May he who, when he was born, was at once a youthful warrior, protect the officer of the extracted drink. Drink thou first the excellent drink of Soma mixed with milk, according to thy pleasure. 1

The same day that thou wast born thou didst drink the juice, found on the mountain, of the (Soma) plant, with a desire for it. Thy young mother who gave thee birth gave it to thee to drink first in the house of thy great father. 2

Coming to his mother he asked for it. He saw the brilliant Soma in her udder. Wise (Indra) went, subduing others. He who sees on many sides performed great deeds. 3

He, the terrible, the subjugator, possessed of overpowering strength, assumed forms according to his wishes. Indra having, when born, defeated Twashtri, took away and drank the Soma in the cups.

Let us invoke for blessing in this fight, in (this) struggle, Indra possessed of wealth (and) most brave; (invoke) in battle, for protection, mighty (Indra) who hears (our prayer), who slays the enemies, and who conquers hosts. 5

---

१ सद्यः ह जातः वृषभः कर्वनः सुतस्य अंधसः प्रभर्तुं अवत् । ते प्रतिकामं यथा साधोः रक्षाशिरः सोम्यस्य प्रथमं पिब ।

२ यत् जायया तत् अहः अस्य कामे अंशो गिरिस्थां पीयूषं अपिवः । तं ते जनित्री योषा माता महः पितुः दमे अग्रं परि आ असिञ्चत् ।

३ मातरं उपस्थाय अत ऐं । अभि ऊधः तिग्मं सोमं अपश्यत् । गृत्सः अन्यान् प्रयावयन् अचरत् । पुरुधप्रतीधः महानि चक्रे ।

४ उग्रः तुराषाट् अभिमृत्योजाः एष यथावशं तन्वं चक्रे । इन्द्रः जनुषा त्वष्टारं अभिभूय चमूषु सोम आसुष्य अपिवत् ।

५ अस्मिन् भरे वाजसातौ मेघवानं नृतमं इंद्रं शुनं हुवेम । शृण्वंतं उग्रं वृत्राय घ्नन्तं धनानां सजित समत्सु ऊतये ।

SOOKTA 49.

Rishi–Vishwamitra; Deity–Indra.

Praise great Indra, in whom all men, having drunk the Soma, have attained their desire, who, the performer of great deeds, was born of heaven and earth, and whom the gods prepared for striking the enemis with a hammer shaped by Vibhava. 1

Impetuous Indra destroyed the life of the Dasyu--(Indra) whom, the supreme king and the best of heroes, mounted on his yellow horses, none can defeat in battles, and who, with the mighty heroes, (the Maruts), is the greatest lord. 2

Mighty, victorious in battles like a war-horse, the filler of both the worlds, bountiful (Indra) is fit like a great king to be invoked by praisers in a hymn. (Indra) the giver of food is dear and accessible like a father. 3

He is the dear and excellent supporter of the heaven (and)of the firmament. He is like a chariot. Aided by the good (Maruts) he is, like Vayu, accompanied by his mares, the spreader of the nights and the creater of the sun. He distributes wealth even as the order (of a rich man) distributes wealth. 4

Let us invoke for blessing in this fight, in (this) struggle, Indra possessed of wealth (and) most brave-(invoke) in battles for protection mighty (Indra) who hears (our prayer), who slays the enemies and who conquers booties. 5

---

१ यस्मिन् विश्वाः कृष्टयः सोमपाः कामं आ अव्यन्, यं सुकृतं धिषणे, देवा विभ्वतष्टं वृत्राणां घनः जनयन्त मर्हां इंद्र शंस ।

२ स्वराजं वृतमं हरिस्थां धृतनासु नकिः द्रिता तरति, यः ह सत्वभिः इनतमः, पृथुञ्रयाः दस्यो, आयु अमिनात् ।

३ सहावा पृत्सु अर्वा न तरणिः रोदसी स्थानशिः मेहनावान् कारे मतीनां भगः न हव्यः । वयोधः पितेव चारु सुहवः ।

४ दिव, रज्सः पृष्टः धर्ता । रथः न ऊर्ध्वः । वसुभिः नियत्वान् वायुः । क्षपां वस्ता सूर्यस्य जनिता धिषणा भाग इव वाजं विभक्ता ।

५ अस्मिन् भरे वाजसातौ मेघवानं नृतमं इंद्रं शुनं हुवेस । वृण्वन्तं उग्रं वृत्राणि घ्नन्तं धनानां संजितं समत्सु ऊतये ।

SOOKTA 50.

Rishi-Vishvamitra; Deity-Indra.

May Indra the mighty hero, accompanied by the Maruts come and drink the Soma offered with the exclamation Swáhà. For, his is the Soma. May he who is a vast respectacle (for the Soma) fulfil (our desire) by means of these offerings, May the oblation gratify the desire of his body. 1

I yoke the pair of obedient horses hitherward for speed, they whose speed thou hast always loved from ancient times. May thy golden horses place thee here, O Indra of handsome lips. Do thou quickly drink this beautiful well-extracted Soma. 2

(The priests) have placed the beneficial Soma flowing with milk entreating Indra to drink it as the eldest (of the gods).-O Indra, to whom belongs the Soma, drink the Soma ard being exhilarated, send us cows in various ways. 3

Gratify this desire with cows and horses, and spread (our) fame with resplendent wealth. Desirous of wealth the pious sons of Kusika have with pious feelings composed the hymn for thee, Indra. 4

---

१ यस्य सोमः तुभ्रः मरुत्वान् वृषभः आगत्य स्वाहा पिबतु । उरुव्यचाः एभिः अनैः पृणतां । हविः अस्य तन्वः कामं आ कृण्वाः ।

२ ते सपर्यू जवसे आ युनज्मि । ययोः श्रुष्टिं प्रदिवः अनु आवः । सुशिप्र, हरयः त्वा इह वेयुः । तु अस्य सुसुतस्य चारोः पिब ।

३ इंद्रं ज्यष्ठयायै धायसे गृणानाः गोभिः मिमिक्षु सुपारं दधिरे । ऋजीषिन, सोमं पपिवान् मन्दानः अस्मभ्यं पुरुधा गाः सं इषण्य ।

४ इमं कामं गोभिः अश्वैः मंदय । चंद्रवता राधसा पप्रथः । स्वर्यवः विप्रः कुशिकासः मतिभिः तुभ्यं इन्द्राय वाहः अकृन ।

Let us invoke for blessings in this fight, in (this) struggle, Indra possessed of wealth (and) most brave—(invoke) in battles for protection nighty (Indra) who hears (our prayer), who slays the enemies, wo conquers booties. 5

SOOKTA 51.

Rishi–Vishwamitra; Deity–Indra.

May great hymns celebrate Indra, the supporter of men, possessed of wealth, deserving to be praised, growing strong, invoked by many, immortal, (and) daily praised with well composed songs.

My hymns run from all sides to Indra, the sea possessed of a hundred intellects, (and) the mighty hero, (Indra), the giver of wealth, the breaker of the enemies fastnesses, the victorious sender of the rainwaters, firm in his seat, overpowering, and the giver of heaven. 2

The poet is commended in the house of (Indra) the giver of bliss. Indra honours sinless praises. For he is delighted in the house of the sacrificer. Praise (Indra), the conqueror of all, the killer of the insolent foe. 3

---

५ अस्मिन् भरे वांजसातौ मेधवानं नृतम इंद्रं हुवेम । शृण्वन्तं, उग्रं, वृत्राणि जन्तं धनाना संजितं समत्सु ऊतये ।

१ बृहतीः गिरः चर्षणीवृतं मघवानं उक्थ्य ५.वृधानं पुरुहूतं अमर्त्यं दिवेदिवे सुवृक्तिभि जरमाणं इंद्रं अभ्यनूषत ।

२ मे गिरः शतक्रतुं अर्णवं शाकिनं नरं वाजसनिं पूभिंदं तूर्णि अन्तुरं धामसाचं अभिपाचं स्वर्दिदं इंद्रं विश्वतः उपयन्ति ।

३ वसोः आकरे जरिता पनस्यते । इंद्रः अनेहसः स्तुभः दुवस्यति । हि दिवस्वतः सदने आ पिप्रयि । सत्रासाहं अभिमातिहनं स्तुहि ।

The priests have worshipped thee, O hero, the best of warriors, with hymns (and) songs.--He, the performer of many exploits, runs to our help. Salutation (be to him). He has ever been the sole master of this (world) 4

Many are his commands among mortals, many (are the) blessings the earth contains. For Indra, the heaven, the plants, and the waters, the men (and) the trees preserve the wealth. 5

They offer thee praises, offer, O Indra, hymns to thee. Enjoy (them), O thou possessed of golden horses. Be thou our friend for new favoars. Give blessings to the praisers, O good friend ! 6

Drink here, O Indra accompanied by the Maruts, the Soma even as thou didst drink the extracted juice in the house of Syaryata. Under thy guidance and, O hero, under thy protection, the poets with good oblations worship thee. 7

---

४ इंद्र, सबाधः नृणां ऊं नृतमं वीरं त्वा गीभिः उक्थैः अभि प्र अर्चत पुरुमायः सहसे सं जिहीत । नमः । प्रदिवः अस्य एकः ईशे ।

५ अस्य निष्विधः मर्त्येषु पूर्वीः । पुरू वसूनि बिभर्ति । इंद्राय द्यावः ओषधीः उत आपः जीरव वनानि रयिं रक्षंति ।

६ इंद्र, तुभ्यं ब्रह्माणि, तुभ्यं गिरः सत्रा दधिरे । हरिवः जुषस्व । नूतनस्य अवसः आपिः बोधि । वसं सखे जरितृभ्यः वयः धाः ।

७ मरुत्वः इंद्र, यथा शार्याते हुतस्य अपिवः इह सोमं पाहि । हे शूर, तव प्रणीती तव शर्मन् आ सुयज्ञाः कवयः विवासन्ति ।

Do thou, therefore, O Indra, drink here lovingly our Soma with thy friends the Maruts. For, all the gods prepared thee, O thou invoked by many, for a great battle when thou wast born. 8

He was your friend, O Maruts, in the exploit about the waters,—the bounteous (Maruts) congratulated Indra. May the destroyer of Vritra drink with them the extracted Soma in the sacrificer's own house. 9

For this (has been) extracted with all (our) strength, O lord of gifts! Do thou drink it quickly, O thou fond of praises! 10

Direct thyself unto the extracted juice, which is suited to thy strength. May it exhilarate thee who deservest the Soma. 11

May it penetrate thy belly, May it penetrate thy head with the hymn, O Indra; may it penetrate thy arms, O brave warrior, to give us wealth. 12(16)

---

८ इन्द्र, स वावशानः सत्रिभिः सजोषाः नः सुतं सोमं दह पाहि। पुरुहूत, जातं त्वा विश्वे देवाः महे भराय पर्यभूषन्।

९ मरुतः एष ते स्तृभ्यो वयिः। दातिवारः इन्द्रं अवर्धयन्। तेभिः वार्कं वृत्रखादः दासुषः स्वे सधस्थे सुतं सोमं पिबतु।

१० राधानां पते, इदं अनु ओजसा सुतं हि। निर्वेशः तु अस्य पिब।

११ यः ते अनु स्वधः असत् सुते तन्वं नि मर्जते। स सोम्यं त्वा मदतु।

१२ इंद्र, ते कुक्ष्योः प्राश्नोतु। ब्रह्मणा शिरः प्र। शर, राधसे बाहू प्र।

SOOKTA 52.

Rishi–Vishwamitra; Deity–Indra.

Do thou enjoy in the morning O Indra, our (Soma) accompanied by the fried corn, by the barley mixed with curds, by the sacrificial food (and) by the hymn. 1

Do thou enjoy, O Indra, the well-cooked sacrificial food and commend it. For thee are the flowing the oblalions. 2

Eat thou our sacrificial food, and also enjoy our hymns even as an amorous man (enjoys) a young woman. 3

Do thou enjoy our sacrificial food in the morning sacrifice, O thou renowned from antiquity ! for, great is thy exploit, O Indra ! 4

Acept here, O Indra, (as) agreeble, the fried barley and the sacrificial food of the midday sacrifice, when the pious praiser, active and powerful, praises (thee) with hymns. 5

And do thou honour our fried barley and our offered sacrificial food, in the third sacrifice O thou praised by many. We will worship, O wise one, with food and hymns, thee, accompanied by Ribhu and by Vaja. 6

---

१ इन्द्र, प्रातः धानावन्तं करम्भिणं अपूपवन्तं उक्थिनं नः जुषस्व ।

२ इन्द्र, पक्त्र्यं पुरोळाशं जुषस्व आ गुरस्व च । तुभ्यं हव्यानि सिस्रते ।

३ नः पुरोळाशं च पचः । वधूयुः योषणां इव च नः गिरः जोषयासे ।

४ सनःश्रुत, प्रातःसावे नः पुरोळाशं जुषस्व । इन्द्र, ते क्रतुः बृहन् हि ।

५ इन्द्र, माध्यंदिनस्य सवनस्य धानाः पुरोळाशं इह चारुं कृण्व । यत् स्तोता जरिता तूर्ण्यर्थः वृषायमाणः गीर्भिः प्र उप ईट्टे ।

६ पुरुस्तुत, तृतीये सवने नः धानाः आहुतं पुरोळाशं ममहस्व । कवे, प्रयस्वन्तः धीतिभिः ऋभुमन्तं वाजवन्तं त्वा उप शिक्षेम ।

We have made the offering of barley and curds for thee and Pusha, (and) fried barley for thee and thy horses, O thou who art possessed of yellow horses. Eat the sacrificial food, accompanied by thy train of the Maruts. Drink the Soma, O brave one, thou the knowing one, the killer of Vritra. 7

Offer quickly (O friends) the fried barley to him, (and) the sacrificial food for the best of heroes among warriors.—Every day O Indra ! the same (kind of) fried barley (is offered) to thee, may it invigorate thee, O victorious one, to drink the Soma. 8

SOOKTA 53.

Rishi—Vishvamitra: Deity—Indra.

O Indra and parvata, do you bring in (your) great chariot delightful food with brave heroic sons. Eat the offerings in the sacrifices, O brilliant ones ! Be ye invigorated with the hymns, being exhilarated with the drink. 1

Do thou stay here O Maghavan, do not go. Let me worship thee just now with the well-extracted soma. With the sweetest hymn I seize the end of thy garment, O mighty Indre, even as a son (seizes) that of his father. 2

---

७ पूषण्वते ते करम्भं चक्रम । हरिवते हर्यश्वाय धानाः । मरुद्भिः सगणः अपूपं अद्धि । शूर, वृत्रहा विद्वान् सोमं पिब ।

८ अस्मै नृणां वीरतमाय धानाः पुरोळाशं सूर्य प्रति भरत । इन्द्र, दिवेदिवे सदृशीः तुभ्यं । वृष्णो, ताः त्वा सोमपेयाय वर्धन्तु ।

१ इन्द्रापर्वता, बृहता रथेन वामीः सुवीराः इषः आ वहतं । देवा, अध्वरेषु हव्यानि वीतं । इळया मदन्ता गीर्भिः वर्धेथां ।

२ मघवन्, सु कं तिष्ठ । मा परा नाः । सु त्वा सुसुतस्य सोमस्य याचिषं । शचीवः, पितुः न पुत्रा स्वादिष्ठया गिरा ते सिचं आ रभे ।

Let us both praise, O Addhvaryu. Respond to me. Let us make an agreeable hymn for Indra. Come and sit on this kusá (grass) of the sacrificer. And let a song be chanted for Indra. 3

The wife is the house, O Maghavan, she is the home. May thy yellow horses carry thee thither. and whenever we shall extract the Soma, may Agni the messenger run to thee. 4

Go Maghavan, and come, O brother Indra, There is need of thee in both places. There where the vast chariot shall set down, there shall happen the unharnessing of the neighing steed. 5

---

१७ दुधितं तमः नेशत् द्यौः रोचत, देव्याः उषसः भानुः उत् अर्त । मर्तेषु ऋजु वृजिता च पश्यन् सूर्यः बृहतः अञ्जान् आ तिष्ठत् च ।

१८ आदित् पश्चा बुबुधानाः ते आदित बुभक्तं रत्नं वि अक्ष्यन्, धारयंत च । (ततः) विश्वे देवाः विश्वासु दुर्यासु (प्राविशन्), हे मित्र वरुण (तत् एतद्) अद्य यजमानाय सत्यम् अस्तु ।

१९ शुशुचान् होतारम्, विश्वभरसं अग्निं अच्छा वोचेय । अयं गवाम् शुचि ऊधः न अतृणत्, न च अनेन पूतं अंधः अंशोः परिषिक्तम् अस्ति ।

२० विश्वेषां यज्ञियानां अदितिः, विश्वेषां मनुषाणां अतिथिः च अयम् जातवेदाः देवानां अवः अवृणानः, (नः) सुमृळीकः भवतु ।

SOOKTA 2.

Rishi–Vishwamitra; Deity–Vishwedewas.

May He, immortal God, loving the true Faith, and, established both among the mortals and celestial benigs,may He, the most revered divine Priest, Agni, begin to shine forth effulgence to impel the human world to their duties 1

Appearing here, O Son of Energy, thou dost go forth, O Agni, between the two worlds as their Mediator, yoking, O Most High, thy stallions, vigourous and splendid. 2

I am thinking of those energetic ruddy steeds of thy car of Truth--the steeds that shed showers of prosperity and ghrita on the worshipper, and that surpass even the mind in swiftness. Thou passest on, harnessing thy red coursers through the world of the gods and of thy hnman subjects. 3

Bring Aryaman, Varuna, Mitra, Indra with Vishnu, and the Maruts with the Ashvins, O Agni, in thy elegant car with fine steeds. Bring them thou, gracious God, to the wosshipper who is ready with his excellent offering. 4

---

१ यः अमृतः देवः मर्त्येषु ऋतवा (इति), देवेषु अरातिः (इति) विधायि । सः जजिष्टः होता, अग्निः मह्ना हव्यैः च शुचध्यै मनुष्य ईरयध्यै (प्रवर्तताम्) ।

२ महसः सूनो अग्ने त्वम् नः अद्य इह चातः उभयान् जातान् अंतः दूतः सन् ईयसे । हे ऋष्व ऋजुमुष्कान् वृषणः शुक्रान् च युयुजानः ईयसे ।

३ तव ऋतस्य (रथस्य) बृबसनू घृतस्नू रोहिता अत्या, मनसोषि अविष्ठा इति मन्ये । तौ अरुषा युजानः युवमान् देवान् च मर्त्यान् विशः च आ अंत ईयसे ।

४ हे अग्ने स्वश्वः सुरथः सुराधाः सन् अर्यमणं मित्रं वरुणं इंद्राविष्णू मरुतः उत आश्विनाच च एषां दृढविषे जनाय आदित् आ वह ।

Abounding in kine, ghee and steeds (of knowledge, goodness, and intellect,) may this our sacrifice be rewarded with the friendship of valiant men and with indestructible efficacy. O Almighty God, may it be rich in nourishing power and progeny. May lasting wealth attend it resting on a secure pedestal and appreciated by the assembly (of the people). 5

The worshipper, who, sweating profusely, fetches the sacred fuel (for thy worship), or whose devoted head is sweltering for thee alone; of him dost thou, self--puissant, become the defender, wherefore dost thou guard him, O Agni, from all sorts of evil doers. 6

With him who presents offerings to thee that art rich in food; who pours forth the delightful Soma and extols thee, the divine guest of men; or who, devoted to God, enkindles thee on the alter--with him may abide the eternal wealth which awakens generous impulses. 7

Who so praises thee at eve and morn, and, bearing oblations, would gratify thee even as a richly-caparisoned charager, standing ready in the stable, would (gratify his master), him, that generous worshipper, wouldst thou bear through all sin. 8

---

५ हे अग्ने एष यज्ञः गोमान् अविमान्, आश्वी, नृवत् सभा सदसित् अप्रमृष्यः, इळावान् प्रजावान् भवतु, । हे असुर, दीर्घः पृथुबुध्नः सभावान् च रविः नः भवतु ।

६ यः सिष्विदानः ते इध्मं जभरत्, त्वाया वा (स्वीयं) मूर्धानम् ततपते । स्ततवान् त्वं तस्य वायुः भुवः, हे अग्ने विश्वस्मात् अदयतः सीम् उरुष्य ।

७ ते अत्रियते यः चित् अन्न भरात्, मेहं निशिषत्, अतिथिं त्वा उदीरत् । यश्च देवयुः त्वा दुरोणे आ इन धते, तस्मिन् ध्रुवः दाम्वान् च रयि कस्तु ।

८ यः त्वा दोषा उपसि च प्रशंसात् यो वा हविष्मान् त्वा प्रियं कृणवते । यश्च स्व दमे आ हेम्वावान् अश्वो न (त्वां उपासते) तं दाश्वांसं अंहसः पीपरः ।

He who sacrifices to thee, immortal God, and, with lifted ladles offers thee worship, never is that suppliant adorer separated from (divine) wealth and never shall the sinner's perfidy overpower him. 9

The mortal whose well--achieved sacrificial rite thou, joyous God, art pleased to accept--may his holy offering bring thee delight, O our youthful God, aud may we (also be able to) contribute to the prosperity of that servant of thine. 10

He, that all-discerning God, can alone distinguish between sagacity and folly. He alone knows the mortals and their honest and crooked ways as if he would mark the *Prishtha* psalms. Bestow on us, O God, thy divine wealth for our self-dependence, favour us with generous impulses and clear our way to emancipation. 11

Thee, as the greatest Genius, have the unrivalled poets extolled and established in the hall of thy order. From that place, O Lord Agni, thou dost watch, with thy quick eyes, all these visible and invisible (i. e. future) generations of living beinsg. 12

---

९ हे अग्ने य स्तुभ्यं अमृताय दाशत्, यतस्रक् च त्वे दुवः कृणवते । न सः शशमानः रायः वियोषत्, न च अघयोः अंह एनं पारवरत् ।

१० हे अग्ने त्वं देवः रराणः सन् यस्य मर्तस्य सुधितं अध्वरं जुजोषः । हे यविष्ठ, यस्य सा होत्रा प्रीता इत असत् त्वां विधतः तस्य (वयमपि) वृधासः असाम ।

११ विद्वान् सः चित्तिम् अचित्तिम् चिनवत्, वीता वृचिना मर्तान् च पृष्ठेव (चिनवद्) । देव, राये च सु अपत्याय च दितिम् रास्व अहितिम् उरुष्य ।

१२ अदब्धा क्रवयः आयोः दुर्यासु त्वां कविं निधारयंतः शशासुः अतः हे अग्ने त्वं अर्यः एवैः पदोभिः एतान् दृश्यान् अदृभुतान् च पश्येः ।

An excellent guide thou art to the humble adorer that pours out Soma to thee, O ever youthful Agni. Bring, O radiant God to him that praises thee, O Soveregin of people, the gem (of thy mercy) invaluable and attractive. 13

We, O Agni, thy devoted servants, with our hands, feet, and bodies as well, have toiled for thy favour, and, like the car which the dexterous control with both their arms, the wise also, through pious actions, have adhered to thy eternal Law by fixing their thoughts well on thee during worship. 14

May we be born of the mother (Ushas) as the seven sages, the first ancestors of our valiant descendants. May we be known as sons of heaven, and, glowing with mighty splendour, may we be able to rend to pieces the mountain that has concealed our treasure. 15

And just as our illustrious forefathers of old following, O Agni, the teaching of thy true Faith, did attain purity and the light of meditation, so, we too, singing thy hymns, have crushed the (stronghold of) draught and let out the rosy floods of morning showers. 16

---

१३ ह अग्ने यविष्ठ, त्वं वाघते, सुतसोमाय विधते सुप्रणीति । तद् वृष्वे चर्षणिऽप्राः त्वम् शश-
[illegible] पृथुचेद्र रत्नं भर ।

१४ अध ह हे अग्ने वयम् त्वाया पट्भिः हस्तेभिः तनूभिश्च यत (सुकृतं) चकृम । कृतः भुरिजोः रथं (यमुः) न, (तथा तेपि) आशुषाणा सुध्यः अपसा ऋतं येमुः ।

१५ अध वयं सप्तविप्राः नृन् प्रथमाः वेधसः उषसः मातुः जायेमहि । वयं अंगिरसाः दिवः पुत्राः भव , शर्चंतः धनिनं अद्रिम् सजेम ।

१६ अध हे अग्ने यथा नः परासः प्रत्नासः पितरः ऋतम् आशुशाणाः शुचि दीधितिम् इन् अयन् । तथा ते उक्थ शमः संतः क्षाम भिंदंतः अरुणीः अपव्रन् ।

The pious, brilliant, God--devoted and godly Angirasas completely smelted like iron ore all their lives. They enkindled and gratified Agni. They glorified Indra, and, surrounding the mighty herd of (celestial) kine, recovered possession of the same. 17

Even as the herdsman would watch the herd of cattle grazing in rich pasture, so thou too, O aweful God, hast been observing the lives of the gods very closely. Wherfore have their earnest desires (tha Urvishis) been yearning for (the welfare of) mankind, and especially of that noble adorer who was nearest to them. 18

Thee have we served and gained our lofty purpose. The brilliant Ushas have lighted the path of the true Faith and much have we too embellished, perfect and majestic Agni, the eye of the almighty God. 19

O Agni, O Ordainer, thus have we sung praises to thee, the divine poet. Pray accept them, flash up thy sheen, prompt us to desire thy most precious treasure and grant us, O God, loved by all, thy hightest (and heavenly) affluence. 20

---

१७ सुकर्माणः, सुरुचः, देवयंतः ते देवाः (इव स्वानि) जनिमा अयो न धमंतः, अग्निम् शुचंतः, इंद्रं ववृधंतः ऊर्वम् गव्यं परिषदंतः अग्मन् ।

१८ हे उग्र शुभंयो (व्यूतौ) आ यूथा पश्वः इव, सः यत् देवानां जनिमा अंति अख्यत् । (एतेषा) उर्वशीः मर्तानाम् चित् उपरस्य अर्यः आयोः चित् बृधे अकृन्वन् ।

१९ ते अकर्म, सुअपसः अभूम, विभातीः उषसः ऋतम् अवस्रन् । तथा च अनूनम्, सुचन्द्रम् अस्य चारु चक्षुः अग्निम् (वयं) मर्मृजतः (स्मः) ।

२० हे अग्ने वेधः, एता उचथानि ते कवये अवोचाम, ता जुषस्व । उत् शोचस्व, नः वस्यसः कृधि, हे पुरुवार, महः रायः प्र यन्धि ।

SOOKTA 3.

Rishi–Vishwamitra; Deity–Vamadev

Set in front of yourself Agni, who, as Rudra ,is Lord of the holy Rite, and the world's true sacrificing Priest of (imperishable) golden hue; (set Him) for your protection ere any unexpected calamity has overtaken you. 1

Here have we prepared for thee this seat, which, decked with pretty clothing, is awaiting thee as a wife, richly attired, longs to meet her wedded lord. Turning thee hither, girt by thy divinities, take thy seat here. Verily these our praises are going forth to thee, O Lord of pure deeds. 2

To Him who attentively listens to the humble adorer and who is absolutely free from pride; to him turn, O talented poet, thy thoughts who watches all men in mercy. Offer thy sincere eulogy to the immortal God to whom even the Soma pestles while pressing out the juice, are singing forth their praises 3

Wilt thou, O Agni, that knowest the eternal Law, now take heed of this our solemn effort for holy Truth? Thou alone dost perceive the Truth and art truly thoughtful. When shall we be able to sing the sacred psalms usually sung at sacrificial feats, and when shall we form a close acquaintance with thee in our own home? 4

---

१ व अध्वरस्य राजानं रुद्रं, रोदस्यो सत्ययजं होतारं हिरण्यरूपं अग्निम् अचित्तात् तनावेत्नोः पुरा अवसे कृणुध्वम् ।

२ अयम् योनिः वयं ते चकृम, संचि सुवासाः, सुवासाः जाया पत्ये इव ते उशती (भवति) । तद् त्वं अर्वाचीनः परिवीतः निषीद, हे सुअपाक इमाः उ (ऋचः) ते प्रतीचीः ।

३ हे वेधः आशृण्वते अदविताय, नृचक्षसे, सुमृळीकाय अग्ने मन्म, देवाय अमृताय शस्तिम् च शंस । यम् मधुषुत् सोता प्रावा इव ईळे ।

४ हे त्वं चित् नः अस्याः शस्याः बोधि त्वम् च कृतंचित् स्वाधीः च । ते सचमानाः उक्था कदा (भवंति) गृहे मे ते सख्या कदा भवन्ति ।

Why wouldst thou condemn us, O Agni, before Lord Varuna or heaven? What fault have we committed? What wilt thou say about us to bounteous Mitra or to the earth? What wilt thou tell (against us) to Aryaman and Bhaga? 5

What fault of ours, O Agni, blazing on the lesser alters, wilt thou disclose to Mighty Vata that bringth felicity? What, O Agni, wilt thou say to the truthful Nasatya that encircles the firmament and what to Rudra that slays the offending man? 6

What (wilt thou speak) to Pushan that nourishes the world, or to Rudra that allots oblations to the gods? What sin of ours wilt thou give out to the world-striding Vishnu and what, O Agni, to the terrific Thunders? 7

Again, what wilt thou say to the army of the faithful Maruts? What wilt thou speak to the great dazzling sun when thou art questioned? What reply wouldst thou give to the promptly succouring God that emancipates (the pious)? Reconcile, O wise Jatavedas, all thy heavenly powers to us. 8

---

५ हे अग्ने त्वं वरुणाय तत् कथा ह, दिवे च कथा गर्हसे कत् आगः । कथा मीळ्हुषे मित्राय पृथिव्यै कथा ब्रवः, कद् अर्यम्णे, कद् भगाय ब्रवः ।

६ हे अग्ने विष्णवादु वृधसानः ऋतवसे ह्रुग्ये नाताय कत् (ब्रवः) । परिज्मने नासत्याय क्षे च, हे अग्ने, नृम्ने रुद्राय च कद् ब्रवः ।

७ महे पुष्टिंभराय पूष्णे कथा, सुमत्वाय हविर्दे रुद्राय कत् (ब्रवः) । उरुगायाय विष्णवे कत् रेतः ब्रवः, हे अग्ने बृहत्यै शखे कत् (ब्रवः) ।

८ मरुतां ऋताय शर्धाय कया, पृच्छायमानः सन् बृहते सूरे कथा (ब्रवीषि) । तुराय अदितये कत् प्रति ब्रवः सन् बृहते सूरे कथा (ब्रवीषि) । तुराय अदितये कत् प्रति ब्रवः, हे जातवेदः चिकित्वान् त्वम् दिवः नः साध ।

I glorify the true Faith through its own eternal Truth. Wherefore, although, O Agni, thy sacrificial cow appears quite young, her milk is mellow and delicious; and though she is sable of colour she is teeming with nourishing and immortalising drink. 9

With the milk of eternal Law, Agni, that manly champion, is himself suffused on the back. Unflinching goes the Hero that imparts youthful evergy, making the piebled cow (of heaven) yield sparking milk from her udder. 10

By (virtue of) eternal truth, the Angirasas have dashed the rock to pieces, and winning back the celestial kine, have sung their praiser to the God. Those heroes then regained (the light of) the Ushas, the embodimeent of universal felicity, and the sun appeared above the horizon after Agni had sprung up (from the alter). 11

By eternal Truth, O Agni, the celestial Waters, stainless and immortal, roll on with their sweet surging flood, and, like a warrior, incited to attack, they rush rapidly onward to fall into the sea. 12

Never go, O God, to the sacrifice offered by the fraudulent miscreant, by the hypocritic neighbour, or by our perfidious kinsman. Avenge not, O Agni, the debt of (the guilt of) our brother and never may we be obliged to depend for our livlihood upon the honesty of the friend or foe. 13

---

९ ऋतेन नियतं ऋतं आ ईळे, हे अग्ने गोः आमा सन्ना मधुमत् पक्वं च (ददाति) । एषा कृष्णा सती रुशता धासिना जामर्येण पयसा पीपाय ।

१० ऋतेन पयसा पुमान् वृषभः अग्निः चित् पृष्ठयेन अक्तः हिस्म । अस्वंदमानः वयोधाः सः वृषा अचरत्, पृश्निश्च ऊधः शुक्रम् दुदुहे ।

११ ऋतेन अद्रिम् भिंदन्तः वि असन्, अंगिरसः गोभिः सं नवन्त । नरः उषसम् (जगतः) शुनं परिषदन्। ततः अग्नौ जाते स्वः आविः अभवत् ।

१२ (आपो) देवीः ऋतेन अमृताः, अमृक्ताः, हे अग्ने मधुमद्भिः अर्णोभिः (प्रवहन्ति । सर्गेषु प्रस्तुभानः वाजी न, एताः सदमित् (समुद्रं) स्रवितवे प्र दधन्युः ।

१३ कस्य चित् हुरः यक्षम् सदमित् मा गाः, मा (दुरात्मनो) वेशस्य, प्रमिनतः आपेथापि मा गाः । हे अग्ने अनृजोः भ्रातुः ऋणम् मा वेः, सुख्युः रिपेः वा दक्षं मा भुजेम ।

Guard us with thy succours, O Agni, O worshipful Lord, as thou, delighted with us, hast been guarding us ever since. Blaze up intensely, smash the sin that has firmly clung to us, and destroy the demon waxing stronger and stronger. 14

Be gracious, O Agni, with these loudly chanted praises. Pleased with our sincere prayers, put our warriors on the back; accept our hymns, O Angiras, and may thy praise which is so dear to the gods, sing forth thine exploits alone. 15

For thee, O all-knowing Agni, are sung these thy inscrutable ways, thy occult words, and thy hymns. To thee the divine Poet, I, thy humble adorer, have, with all my heart chanted these poetical verses along with the Sama hymns. 16

SOOKTA 4.

Rishi–Vamadev; Deity–Rakshoghna Agni

Spread out thy splended lustre like a huge wide-spread net; go forth like a mighty sovereign parading on an elephant. Hotly pursuing (the enemy) thou dost decimate these hostile hords rushing to assail us, and dost smite down the demons with thy fierce flames. 1

---

१४ हे अग्ने सुमख प्रीणानः ररक्षाणश्च सन् नः तव रक्षणेभिः रक्ष । प्रतिष्फुर, वीळु अंहः विरुज, महि हि वावृधानं रक्षः जहि ।

१५ हे अग्ने त्वं एभिः अर्कैः सुमनाः भव, हे शूर एभिः मन्मभिः इमान् वाजान् स्पृश । हे अंगिरः उत ब्रह्माणि नः जुषस्व, वावाता इयं ते शस्तिः (तव गुणान्) सं जरेत ।

१६ हे वेधः, एता ते विश्वा निण्या नीथानि, ते निण्या वचांसि, निवचना च तुभ्यं विदुषे, एतानि च काव्यानि तुभ्यं कवये अहं विप्रः मतिभिः उक्थैश्च अशंसिषम् ।

१ अग्ने पृष्वीम् प्रसितिं न पाजः कृणुष्व, अमवान् राजा इमेन याति तमिव त्वं याहि । प्रसिति । तृष्वीम् अनु द्रूणानः त्वम् (शत्रून्) अस्तासि, तपिष्ठैः रक्षसः विध्य ।

Thy whirling missiles fall swiftly on the enemies. Do thou overtake them burning furiously with rage, and, ceaselessly throw out, O Agni, with thy flaming tongue, terrible heat, cinders and blazing firebrand. 2

Send forth thy spying beams; thou art exceedingly prompt to succour thy worshippers. Thou ever, invisible, be the guardian of thy humble people against the wicked sinner who standeth near or afar, and let not thy convulsing wrath bring about our dawnfall. 3

Prey, get up, O Agni, displaying thy dreadful form in front of the enemies; burn them down, O God, with thy finely furbished weapons. That man, O effulgent God, who mortally hates us, him do thou scorch up as if he were dried up brushwood. 4

Get thyself ready, strike (the evil spirits) off from us, and manifest thy divine glories, O Agni, (unto us). Unsettle the fixed designs of witches and crush the foeman whether related to us or not. 5

---

२ तव भ्रमासः आशुया पतन्ति, शोशुचानः त्वं धृषता (अरीन्) अनु स्पृश । हे अग्ने असंदितः त्वम् जुह्वा तपूंषि, पतङ्गान्, उल्काः च विष्वक् विसृज ।

३ प्रतिस्पशः, विसृज, तूर्णितमः अदब्धः त्वम् अस्या विशः यः नः दूरे वा यः नः अन्तिवा अघशंसः (स्यात् अस्मात्) पायुः भव । हे अग्ने, ते व्यथिः मा माकिः आ दधर्षीत् ।

४ अग्ने उतिष्ठ, प्रत्यातनुष्व, तिग्महेते अमित्रान् नि ओषतात् । समिधान, यः नः अरातिम् चक्रे तं शुष्कं अतसं न नीचा धक्षि ।

५ ऊर्ध्वः भव, अस्मत् अधि प्रतिविध्य, अग्ने दैव्यानि आविः कृणुष्व । यातुजूनां स्थिरा अवतनुहि आमिं ता अजाम्मि धत्तूत् प्रभणीहि ।

He alone knoweth thy good intentions who, O ever youthful God, giveth full scope to thy spirited hymn (within his heart). For him dost thou, as his Lord, render all his days auspicious, and dost illuminate his humble home with thy divine wealth and splendour.

6

May he alone, O Agni, be blessed who doth liberally adore thee with the lasting offering (of devotion) and with the Sama hymns. To him may all the days pass fairly who tries his best to places thee at thy alter throughout his life; and may that desire of his be fulfilled.

7

Here I am loudly chanting thy praises before thee. May this praise-this thine beloved song--sing thy glory alone. Endowed with the steed (of intellect), may we become the foremost of warriors and may thou maintain our dominating influence intact.

8

Here, in this sacrificial hall, every one should, of his own accord, adore thee that glowest intensely refulgent every day at night and morn. So let us worship thee with joy and devout heart, (and enjoy thy bliss) surpassing the glories that men can attain in this world.

9

He, who, rich with the steed (of intellect), and the gold (of piety), approaches thee, O Agni, with his car full of the wealth of devotion, his best friend dost thou become, yea, his protector too, who feels happy in duly honouring thee as his guest.

10

---

६ यविष्ठ यः ईवते ब्रह्मणे (हृदे) गातुम् एरत स ते सुमतिम् जानाति । अस्मै विश्वानि सुदिनानि (भवन्तु) अर्यः रायः विदुरः अभि द्यौत् ।

७ अग्ने, यः त्वा नित्येन हविषा यः उक्थैः हिरीषति स इत् सुभगः सुदानुः (भूयात्) । यः स्वे आयुषि दुरोणे (प्रियायति) अस्मे इत् विश्वा सुदिना (भूयासुः) सा इष्टिः रस्य (पूर्णा) असत् ।

८ ते सुमतिं घोषि अचामि, अर्वाक् (भव) । इयं गीः ते वावाता त्वां एव जरतां । वयं स्वश्वाः सुरथा, त्वा मर्जयेम, अस्मे अनुद्यून् क्षत्राणि धारयेः ।

९ दोषावस्तः अनुद्यून् दीदिवांसं त्वा उपासकः त्मन् इह भूरि उपा चरेत् । अतः वयं क्रीळन्तः सुमनसः त्वा सपेम जनानां द्युम्नं अभि तस्थिवांसः (भवेम)

१० हे अग्ने यः स्वश्वः सुहिरण्यः (उपासकः) वसुमता रथेन त्वा उपयाति, तस्य त्राता भवसि. यश्च ते आतिथ्यम् आनुषक् जुहोपत् तस्य सखा (भवसि) ।

Through thy brothely affection, and thy hymns I can smite even the most powerful adversaries, and I know that this thy love has come down to me through my father Gotama. Harken, therefore, unto my prayer, O Thou most youthful and wise Priest of subdued mind. 11

Never slumbering, ever quick and propitious, vigilant, compassionate, untiring are thy guards; Oh, let those servants of thine, watching from all the sides, protect us, O infallible God. 12

Thy guards seeing, O Agni, the blind son of Mamata, did rescue him from peril. The Lord that knoweth all hath thus protected the pious, so that the enemies, though seeking to injure them, could do them no harm at all. 13

Through Thee we shall be blest; and guarded by thee shall we under thy care acquire the powers (of purity). Fulfil both these ous desires, O Truthful God, aud do this immediately, O upright One. 14

With this fire-stick let us serve thee; accept this hymn which we are chanting in thine honour. Burn down the accursed demons, and, O Lord, shining with a delightful lustre, preserve us from the hatred and slander of the scoffer. 15

END OF ADHYAYA 4.

---

११ ते बंधुता वचोभिः च महो रुजामि, तत् मे पितुः गोतमात् मा अन्वियाय । हे होतः यविष्ठ, सुक्रतो, दमूनाः त्वम् नः अस्य वचसः चिकिद्धि ।

१२ ये तव पायवः अस्वप्नजः तरणयः सुशेवाः अतंद्रासः अवृकाः अश्रमिष्ठाः ते सध्र्यञ्चः निषद्य, हे अमूर अग्ने नः पान्तु ।

१३ हे अग्ने ये मामतेयं अंधं पश्यंतः दुरितात् अरथात् ते तव पायवः । विश्ववेदाः तान् सुकृतः ररक्ष इति रिपवः दिप्सन्तः इत् अपि एतान् नाह देभुः ।

१४ वयं त्वया सधन्याः त्वोताः तव प्रणीती वाजान् अश्याम । हे सख्यतातेउभाशंसा सूदय, अदृयाण तत् अनुष्ठुया कृणुहि ।

१५ हे अग्ने अया समिधा ते विधेम, इमं स्तोमम् शस्यमानं प्रति गृभाय मित्र महः अस्मान् दुहः निदः अवद्यात् च पाहि ।

WORLD'S GREATEST PLEASURE

Is to enjoy the advantages of parfect health. Many careless young men often break down and are fit for nothing. Isn't it a sad thing ?

ATANK NIGRAH PILL

Is the only safe and realiable remedy. It tones up the entire nervous System.

It imparts wonderful strength and vigour by increasing and purfying the Blood.

It is invaluable in weak digestion and constipation. In short it supplies everything a man should have. Price Re. 1 for a box of 32 pills. Write to-day.

Vaidya Shastri MANISHANKER GOVINDJI
Atank Nigrah Pharmacy, Kalbadevi, BOMBAY.

DONGRE'S BALAMRIT

Surely, it is a source of joy for parents to see their child grow bonny, healthy, strong and stout. Why not then try Dongre's Balamrit which will give your child priceless endowment of vigorous body ? It checks troublesome cough. It is sweet to taste. Price As. 12 per bottle. Postage As. 4.

K. T. DONGRE & Co. Girgaon, BOMBAY.

Sample free if half-anna stamps are sent for postage.

Buy only
The world-renowned and most efficatious

SUKESHI HAIR OIL

for preventing hair from falling off or turning gray. Only a single trial will convince you that this oil strengthens the hair brings about its luxuriant growth and, keeping the brain calm and cool, gives a silky softness to the hair. Price 0-12-0 Per bottle. V. P. P charges extra. Tel. Ad. Sukeshi, Baroda.

Manufactured by
THE SHAFI INDUSTRIAL WORKS, OPP. TO LIMBADI POLE, NEAR TOWER, BARODA
Can be had of Messrs. D. Chimanlal & Co.
Princess street, Bombay.

Medicated Hair Oil.

KAMINIA OIL (Registered.)

When this oil is applied to the hair they become shining and deep black. By the use of this oil the head and brain become calm and cool. By rubbing this oil only once on the head it will be found that the mind has grown cheerful. When this oil is used there is smell all around. This oil is made of the best Indian drugs.

GOLD MEDALS IN MYSORE & ALLAHABAD EXHIBITIONS.

Besides the above medals we have got many certificates of merits. For instance we quote here only one or two.

B RAMANNA. ADVOCATE MYSORE.

Please send us six bottles of Kaminia Oil. Our ladies were pleased to recommend it again."

MUPTI ABDUL WADUD KHAN

Translator Judicial Commissioner's COURT, PESHAWAR.



"We used your Kaminia Oil. I can boldly say that your oil is really superior to all other oils in the market. Please send us six more bottles."

If you want any more proof for its quality, try it once yourself and pass your festivals merrily.

For one bottle price Re. 1 only V. P. charges as. 4. } For three bottles Rs. 2-10-0 V. P. charges as. 7.

THE ANGLO INDIAN DRUG AND CHEMICAL COMPANY.

No. 155 Jumma musjid Bombay

Telegraphic address: "Anglon" BOMBAY.

Printed at Shruti-Bodh Printing Press, & Published at Shruti-Bodh Office, 47, Kalbadevi, Bombay, by Narayan Vasudeo Mahajani.

SHRUTI-BODH [Translation of the Vedas]

OR

Revelation Revealed

Royal 8 vo. 64 pp. Vedic Text & English Translation.

(English Edition)

PUBLISHED CONCURRENTLY IN 4 LANGUAGES,
English, Marathi, Hindi and Gujrati, every month.

Edited by

R. V. PATVARDHAN, B. A. LL. B.
A. B. KOLHATKAR, B. A. LL. B.
D. A. TULZAPURKAR, B. A. LL. B.

Vol. 2 No. 13
July 1913.

Yearly Rs. 4
Post free.

Single Copy,
8 Annas.

Shruibodh Office,
47, Kalbadevi, Bombay.

100000

SAFES

HARICHAND MANCHARAM & Co. have manufactured and sold more than One Hundred Thousand fire and burglar-proof safes, since the establishment of their factory in 1870. It is the oldest factory in India. Harichand's safes and locks are unrivalled both as regards workmanship and cheapness. They are equal to the best European and American Manufactures of the same kind.

In the great Fire-Test held at the Bombay Exhibition, Harichand's safe was declared to be

"THE BEST FIRE-PROOF SAFE".

No safe manufacturer in India has won as many medals as Harichand,

THE WINNER OF 19 MEDALS.

Send for our New Illustrated Price List.

HARICHAND MANCHARAM & CO.,

HEAD OFFICE—131, GULALWADI, BOMBAY.

॥ अथ द्वितीयाष्टके पंचमोऽध्यायः ॥ ५ ॥

॥ १८४ ॥ ऋषिः-अगस्त्यः । देवता-अश्विनौ । छन्दः-त्रिष्टुप् ।

॥ १८४ ॥ ता वामद्य तावपरं हुवेमोच्छन्त्यामुषसि वह्निरुक्थैः ।
नासत्या कुह चित्सन्तावर्यो दिवो नपाता सुदास्तराय ॥ १ ॥
अस्मे ऊ षु वृषणा मादयेथामुत्पणीहँतमूर्म्या मदन्ता ।
श्रुतं मे अच्छोक्तिभिर्मतीनामेष्टा नरा निचेतारा च कर्णैः ॥ २ ॥
श्रिये पूषन्निषुकृतेव देवा नासत्या वहतुं सूर्यायाः ।
वचयन्ते वां ककुहा अप्सु जाता युगा जूर्णेव वरुणस्य भूरेः ॥ ३ ॥
अस्मे सा वां माध्वी रातिरस्तु स्तोमं हिनोतं मान्यस्य कारोः ।
अनु यद्वां अवस्या सुदानू सुवीर्याय चर्षणयो मदन्ति ॥ ४ ॥

॥ अथ द्वितीयाष्टके पंचमोऽध्यायः ॥ ५ ॥

ता । वां । अद्य । तौ । अपरं । हुवेम । उच्छंत्यां । उषसि । वह्निः । उक्थैः ।
नासत्या । कुह । चित् । संतौ । अर्यः । दिवः । नपाता । सुदाःऽतराय ॥ १ ॥
अस्मे इति । ऊं इति । सु । वृषणा । मादयेथां । उत् । पणीन् । हतं । ऊर्म्या ।
मदंता । श्रुतं । मे । अच्छोक्तिऽभिः । मतीनां । एष्टा । नरा । निऽचेतारा । च ।
कर्णैः ॥ २ ॥ श्रिये । पूषन् । इषुकृताऽइव । देवा । नासत्या । वहतुं । सूर्यायाः ।
वचयंते । वां । ककुहाः । अप्ऽसु । जाताः । युगा । जूर्णाऽइव । वरुणस्य ।
भूरेः ॥ ३ ॥ अस्मे इति । सा । वां । माध्वी इति । रातिः । अस्तु । स्तोमं ।
हिनोतं । मान्यस्य । कारोः । अनु । यत् । वां । अवस्या । सुदानू इति सुऽदानू ।
सुऽवीर्याय । चर्षणयः । मदंति ॥ ४ ॥

एष वां स्तोमो अश्विनावकारि मानेभिर्मघवाना सुवृक्ति ।
यातं वर्तिस्तनयाय त्मने चागस्त्ये नासत्या मदन्ता ॥ ५ ॥
अतारिष्म तमसस्पारमस्य प्रति वां स्तोमो अश्विनावधायि ।
इह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुम् ॥ ६ ॥ १ ॥

॥ १८५ ॥ ऋषिः-अगस्त्यः । देवता-द्यावापृथिव्यौ । छन्दः-त्रिष्टुप् ॥

॥१८५॥ कतरा पूर्वा कतरापरायोः कथा जाते कवयः को वि वेद ।
विश्वं त्मना बिभृतो यद्ध नाम वि वर्तेते अहनी चक्रियेव ॥ १ ॥
भूरि द्वे अचरन्ती चरन्तं पदन्तं गर्भमपदी दधाते ।
नित्यं न सूनुं पित्रोरुपस्थे द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ २ ॥

एषः । वां । स्तोमः । अश्विनौ । अकारि । मानेभिः । मघऽवाना । सुऽवृक्ति । यातं । वर्तिः । तनयाय । त्मने । च । अगस्त्ये । नासत्या । मदन्ता ॥ ५ ॥ अतारिष्म । तमसः । पारं । अस्य । प्रति । वां । स्तोमः । अश्विनौ । अधायि । आ । इह । यातं । पथिऽभिः । देवऽयानैः । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ ६ ॥ १ ॥

कतरा । पूर्वा । कतरा । अपरा । अयोः । कथा । जाते इति । कवयः । कः । वि । वेद । विश्वं । त्मना । बिभृतः । यत् । ह । नाम । वि । वर्तेते इति । अहनी इति । चक्रिया ऽइव ॥ १ ॥ भूरि । द्वे इति । अचरंती इति । चरंतं । पदऽवंतं । गर्भं । अपदी इति । दधाते इति । नित्यं । न । सूनुं । पित्रोः । उपऽस्थे । द्यावा । रक्षतं । पृथिवी इति । नः । अभ्वात् ॥ २ ॥

अनेहो दात्रमदितेरनर्वं हुवे स्वर्वदवधं नमस्वत् ।
तद्द्यावापृथिवी जनयतं जरित्रे द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ३ ॥
अतप्यमाने अवसावन्ती अनु ष्याम रोदसी देवपुत्रे ।
उभे देवानामुभयेभिरह्वां द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ४ ॥
सङ्गच्छमाने युवती समन्ते स्वसारा जामी पित्रोरुपस्थे ।
अभिजिघ्रन्ती भुवनस्य नाभिं द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ५ ॥ २ ॥
उर्वी सद्मनी बृहती ऋतेन हुवे देवानामवसा जनित्री ।
दधाते ये अमृतं सुप्रतीके द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ६ ॥

अनेहः । दात्रं । अदितेः । अनर्वं । हुवे । स्वःऽवत् । अवधं । नमस्वत् । तत् । रोदसी इति । जनयतं । जरित्रे । द्यावा । रक्षतं । पृथिवी इति । नः । अभ्वात् ॥३॥ अतप्यमाने इति । अवसा । अवन्ती इति । अनु । स्याम । रोदसी इति । देवपुत्रे इति देवऽपुत्रे । उभे इति । देवानां । उभयेभिः । अह्वां । द्यावा । रक्षतं । पृथिवी इति । नः । अभ्वात् ॥ ४ ॥ संगच्छमाने इति संऽगच्छमाने । युवती इति । समन्ते इति संऽअन्ते । स्वसारा । जामी इति । पित्रोः । उपऽस्थे । अभिजिघ्रन्ती इत्यभिऽजिघ्रन्ती । भुवनस्य । नाभिं । द्यावा । रक्षतं । पृथिवी इति । नः । अभ्वात् ॥ ५ ॥ २ ॥ उर्वी इति । सद्मनी इति । बृहती इति । ऋतेन । हुवे । देवानां । अवसा । जनित्री इति । दधाते इति । ये इति । अमृतं । सुप्रतीके इति सुऽप्रतीके । द्यावा । रक्षतं । पृथिवी इति । नः । अभ्वात् ॥ ६ ॥

उर्वी पृथ्वी बहुले दूरेअन्ते उप ब्रुवे नमसा यज्ञे अस्मिन् ।
दधाते ये सुभगे सुप्रतूर्ती द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ७ ॥
देवान्वा यच्चकृमा कच्चिदागः सखायं वा सदमिज्जास्पतिं वा ।
इयं धीर्भूया अवयानमेषां द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ८ ॥
उभा शंसा नर्या मामविष्टामुभे मामूती अवसा सचेताम् ।
भूरिं चिद्र्यः सुदास्तरायेषा मदन्त इषयेम देवाः ॥ ९ ॥
ऋतं दिवे तदवोचं पृथिव्या अभिश्रावाय प्रथयं सुमेधाः ।
पातामवद्याद्दुरितादभीके पिता माता च रक्षतामवोभिः ॥ १० ॥
इदं द्यावापृथिवी सत्यमस्तु पितर्मातर्यदिहोपब्रुवे वाम् ।
भूतं देवानामवमे अवोभिर्विद्यामेषं वृजनं जीरदानुम् ॥ ११ ॥ ३ ॥

उर्वी इति । पृथ्वी इति । बहुले इति । दूरेअन्ते इति दूरेऽअन्ते । उप । ब्रुवे । नमसा । यज्ञे । अस्मिन् । दधाते इति । ये इति । सुभगे इति सुऽभगे । सुप्रतूर्ती इति सुऽप्रतूर्ती । द्यावा । रक्षतं । पृथिवी इति । नः । अभ्वात् ॥ ७ ॥ देवान् । वा । यत् । चकृम । कत् । चित् । आगः । सखायं । वा । सदं । इत् । जाःऽपतिं वा । इयं । धीः । भूयाः । अवऽयानं । एषां । द्यावा । रक्षतं । पृथिवी इति । नः । अभ्वात् ॥ ८ ॥ उभा । शंसा । नर्या । मां । अविष्टां । उभे इति । मां । ऊती इति । अवसा । सचेतां । भूरिं । चित् । अर्यः । सुदाःऽतराय । इषा । मदंतः । इषयेम । देवाः ॥ ९ ॥ ऋतं । दिवे । तत् । अवोचं । पृथिव्यै । अभिऽश्रावाय । प्रथयं । सुऽमेधाः । पातां । अवद्यात् । दुःइतात् । अभीके । पिता । माता । च । रक्षतां । अवःऽभिः ॥ १० ॥ इदं । द्यावापृथिवी इति । सत्यं । अस्तु । पितः । मातः । यत् । इह । उपऽब्रुवे । वां । भूतं । देवानां । अवमे इति । अवःऽभिः । विद्याम । इषं । वृजनं । जीरऽदानुं ॥ ११ ॥ ३ ॥

॥ १८६ ॥ ऋषिः—अगस्त्यः । देवता—विश्वेदेवाः । छन्दः—त्रिष्टुप् ॥

॥१८६॥ आ न इळाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु ।
अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा ॥ १ ॥
आ नो विश्व आस्क्रा गमन्तु देवा मित्रो अर्यमा वरुणः सजोषाः ।
भुवन्यथा नो विश्वे वृधासः करन्त्सुषाहा विथुरं न शर्वः ॥ २ ॥
प्रेष्ठं वो अतिथिं गृणीषेऽग्निं शस्तिभिस्तुर्वणिः सजोषाः ।
असद्यथा नो वरुणः सुकीर्तिरिषश्च पर्षदरिगूर्तः सूरिः ॥ ३ ॥
उर्ध्व व एषे नमसा जिगीषोषासानक्ता सुदुघेव धेनुः ।
समाने अहन्विमिमानो अर्कं विषुरूपे पयसि सस्मिन्नूधन् ॥ ४ ॥

आ । नः । इळाभिः । विदथे । सुऽशस्ति । विश्वानरः । सविता । देवः । एतु । अपि । यथा । युवानः । मत्सथ । नः । विश्वे । जगत् । अभिऽपित्वे । मनीषा ॥ १ ॥ आ । नः । विश्वे । आस्क्राः । गमंतु । देवाः । मित्रः । अर्यमा । वरुणः । सऽजोषाः । भुवन् । यथा । नः । विश्वे । वृधासः । करन् । सुऽसहा । विथुरं । न । शर्वः ॥ २ ॥ प्रेष्ठं । वः । अतिथिं । गृणीषे । अग्निं । शस्तिऽभिः । तुर्वणिः । सऽजोषाः । असत् । यथा । नः । वरुणः । सुऽकीर्तिः । इषः । च । पर्षत् । अरिऽगूर्तः । सूरिः ॥ ३ ॥ उर्ध्वं । वः । आ । ईषे । नमसा । जिगीषा । उषसानक्ता । सुदुघाऽइव । धेनुः । समाने । अहन् । विऽमिमानः । अर्कं । विषुऽरूपे । पयसि । सस्मिन् । ऊधन् ॥ ४ ॥

उत नोऽहिर्बुध्न्योऽमर्यस्कः शिशुं न पिप्युषीव वेति सिन्धुः ।
येन नपातमपां जुनाम मनोजुवो वृषणो यं वहन्ति ॥ ५ ॥ ४ ॥
उत नं ईं त्वष्टा गन्त्वच्छा रमत्सुरिभिरभिपित्वे सजोषाः ।
आ वृत्रहेन्द्रश्चर्षणिप्रास्तुविष्टमो नरां नं इह गम्याः ॥ ६ ॥
उत नं ईं मतयोऽश्वयोगाः शिशुं न गावस्तरुणं रिहन्ति ।
तमीं गिरो जनयो न पत्नीः सुरभिष्टमं नरां नसन्त ॥ ७ ॥
उत नं ईं मरुतो वृद्धसेनाः स्मद्रोदसी समनसः सदन्तु ।
पृषदश्वासोऽवनयो न रथा रिशादसो मित्रयुजो न देवाः ॥ ८ ॥
प्र नु यदेषां महिना चिकित्रे प्र युञ्जते प्रयुजस्ते सुवृक्ति ।
अध यदेषां सुदिने न शरुर्विश्वमेरिणं प्रुषायन्त सेनाः ॥ ९ ॥

उत । नः । अहिः । बुध्न्यः । मयः । कस्कितिं कः । शिशुं । न । पिप्युषीऽइव । वेति । सिन्धुः । येन । नपातं । अपां । जुनाम । मनःऽजुवः । वृषणः । यं । वहन्ति ॥ ५ ॥ ४ ॥ उत । नः । ईं । त्वष्टा । आ । गंतु । अच्छं । स्मत् । सुरिऽभिः । अभिऽपित्वे । सऽजोषाः । आ । वृत्रऽहा । इंद्रः । चर्षणिऽप्राः । तुविःऽतमः । नरां । नः । इह । गम्याः ॥ ६ ॥ उत । नः । ईं । मतयः । अश्वऽयोगाः । शिशुं । न । गावः । तरुणं । रिहंति । तं । ईं । गिरः । जनयः । न । पत्नीः । सुरभिःऽतमं । नरां । नसंत ॥ ७ ॥ उत । नः । ईं । मरुतः । वृद्धऽसेनाः । स्मत् । रोदसी इति । सऽमनसः । सदंतु । पृषत्ऽअश्वासः । अवनयः । न । रथाः । रिशादसः । मित्रऽयुजः । न । देवाः ॥ ८ ॥ प्र । नु । यत् । एषां । महिना । चिकित्रे । प्र । युंजते । प्रऽयुजः । ते । सुऽवृक्ति । अध । यत् । एषां । सुऽदिने । न । शरुः । विश्वं । आ । इरिणं । प्रुषायंत । सेनाः ॥ ९ ॥

प्रो अश्विनाववसे कृणुध्वं प्र पूषणं स्वतवसो हि सन्ति ।
अद्वेषो विष्णुर्वात ऋभुक्षा अच्छा सुम्नाय ववृतीय देवान् ॥ १० ॥
इयं सा वो अस्मे दीधितिर्यजत्रा अपिप्राणी च सदनी च भूयाः ।
नि या देवेषु यतते वसूयुर्विद्यामेषं वृजनं जीरदानुम् ॥ ११ ॥ ५ ॥

॥ १८७ ॥ ऋषिः—अगस्त्यः । देवता—अन्नस्तुतिः । छन्दः—गायत्री ॥

॥ १८७ ॥ पितुं नु स्तोषं महो धर्माणं तविषीम् ।
यस्य त्रितो व्योजसा वृत्रम् विपर्वमर्दयत् ॥ १ ॥
स्वादो पितो मधो पितो वयं त्वा ववृमहे ।
अस्माकमविता भव ॥ २ ॥

प्रो इति । अश्विनौ । अवसे । कृणुध्वं । प्र । पूषणं । स्वऽतवसः । हि । सन्ति ।
अद्वेषः । विष्णुः । वातः । ऋभुक्षाः । अच्छ । सुम्नाय । ववृतीय । देवान् ॥ १० ॥
इयं । सा । वः । अस्मे इति । दीधितिः । यजत्राः । अपिऽप्राणी । च । सदनी ।
च । भूयाः । नि । या । देवेषु । यतते । वसुऽयुः । विद्याम । इषं । वृजनं ।
जीरऽदानुं ॥ ११ ॥ ५ ॥

पितुं । नु । स्तोषं । महः । धर्माणं । तविषीं । यस्य । त्रितः । वि । ओजसा । वृत्रं ।
विऽपर्वं । अर्दयत् ॥ १ ॥ स्वादो इति । पितो इति । मधो इति । पितो इति ।
वयं । त्वा । ववृमहे । अस्माकं । अविता । भव ॥ २ ॥

उप॑ नः पितवा चर शिवः शिवाभिरू॒तिभिः॑ ।
मयो॑भुर॒द्रिषे॑ण्यः सखा॑ सु॒शेवो॑ अद्व॒याः ॥ ३ ॥
तव॒ त्ये पि॑तो॒ रसा॒ रजां॑स्यनु॒ वि॒ष्ठिताः ।
दि॒वि वा॒ता इ॑व श्रि॒ताः ॥ ४ ॥
तव॒ त्ये पि॑तो दद॒तस्तव॑ स्वादिष्ठ॒ ते पि॑तो ।
प्र स्वा॒ञ्जानो॒ रसा॑नां तु॒विग्री॑वा॒ इ॑वेरते ॥ ५ ॥ ६ ॥
त्वे पि॑तो म॒हानां॑ दे॒वानां॒ मनो॑ हि॒तम् ।
अका॑रि॒ चारु॑ के॒तुना॒ तवाहि॒मव॑सावधीत् ॥ ६ ॥
यद॒दो पि॑तो अजगन्वि॒वस्व॒ पर्व॑तानाम् ।
अत्रा॑ चि॒न्नो॒ मधो पितोऽरं॒ भक्षा॑य गम्याः ॥ ७ ॥
यद॒पामोष॑धीनां परि॒शमा॑रि॒शामहे ।
वा॒ता॒पे पी॑व॒ इद्भ॑व ॥ ८ ॥

उप॑ । नः॒ । पि॒तो॒ इति॑ । आ । च॒र॒ । शि॒वः । शि॒वाभिः॑ । ऊ॒तिऽभिः॑ । मयः॑ऽभुः । अ॒द्रि॒ऽसे॒ण्यः॑ । सखा॑ । सु॒ऽशेवः॑ । अ॒द्व॒याः ॥ ३ ॥ तव॑ । त्ये । पि॒तो॒ इति॑ । रसाः॑ । रजां॑सि । अनु॑ । वि॒ऽस्थिताः॑ । दि॒वि । वा॒ताःऽइ॑व । श्रि॒ताः॑ ॥ ४ ॥ तव॑ । त्ये । पि॒तो॒ इति॑ । द॒द॒तः । तव॑ । स्वा॒दि॒ष्ठ॒ । ते॒ । पि॒तो॒ इति॑ । प्र । स्वा॒ञ्जानः॑ । रसा॑नां । तु॒विग्री॑वाःऽइव । ई॒र॒ते॒ ॥ ५ ॥ ६ ॥ त्वे इति॑ । पि॒तो॒ इति॑ । म॒हाना॑म् । दे॒वाना॑म् । मनः॑ । हि॒तं । अका॑रि । चारु॑ । के॒तुना॑ । तव॑ । अहि॑म् । अव॑सा । अ॒व॒धी॒त् ॥ ६ ॥ यत् । अ॒दः॒ । पि॒तो॒ इति॑ । अ॒ज॒ग॒त् । वि॒ऽव॒स्व॒ । पर्व॑तानाम् । अत्र॑ । चि॒त् । नः॒ । मधो॒ इति॑ । पि॒तो॒ इति॑ । अर॑म् । भक्षा॑य । ग॒म्याः॒ ॥ ७ ॥ यत् । अ॒पाम् । ओष॑धीना । प॒रि॒ऽश॒म् । आ॒ऽरि॒शामहे । वा॒ता॒पे । पी॒वः॒ । इत् । भ॒व॒ ॥ ८ ॥

यत्ते सोम गवाशिरो यवाशिरो भजामहे ।
वातापे पीव इद्भव ॥ ९ ॥

करम्भ ओषधे भव पीवो वृक्क उदारथिः ।
वातापे पीव इद्भव ॥ १० ॥

तं त्वा वयं पितो वचोभिर्गावो न हव्या सुषूदिम ।
देवेभ्यस्त्वा सधमादमस्मभ्यं त्वा सधमादम् ॥ ११ ॥ ७ ॥

॥ १८८ ॥ ऋषिः—अगस्त्यः । देवता—आग्नियः । छन्दः—गायत्री ॥

॥ १८८ ॥ समिद्धो अद्य राजसि देवो देवैः सहस्रजित् ।
दूतो हव्या कविर्वह ॥ १ ॥

तनूनपादृतं यते मध्वा यज्ञः समज्यते ।
दधत्सहस्रिणीरिषः ॥ २ ॥

आजुह्वानो न ईड्यो देवाँ आ वक्षि यज्ञियान् ।
अग्ने सहस्रसा असि ॥ ३ ॥

यत् । ते । सोम । गोऽआशिरः । यवऽआशिरः । भजामहे । वातापे । पीवः । इत् । भव ॥ ९ ॥ करंभः । ओषधे । भव । पीवः । वृक्कः । उदारथिः । वातापे । पीवः । इत् । भव ॥ १० ॥ तं । त्वा । वयं । पितो इति । वचःऽभिः । गावः । न । हव्या । सुसूदिम । देवेभ्यः । त्वा । सधऽमादं । अस्मभ्यं । त्वा । सधऽमादं ॥ ११ ॥ ७ ॥

संऽइद्धः । अद्य । राजसि । देवः । देवैः । सहस्रऽजित् । दूतः । हव्या । कविः । वह ॥ १ ॥ तनूऽनपात् । ऋतं । यते । मध्वा । यज्ञः । सं । अज्यते । दधत् । सहस्रिणीः । इषः ॥ २ ॥ आऽजुह्वानः । नः । ईड्यः । देवान् । आ । वक्षि । यज्ञियान् । अग्ने । सहस्रऽसाः । असि ॥ ३ ॥

प्राचीनं बर्हिरोजसा सहस्रवीरमस्तृणन् । यत्रादित्या विराजथ ॥ ४ ॥
विराट् सम्राड्भ्वीः प्रभ्वीर्बह्वीश्च भूयसीश्च याः ।
दुरो घृतान्यक्षरन् ॥ ५ ॥ ८ ॥
सुरुक्मे हि सुपेशसाधि श्रिया विराजतः । उषासावेह सीदताम् ॥ ६ ॥
प्रथमा हि सुवाचसा होतारा दैव्या कवी ।
यज्ञं नो यक्षतामिमम् ॥ ७ ॥
भारतीळे सरस्वति या वः सर्वा उपब्रुवे । ता नश्चोदयत श्रिये ॥ ८ ॥
त्वष्टा रूपाणि हि प्रभुः पशून्विश्वान्त्समानजे ।
तेषां नः स्फातिमा यज ॥ ९ ॥
उप त्मन्या वनस्पते पाथो देवेभ्यः सृज । अग्निर्हव्यानि सिष्वदत् ॥ १० ॥
पुरोगा अग्निर्देवानां गायत्रेण समज्यते । स्वाहाकृतीषु रोचते ॥ ११ ॥ ९ ॥

प्राचीनं । बर्हिः । ओजसा । सहस्रऽवीरं । अस्तृणन् । यत्र । आदित्याः । विऽराजथ ॥ ४ ॥ विऽराट् । सम्ऽराट् । विऽभ्वीः । प्रऽभ्वीः । बह्वीः । च । भूयसीः । च । याः । दुरः । घृतानि । अक्षरन् ॥ ५ ॥ ८ ॥ सुरुक्मे इति सुऽरुक्मे । हि । सुऽपेशसा । अधि । श्रिया । विऽराजतः । उपसौ । आ । इह । सीदताम् ॥ ६ ॥ प्रथमा । हि । सुऽवाचसा । होतारा । दैव्या । कवी इति । यज्ञं । नः । यक्षताम् । इमं ॥ ७ ॥ भारति । इळे । सरस्वति । याः । वः । सर्वाः । उपऽब्रुवे । ताः । नः । चोदयत । श्रिये ॥ ८ ॥ त्वष्टा । रूपाणि । हि । प्रऽभुः । पशून् । विश्वान् । सं-ऽआनजे । तेषां । नः । स्फातिं । आ । यज ॥ ९ ॥ उप । त्मन्या । वनस्पते । पाथः । देवेभ्यः । सृज । अग्निः । हव्यानि । सिस्वदत् ॥ १० ॥ पुरःऽगाः । अग्निः । देवानां । गायत्रेण । सं । अज्यते । स्वाहाऽकृतीषु । रोचते ॥ ११ ॥ ९ ॥

॥ १८९ ॥ ऋषिः—अगस्त्यः । देवता—अग्निः । छन्दः—त्रिष्टुप् ॥

॥१८९॥ अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ १ ॥
अग्ने त्वं पारया नव्यो अस्मान्त्स्वस्तिभिरति दुर्गाणि विश्वा ।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शं योः ॥ २ ॥
अग्ने त्वमस्मद्युयोध्यमीवा अनग्नित्रा अभ्यमन्त कृष्टीः ।
पुनरस्मभ्यं सुविताय देव क्षां विश्वेभिरमृतेभिर्यजत्र ॥ ३ ॥
पाहि नो अग्ने पायुभिरजस्रैरुत प्रिये सदन आ शुशुकान् ।
मा ते भयं जरितारं यविष्ठ नूनं विदन्मापरं सहस्वः ॥ ४ ॥
मा नो अग्नेऽव सृजो अघायाविष्यवे रिपवे दुच्छुनायै ।
मा दत्वते दशते मादते नो मा रीषते सहसावन्परा दाः ॥ ५ ॥ १० ॥

अग्ने । नय । सुऽपथा । राये । अस्मान् । विश्वानि । देव । वयुनानि । विद्वान् । युयोधि । अस्मत् । जुहुराणं । एनः । भूयिष्ठां । ते । नमःऽउक्तिं । विधेम ॥ १ ॥ अग्ने । त्वं । पारय । नव्यः । अस्मान् । स्वस्तिऽभिः । अति । दुःऽगानि । विश्वा । पूः । च । पृथ्वी । बहुला । नः । उर्वी । भव । तोकाय । तनयाय । शं । योः ॥ २ ॥ अग्ने । त्वं । अस्मत् । युयोधि । अमीवाः । अनग्निऽत्राः । अभिऽअमंत । कृष्टीः । पुनः । अस्मभ्यं । सुविताय । देव । क्षां । विश्वेभिः । अमृतेभिः । यजत्र ॥ ३ ॥ पाहि । नः । अग्ने । पायुऽभिः । अजस्रैः । उत । प्रिये । सदने । आ । शुशुकान् । मा । ते । भयं । जरितारं । यविष्ठ । नूनं । विदत् । मा । अपरं । सहस्वः ॥ ४ ॥ मा । नः । अग्ने । अव । सृजः । अघाय । अविष्यवे । रिपवे । दुच्छुनायै । मा । दत्वते । दशते । मा । अदते । नः । मा । रिषते । सहसाऽवन् । परा । दाः ॥ ५ ॥ १० ॥

वि घ त्वावाँ ऋतजात यंसद्गृणानो अंग्ने तन्वे३वरूथम् ।
विश्वादरिरिक्षोरुत वा निनित्सोरभिह्रुतामसि हि देव विष्पट् ॥ ६ ॥
त्वं ताँ अग्न उभयान्वि विद्वान्वेषि प्रपित्वे मनुषो यजत्र ।
अभिपित्वे मनवे शास्यो भूर्मर्मृजेन्य उशिग्भिर्नाक्रः ॥ ७ ॥
अवोचाम निवचनान्यस्मिन्मानस्य सूनुः सहसाने अग्नौ ।
वयं सहस्रमृषिभिः सनेम विद्यामेषं वृजनं जीरदानुम् ॥ ८ ॥ ११ ॥

॥ १९० ॥ ऋषिः—अगस्त्यः । देवता—बृहस्पतिः । छन्दः—त्रिष्टुप् ॥

॥ १९० ॥ अनर्वाणं वृषभं मन्द्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः ।
गाथान्यः सुरुचो यस्य देवा आशृण्वन्ति नवमानस्य मर्तीः ॥ १ ॥
तमृत्विया उप वाचः सचन्ते सर्गो न यो देवयतामसर्जि ।
बृहस्पतिः स ह्यञ्जो वरांसि विभ्वाभवत्समृते मातरिश्वा ॥ २ ॥

वि । घ । त्वाऽवान् । ऋतऽजात । यंसत् । गृणानः । अग्ने । तन्वे । वरूथं ।
विश्वात् । रिरिक्षोः । उत । वा । निनित्सोः । अभिऽह्रुतां । असि । हि । देव ।
विष्पट् ॥ ६ ॥ त्वं । तान् । अग्ने । उभयान् । वि । विद्वान् । वेषि । प्रऽपित्वे ।
मनुषः । यजत्र । अभिऽपित्वे । मनवे । शास्यः । भूः । मर्मृजेन्यः । उशिक्ऽभिः ।
न । अक्रः ॥ ७ ॥ अवोचाम । निऽवचनानि । अस्मिन् । मानस्य । सूनुः । सह-
साने । अग्नौ । वयं । सहस्रं । ऋषिऽभिः । सनेम । विद्याम । इषं । वृजनं ।
जीरऽदानुं ॥ ८ ॥ ११ ॥

अनर्वाणं । वृषभं । मंद्रऽजिह्वं । बृहस्पतिं । वर्धय । नव्यं । अर्कैः । गाथान्यः ।
सुऽरुचः । यस्य । देवाः । आऽशृण्वंति । नवमानस्य । मतीः ॥ १ ॥ तं । ऋत्वियाः ।
उप । वाचः । सचंते । सर्गः । न । यः । देवऽयता । असर्जि । बृहस्पतिः । सः ।
ह्यञ्जः । वरांसि । विऽभ्वा । अभवत् । सं । ऋते । मातरिश्वा ॥ २ ॥

उपंस्तुतिं नमस उद्यतिं च श्लोकं यंसत्सवितेव प्र बाहू ।
अस्य क्रत्वाहन्योऽयो अस्ति मृगो न भीमो अरक्षसस्तुविष्मान् ॥ ३ ॥
अस्य श्लोको दिवीयते पृथिव्यामत्यो न यंसद्यक्षभृद्विचेताः ।
मृगाणां न हेतयो यन्ति चेमा बृहस्पतेरहिमायाँ अभि द्यून् ॥ ४ ॥
ये त्वा देवोस्त्रिकं मन्यमानाः पापा भद्रमुपजीवंति पज्राः ।
न दूढ्ये अनु ददासि वामं बृहस्पते चयस इत्पियारुम् ॥ ५ ॥ १२ ॥
सुप्रैतुः सूयवसो न पन्था दुर्नियन्तुः परिप्रीतो न मित्रः ।
अनर्वाणो अभि ये चक्षंते नोऽपीवृता अपोर्णुवन्तो अस्थुः ॥ ६ ॥
सं यं स्तुभोऽवनयो न यन्ति समुद्रं न स्रवतो रोधचक्राः ।
स विद्वाँ उभयं चष्टे अन्तर्बृहस्पतिस्तर आपश्च गृध्रः ॥ ७ ॥

उपंऽस्तुतिं । नमंसः । उत्ऽयंतिं । च । श्लोकं । यंसत् । सविताऽइंव । प्र । बाहू इति । अस्य । क्रत्वा । अहन्यः । यः । अस्ति । मृगः । न । भीमः । अरक्षसंः । तुविष्मान् ॥ ३ ॥ अस्य । श्लोकः । दिवि । ईयते । पृथिव्या । अत्यः । न । यंसत् । यक्षऽभृत् । विऽचेताः । मृगाणां । न । हेतयः । यंति । च । इमाः । बृहस्पतेः । अहिंऽमायान् । अभि । द्यून् ॥ ४ ॥ ये । त्वा । देव । उस्त्रिकं । मन्यमानाः । पापाः । भद्रं । उपऽजीवंति । पज्राः । न । दुःऽध्यें । अनु । ददासि । वामं । बृहस्पते । चयसे । इत् । पियारुं ॥ ५ ॥ १२ ॥ सुऽप्रैतुः । सुऽयवसः । न । पंथाः । दुःऽनियंतुः । परिंऽप्रीतः । न । मित्रः । अनर्वाणः । अभि । ये । चक्षंते । नः । अपिंऽवृताः । अपऽऊर्णुवंतः । अस्थुः ॥ ६ ॥ सं । यं । स्तुभः । अवनयः । न । यंति । समुद्रं । न । स्रवतः । रोधंऽचक्राः । सः । विद्वान् । उभयं । चष्टे । अंतः । बृहस्पतिः । तरः । आपः । च । गृध्रः ॥ ७ ॥

एवा महस्तुविजातस्तुविष्मान्बृहस्पतिर्वृषभो धायि देवः ।
स नः स्तुतो वीरवद्धातु गोमद्विद्यामेषं वृजनं जीरदानुम् ॥ ८ ॥ १३ ॥

॥ १९१ ॥ ऋषिः—अगस्त्यः । देवता—सूर्यः । छन्दः—अनुष्टुप् ॥

॥१९१॥ कङ्कतो न कङ्कतोऽथो सतीनकङ्कतः ।
द्वाविति प्लुषी इति न्यदृष्टा अलिप्सत ॥ १ ॥
अदृष्टान्हन्त्यायत्यथो हन्ति परायतीं ।
अथो अवघ्नती हन्त्यथो पिनष्टि पिष्टती ॥ २ ॥
शरासः कुशरासो दर्भासः सैर्या उत ।
मौञ्जा अदृष्टा वैरिणाः सर्वे साकं न्यलिप्सत ॥ ३ ॥
नि गावो गोष्ठे असदन्नि मृगासो अविक्षत ।
नि केतवो जनानां न्यदृष्टा अलिप्सत ॥ ४ ॥
एत उ त्ये प्रत्यदृश्रन्प्रदोषं तस्करा इव ।
अदृष्टा विश्वदृष्टाः प्रतिबुद्धा अभूतन ॥ ५ ॥ १४ ॥

एव । महः । तुविऽजातः । तुविष्मान् । बृहस्पतिः । वृषभः । धायि । देवः । सः । नः । स्तुतः । वीरऽवत् । धातु । गोऽमत् । विद्याम । इषं । वृजनं । जीरऽदानुं ॥८॥१२॥
कंकतः । न । कंकतः । अथो इति । सतीनऽकंकतः । द्वौ । इति । प्लुषी इति । इति । नि । अदृष्टाः । अलिप्सत ॥ १ ॥ अदृष्टान् । हंति । आऽयती । अथो इति । हंति । पराऽयती । अथो इति । अवऽघ्नती । हंति । अथो इति । पिनष्टि । पिष्टती ॥ २ ॥ शरासः । कुशरासः । दर्भासः । सैर्याः । उत । मौंजाः । अदृष्टाः । वैरिणाः । सर्वे । साकं । नि । अलिप्सत ॥ ३ ॥ नि । गावः । गोऽस्थे । असदन् । नि । मृगासः । अविक्षत । नि । केतवः । जनानां । नि । अदृष्टाः । अलिप्सत ॥ ४ ॥ एते । ऊं इति । त्ये । प्रति । अदृश्रन् । प्रऽदोषं । तस्कराःऽइव । अदृष्टाः । विश्वऽदृष्टाः । प्रतिऽबुद्धाः । अभूतन ॥ ५ ॥ १४ ॥

द्यौः पिता पृथिवी माता सोमो भ्रातादितिः स्वसा ।
अदृष्टा विश्वदृष्टास्तिष्ठतेळयता सु कम् ॥ ६ ॥
ये अंस्या ये अङ्ग्याः सूचीका ये प्रकङ्कताः ।
अदृष्टाः किं चनेह वः सर्वे साकं नि जस्यत ॥ ७ ॥
उत्पुरस्तात्सूर्य एति विश्वदृष्टो अदृष्टहा ।
अदृष्टान्त्सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः ॥ ८ ॥
उदपप्तदसौ सूर्यः पुरु विश्वानि जूर्वन् ।
आदित्यः पर्वतेभ्यो विश्वदृष्टो अदृष्टहा ॥ ९ ॥
सूर्ये विषमा सजामि दृतिं सुरावतो गृहे । सो चिन्नु न मरात्यि नो
वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥ १० ॥ १५ ॥
इयत्तिका शकुन्तिका सका जघास ते विषम् । सो चिन्नु न मरात्यि नो
वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥ ११ ॥

द्यौः । वः । पिता । पृथिवी । माता । सोमः । भ्राता । अदितिः । स्वसा । अदृष्टाः । विश्वऽदृष्टाः । तिष्ठत । इळयत । सु । कं ॥ ६ ॥ ये । अंस्याः । ये । अंग्याः । सूचीकाः । ये । प्रऽकंकताः । अदृष्टाः । किं । चन । इह । वः । सर्वे । साकं । नि । जस्यत ॥ ७ ॥ उत् । पुरस्तात् । सूर्यः । एति । विश्वऽदृष्टः । अदृष्टऽहा । अदृष्टान् । सर्वान् । जंभयन् । सर्वाः । च । यातुऽधान्यः ॥ ८ ॥ उत् । अपप्तत् । असौ । सूर्यः । पुरु । विश्वानि । जूर्वन् । आदित्यः । पर्वतेभ्यः । विश्वऽदृष्टः । अदृष्टऽहा ॥ ९ ॥ सूर्ये । विषं । आ । सजामि । दृतिं । सुराऽवतः । गृहे । सः । चित् । नु । न । मराति । नो इति । वयं । मराम । आरे । अस्य । योजनं । हरिऽस्थाः । मधु । त्वा । मधुला । चकार ॥ १० ॥ १५ ॥ इयत्तिका । शकुंतिका । सका । जघास । ते । विषं । सो इति । चित् । नु । न । मराति । नो इति । वयं । मराम । आरे । अस्य । योजनं । हरिऽस्थाः । मधु । त्वा । मधुला । चकार ॥ ११ ॥

त्रिः सप्त विष्पुलिङ्गका विषस्य पुष्यमक्षन् । ताभिश्चन न मरन्ति
नो वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥ १२ ॥
नवानां नवतीनां विषस्य रोपुषीणाम् ।
सर्वासामग्रभं नामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥ १३ ॥
त्रिः सप्त मयूर्यः सप्त स्वसारो अग्रुवः ।
तास्ते विषं वि जभ्रिर उदकं कुम्भिनीरिव ॥ १४ ॥
इयत्तकः कुषुम्भकस्तकं भिनद्म्यश्मना ।
ततो विषं प्र वावृते पराचीरनु संवतः ॥ १५ ॥
कुषुम्भकस्तदब्रवीद्गिरेः प्रवर्तमानकः ।
वृश्चिकस्यारसं विषमरसं वृश्चिक ते विषम् ॥ १६ ॥ १६ ॥ २४ ॥ १ ॥

त्रिः । सप्त । विष्पुलिङ्गकाः । विषस्य । पुष्यं । अक्षन् । ताः । चित् । नु । न । मरंति । नो इति । वयं । मराम । आरे । अस्य । योजनं । हरिऽस्थाः । मधु । त्वा । मधुला । चकार ॥ १२ ॥ नवानां । नवतीनां । विषस्य । रोपुषीणां । सर्वासां । अग्रभं । नाम । आरे । अस्य । योजनं । हरिऽस्थाः । मधु । त्वा । मधुला । चकार ॥ १३ ॥ त्रिः । सप्त । मयूर्यः । सप्त । स्वसारः । अग्रुवः । ताः । ते । विषं । वि । जभ्रिरे । उदकं । कुंभिनीःऽइव ॥ १४ ॥ इयत्तकः । कुषुंभकः । तकं । भिनद्मि । अश्मना । ततः । विषं । प्र । वावृते । पराचीः । अनु । संऽवतः ॥ १५ ॥ कुषुंभकः । तत् । अब्रवीत् । गिरेः । प्रऽवर्तमानकः । वृश्चिकस्य । अरसं । विषं । अरसं । वृश्चिक । ते । विषं ॥ १६ ॥ १६ ॥ २४ ॥ १ ॥

॥ इति चतुर्विंशोऽनुवाकः । प्रथमं मंडलं समाप्तं ॥

॥ अथ द्वितीयं मण्डलम् ॥

॥ प्रथमोऽनुवाकः ॥

॥ १ ॥ ऋषिः-आङ्गिरसः । देवता-अग्निः । छन्दः-जगती ॥

॥ १ ॥ त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ।
त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥ १ ॥
तवाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः ।
तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे ॥ २ ॥
त्वमग्न इन्द्रो वृषभः सतामसि त्वं विष्णुरुरुगायो नमस्यः ।
त्वं ब्रह्मा रयिविद्ब्रह्मणस्पते त्वं विधर्तः सचसे पुरन्ध्या ॥ ३ ॥

त्वं । अग्ने । द्युऽभिः । त्वं । आऽशुशुक्षणिः । त्वं । अत्ऽभ्यः । त्वं । अश्मनः । परि । त्वं । वनेभ्यः । त्वं । ओषधीभ्यः । त्वं । नृणां । नृऽपते । जायसे । शुचिः ॥ १ ॥ तव । अग्ने । होत्रं । तव । पोत्रं । ऋत्वियं । तव । नेष्ट्रं । त्वं । अग्नित् । ऋतऽयतः । तव । प्रऽशास्त्रं । त्वं । अध्वरिऽयसि । ब्रह्मा । च । असि । गृहऽपतिः । च । नः । दमे ॥ २ ॥ त्वं । अग्ने । इंद्रः । वृषभः । सतां । असि । त्वं । विष्णुः । उरुऽगायः । नमस्यः । त्वं । ब्रह्मा । रयिऽवित् । ब्रह्मणः । पते । त्वं । विधर्तरिति विऽधर्तः । सचसे । पुरंऽध्या ॥ ३ ॥

त्वमग्ने राजा वरुणो धृतव्रतस्त्वं मित्रो भवसि दस्म ईड्यः ।
त्वमर्यमा सत्पतिर्यस्य सम्भुजं त्वमंशो विदथे देव भाजयुः ॥ ४ ॥
त्वमग्ने त्वष्टा विधते सुवीर्यं तव ग्नावो मित्रमहः सजात्यम् ।
त्वमाशुहेमा ररिषे स्वश्व्यं त्वं नरां शर्धो असि पुरुवसुः ॥ ५ ॥ १७ ॥
त्वमग्ने रुद्रो असुरो महो दिवस्त्वं शर्धो मारुतं पृक्ष ईशिषे ।
त्वं वातैररुणैर्यासि शङ्गयस्त्वं पूषा विधतः पासि नु त्मना ॥ ६ ॥
त्वमग्ने द्रविणोदा अरङ्कृते त्वं देवः सविता रत्नधा असि ।
त्वं भगो नृपते वस्व ईशिषे त्वं पायुर्दमे यस्तेऽविधत् ॥ ७ ॥

त्वं । अग्ने । राजा । वरुणः । धृतऽव्रतः । त्वं । मित्रः । भवसि । दस्मः । ईड्यः ।
त्वं । अर्यमा । सत्ऽपतिः । यस्य । सम्ऽभुजं । त्वं । अंशः । विदथे । देव ।
भाजयुः ॥ ४ ॥ त्वं । अग्ने । त्वष्टा । विधते । सुऽवीर्यं । तव । ग्नावः । मित्रऽमहः ।
सऽजात्यं । त्वं । आशुऽहेमा । ररिषे । सुऽअश्व्यं । त्वं । नरां । शर्धः । असि ।
पुरुऽवसुः ॥ ५ ॥ १७ ॥ त्वं । अग्ने । रुद्रः । असुरः । महः । दिवः । त्वं । शर्धः ।
मारुतं । पृक्षः । ईशिषे । त्वं । वातैः । अरुणैः । यासि । शंऽगयः । त्वं । पूषा ।
विधतः । पासि । नु । त्मना ॥ ६ ॥ त्वं । अग्ने । द्रविणःऽदाः । अरंऽकृते । त्वं ।
देवः । सविता । रत्नऽधाः । असि । त्वं । भगः । नृऽपते । वस्वः । ईशिषे । त्वं ।
पायुः । दमे । यः । ते । अविधत् ॥ ७ ॥

त्वामग्ने दम आ विश्पतिं विशस्त्वां राजानं सुविदत्रमृञ्जते ।
त्वं विश्वानि स्वनीक पत्यसे त्वं सहस्राणि शता दश प्रति ॥ ८ ॥
त्वामग्ने पितरमिष्टिभिर्नरस्त्वां भ्रात्राय शम्या तनूरुचम् ।
त्वं पुत्रो भवसि यस्तेऽविधत्त्वं सखा सुशेवः पास्याधृषः ॥ ९ ॥
त्वमग्न ऋभुराके नमस्य१स्त्वं वाजस्य क्षुमतो राय ईशिषे ।
त्वं वि भास्यनु दक्षि दावने त्वं विशिक्षुरसि यज्ञमातनिः ॥ १० ॥ १८ ॥
त्वमग्ने अदितिर्देव दाशुषे त्वं होत्रा भारती वर्धसे गिरा ।
त्वमिळा शतहिमासि दक्षसे त्वं वृत्रहा वसुपते सरस्वती ॥ ११ ॥

त्वां । अग्ने । दमे । आ । विश्पतिं । विशः । त्वां । राजानं । सुऽविदत्रं । ऋञ्जते ।
त्वं । विश्वानि । सुऽअनीक । पत्यसे । त्वं । सहस्राणि । शता । दश । प्रति ॥ ८ ॥
त्वां । अग्ने । पितरं । इष्टिऽभिः । नरः । त्वां । भ्रात्राय । शम्या । तनूऽरुचं । त्वं ।
पुत्रः । भवसि । यः । ते । अविधत् । त्वं । सखा । सुऽशेवः । पासि । आऽधृषः ॥ ९ ॥
त्वं । अग्ने । ऋभुः । आके । नमस्यः । त्वं । वाजस्य । क्षुऽमतः । रायः । ईशिषे ।
त्वं । वि । भासि । अनु । धक्षि । दावने । त्वं । विऽशिक्षुः । असि । यज्ञं ।
आऽततिनिः ॥ १० ॥ १८ ॥ त्वं । अग्ने । अदितिः । देव । दाशुषे । त्वं । होत्रा ।
भारती । वर्धसे । गिरा । त्वं । इळा । शतऽहिमा । असि । दक्षसे । त्वं । वृत्रऽहा ।
वसुऽपते । सरस्वती ॥ ११ ॥

त्वमग्ने सुभृत उत्तमं वयस्तव स्पार्हे वर्ण आ सन्दृशि श्रियः ।
त्वं वाजः प्रतरणो बृहन्नसि त्वं रयिर्बहुलो विश्वतस्पृथुः ॥ १२ ॥
त्वामग्न आदित्यासः आस्यं१न्त्वां जिह्वां शुचयश्चक्रिरे कवे ।
त्वां रातिषाचो अध्वरेषु सश्चिरे त्वे देवा हविरदन्त्याहुतम् ॥ १३ ॥
त्वे अग्ने विश्वे अमृतासो अद्रुह आसा देवा हविरदन्त्याहुतम् ।
त्वया मर्तासः स्वदन्त आसुतिं त्वं गर्भो वीरुधां जज्ञिषे शुचिः ॥ १४ ॥
त्वं तान्त्सं च प्रति चासि मज्मनाग्ने सुजात प्र च देव रिच्यसे ।
पृक्षो यदत्र महिना वि ते भुवदनु द्यावापृथिवी रोदसी उभे ॥ १५ ॥

त्वं । अग्ने । सुऽभृतः । उत्ऽतमं । वयः । तव । स्पार्हे । वर्णे । आ । सन्ऽदृशि । श्रियः । त्वं । वाजः । प्रऽतरणः । बृहन् । असि । त्वं । रयिः । बहुलः । विश्वतः । पृथुः ॥ १२ ॥ त्वां । अग्ने । आदित्यासः । आस्यं । त्वां । जिह्वां । शुचयः । चक्रिरे । कवे । त्वां । रातिऽसाचः । अध्वरेषु । सश्चिरे । त्वे इति । देवाः । हविः । अदन्ति । आऽहुतं ॥ १३ ॥ त्वे इति । अग्ने । विश्वे । अमृतासः । अद्रुहः । आसा । देवाः । हविः । अदन्ति । आऽहुतं । त्वया । मर्तासः । स्वदन्ते । आऽसुतिं । त्वं । गर्भः । वीरुधां । जज्ञिषे । शुचिः ॥ १४ ॥ त्वं । तान् । सं । च । प्रति । च । असि । मज्मना । अग्ने । सुऽजात । प्र । च । देव । रिच्यसे । पृक्षः । यत् । अत्र । महिना । वि । ते । भुवत् । अनु । द्यावापृथिवी इति । रोदसी इति । उभे इति ॥ १५ ॥

ये स्तोतृभ्यो गोअग्रामश्वपेशसमग्ने रातिमुपसृजन्ति सूरयः ।
अस्माञ्च तांश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः ॥ १६ ॥ १९ ॥

॥ २ ॥ ऋषिः—गृत्समदः । देवता—अग्निः । छन्दः—जगती ॥

॥ २ ॥ यज्ञेन वर्धत जातवेदसमग्निं यजध्वं हविषा तना गिरा ।
समिधानं सुप्रयसं स्वर्णरं घृक्षं होतारं वृजनेषु धूर्षदम् ॥ १ ॥
अभि त्वा नक्तीरुषसो ववाशिरेऽग्ने वत्सं न स्वसरेषु धेनवः ।
दिव इवेदरतिर्मानुषा युगा क्षपो भासि पुरुवार संयतः ॥ २ ॥
तं देवा बुध्ने रजसः सुदंससं दिवस्पृथिव्योररतिं न्यैरिरे ।
रथमिव वेद्यं शुक्रशोचिषमग्निं मित्रं न क्षितिषु प्रशंस्यम् ॥ ३ ॥

ये । स्तोतृऽभ्यः । गोऽअग्रां । अश्वऽपेशसं । अग्ने । रातिं । उपऽसृजंति । सूरयः । अस्मान् । च । तान् । च । प्र । हि । नेषि । वस्यः । आ । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १६ ॥ १९ ॥

यज्ञेन वर्धत । जातऽवेदसं । अग्निं । यजध्वं । हविषा । तना । गिरा । संऽइधानं । सुऽप्रयसं । स्वःऽनरं । घृक्षं । होतारं । वृजनेषु । धूःऽसदं ॥ १ ॥ अभि । त्वा । नक्तीः । उषसः । ववाशिरे । अग्ने । वत्सं । न । स्वसरेषु । धेनवः । दिवःऽइव । इत् । अरतिः । मानुषा । युगा । आ । क्षपः । भासि । पुरुऽवार । संऽयतः ॥ २ ॥ तं । देवाः । बुध्ने । रजसः । सुऽदंससं । दिवःपृथिव्योः । अरतिं । नि । एरिरे । रथंऽइव । वेद्यं । शुक्रऽशोचिषं । अग्निं । मित्रं । न । क्षितिषु । प्रऽशंस्यं ॥ ३ ॥

तमुक्षमाणं रजसि स्व आ दमे चन्द्रमिव सुरुचं ह्वार आ दधुः ।
पृश्न्याः पतरं चितयन्तमक्षभिः पाथो न पायुं जनसी उभे अनु ॥ ४ ॥
स होता विश्वं परि भूत्वध्वरं तनु ह्व्यैर्मनुष ऋञ्जते गिरा ।
हिरिशिप्रो वृधसानासु जर्भुरद्यौर्न स्तृभिश्चितयद्रोदसी अनु ॥ ५ ॥ २० ॥
स नो रेवत्समिधानः स्वस्तये सन्ददस्वान्रयिमस्मासु दीदिहि ।
आ नः कृणुष्व सुविताय रोदसी अग्ने ह्व्या मनुषो देव वीतये ॥ ६ ॥
दा नो अग्ने बृहतो दाः सहस्रिणो दुरो न वाजं श्रुत्या अपा वृधि ।
प्राची द्यावापृथिवी ब्रह्मणा कृधि स्वर्ण शुक्रमुषसो वि दिद्युतः ॥ ७ ॥

तं । उक्षमाणं । रजसि । स्वे । आ । दमे । चंद्रंऽइव । सुऽरुचं । ह्वारे । आ । दधुः ।
पृश्न्याः । पतरं । चितयंतं । अक्षऽभिः । पाथः । न । पायुं । जनसी इति । उभे इति ।
अनु ॥ ४ ॥ सः । होता । विश्वं । परि । भूतु । अध्वरं । तं । ऊं इति । ह्व्यैः ।
मनुषः । ऋंजते । गिरा । हिरिऽशिप्रः । वृधसानासु । जर्भुरत् । द्यौः । न । स्तृऽभिः ।
चितयत् । रोदसी इति । अनु ॥ ५ ॥ २० ॥ सः । नः । रेवत् । संऽइधानः ।
स्वस्तये । संऽददस्वान् । रयिं । अस्मासु । दीदिहि । आ । नः । कृणुष्व । सुविताय ।
रोदसी इति । अग्ने । ह्व्या । मनुषः । देव । वीतये ॥ ६ ॥ दाः । नः । अग्ने ।
बृहतः । दाः । सहस्रिणः । दुरः । न । वाजं । श्रुत्यै । अप । वृधि । प्राची इति ।
द्यावापृथिवी इति । ब्रह्मणा । कृधि । स्वः । न । शुक्रं । उषसः । वि । दिद्युतः ॥ ७ ॥

स इधान उषसो राम्या अनु स्वर्ण दीदेदरुषेण भानुना ।
होत्राभिरग्निर्मनुषः स्वध्वरो राजा विशामतिथिश्चारुरायवे ॥ ८ ॥
एवा नो अग्ने अमृतेषु पूर्व्य धीष्पीपाय बृहद्दिवेषु मानुषा ।
दुहाना धेनुर्वृजनेषु कारवे त्मना शतिनं पुरुरूपमिषणि ॥ ९ ॥
वयमग्ने अवृता वा सुवीर्य ब्रह्मणा वा चितयेमा जनां अति ।
अस्माकं शुन्नमधि पञ्च कृष्टिषूच्चा स्वर्ण शुशुचीत दुष्टरम् ॥ १० ॥
स नो बोधि सहस्य प्रशंस्यो यस्मिन्त्सुजाता इषयन्त सूरयः ।
यं अग्ने यज्ञमुपयन्ति वाजिनो नित्ये तोके दीदिवांसं स्वे दमे ॥ ११ ॥

सः । इधानः । उषसः । राम्याः । अनु । स्वः । न । दीदेत् । अरुषेण । भानुना ।
होत्राभिः । अग्निः । मनुषः । सुऽअध्वरः । राजा । विशा । अतिथिः । चारुः ।
आयवे ॥ ८ ॥ एव । नः । अग्ने । अमृतेषु । पूर्व्य । धीः । पीपाय । बृहत्ऽदिवेषु ।
मानुषा । दुहाना । धेनुः । वृजनेषु । कारवे । त्मना । शतिनम् । पुरुऽरूपम् ।
इषणि ॥ ९ ॥ वयम् । अग्ने । अवृता । वा । सुऽवीर्य । ब्रह्मणा । वा । चितयेम ।
जनान् । अति । अस्माकम् । शुन्नम् । अधि । पञ्च । कृष्टिषु । उच्चा । स्वः । न ।
शुशुचीत । दुस्तरम् ॥ १० ॥ सः । नः । बोधि । सहस्य । प्रऽशंस्यः । यस्मिन् ।
सुऽजाताः । इषयन्त । सूरयः । यम् । अग्ने । यज्ञम् । उपऽयन्ति । वाजिनः । नित्ये ।
तोके । दीदिऽवांसम् । स्वे । दमे ॥ ११ ॥

उभयासो जातवेदः स्याम ते स्तोतारो अग्ने सूरयश्च शर्मणि ।
वस्वो रायः पुरुश्चन्द्रस्य भूयसः प्रजावतः स्वपत्यस्य शग्धि नः ॥ १२ ॥
ये स्तोतृभ्यो गोअग्राम्श्वपेशसमग्ने रातिमुपसृजन्ति सूरयः ।
अस्माञ्च तांश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः ॥ १३ ॥ २१ ॥

॥ ३ ॥ ऋषिः—गृत्समदः । देवता—अग्नियः । छन्दः—त्रिष्टुप् ॥

॥ ३ ॥ समिद्धो अग्निर्निहितः पृथिव्यां प्रत्यङ् विश्वानि भुवनान्यस्थात् ।
होता पावकः प्रदिवः सुमेधा देवो देवान्यजत्वग्निरर्हन् ॥ १ ॥
नराशंसः प्रति धामान्यञ्जन् तिस्रो दिवः प्रति मह्ना स्वर्चिः ।
घृतप्रुषा मनसा हव्यमुन्दन्मूर्धन्यज्ञस्य समनक्तु देवान् ॥ २ ॥

उभयासः । जातऽवेदः । स्याम । ते । स्तोतारः । अग्ने । सूरयः । च । शर्मणि ।
वस्वः । रायः । पुरुऽश्चंद्रस्य । भूयसः । प्रजाऽवतः । सुऽअपत्यस्य । शग्धि ।
नः ॥ १२ ॥ ये । स्तोतृऽभ्यः । गोऽअग्रां । अश्वऽपेशसं । अग्ने । रातिं ।
उपऽसृजंति । सूरयः । अस्मान् । च । तान् । च । प्र । हि । नेषि । वस्यः । आ ।
बृहत् । वदेम । विदथे । सुऽवीराः ॥ १३ ॥ २१ ॥

संऽइद्धः । अग्निः । निऽहितः । पृथिव्यां । प्रत्यङ् । विश्वानि । भुवनानि ।
अस्थात् । होता । पावकः । प्रऽदिवः । सुऽमेधाः । देवः । देवान् । यजतु । अग्निः ।
अर्हन् ॥ १ ॥ नराशंसः । प्रति । धामानि । अंजन् । तिस्रः । दिवः । प्रति । मह्ना ।
सुऽअर्चिः । घृतऽप्रुषा । मनसा । हव्यं । उंदन् । मूर्धन् । यज्ञस्य । सं । अनक्तु ।
देवान् ॥ २ ॥

ईळितो अग्ने मनसा नो अर्हन्देवान्यक्षि मानुषात्पूर्वो अद्य ।
स आ वह मरुतां शर्धो अच्युतमिन्द्रं नरो बर्हिषदं यजध्वम् ॥ ३ ॥
देवं बर्हिर्वर्धमानं सुवीरं स्तीर्णं राये सुभरं वेद्यस्याम् ।
घृतेनाक्तं वसवः सीदतेदं विश्वे देवा आदित्या यज्ञियासः ॥ ४ ॥
वि श्रयन्तामुर्विया हूयमाना द्वारो देवीः सुप्रायणा नमोभिः ।
व्यचस्वतीर्वि प्रथन्तामजुर्या वर्णं पुनाना यशसं सुवीरम् ॥ ५ ॥ २२ ॥
साध्वपांसि सनता न उक्षिते उषासानक्ता वय्येव रण्विते ।
तन्तुं ततं संवयन्ती समीची यज्ञस्य पेशः सुदुघे पयस्वती ॥ ६ ॥
दैव्या होतारा प्रथमा विदुष्टर ऋजु यक्षतः समृचा वपुष्टरा ।
देवान्यजन्ताववृतुथा समञ्जतो नाभा पृथिव्या अधि सानुषु त्रिषु ॥ ७ ॥

ईळितः । अग्ने । मनसा । नः । अर्हन् । देवान् । यक्षि । मानुषात् । पूर्वः । अद्य ।
सः । आ । वह । मरुतां । शर्धः । अच्युतं । इन्द्रं । नरः । बर्हिःऽसदं । यजध्वं ॥ ३ ॥
देवं । बर्हिः । वर्धमानं । सुऽवीरं । स्तीर्णं । राये । सुऽभरं । वेदी इति । अस्यां ।
घृतेन । अक्तं । वसवः । सीदत । इदं । विश्वे । देवाः । आदित्याः ।
यज्ञियासः ॥ ४ ॥ वि । श्रयंता । उर्विया । हूयमानाः । द्वारः । देवीः । सुप्रऽअयनाः ।
नमःऽभिः । व्यचस्वतीः । वि । प्रथंतां । अजुर्याः । वर्णं । पुनानाः । यशसं ।
सुऽवीरं ॥ ५ ॥ २२ ॥ साधु । अपांसि । सनता । नः । उक्षिते इति । उषसानक्ता ।
वय्याऽइव । रण्विते इति । तंतुं । ततं । संवयंती इति संऽवयंती । समीची इति
संऽईची । यज्ञस्य । पेशः । सुदुघे इति सुऽदुघे । पयस्वती इति ॥ ६ ॥ दैव्या ।
होतारा । प्रथमा । विदुःऽतरा । ऋजु । यक्षतः । सं । ऋचा । वपुःऽतरा । देवान् ।
यजंतौ । ऋतुऽथा । सं । अंजतः । नाभा । पृथिव्याः । अधि । सानुषु । त्रिषु ॥७॥

सरस्वती साधयन्ती धियं न इळा देवी भारती विश्वतूर्तिः ।
तिस्रो देवीः स्वधया बर्हिरेदमच्छिद्रं पान्तु शरणं निषद्य ॥ ८ ॥
पिशङ्गरूपः सुभरो वयोधाः श्रुष्टी वीरो जायते देवकामः ।
प्रजां त्वष्टा वि ष्यतु नाभिमस्मे अथा देवानामप्येतु पाथः ॥ ९ ॥
वनस्पतिरवसृजन्नुप स्थादग्निर्हविः सूदयाति प्र धीभिः ।
त्रिधा समक्तं नयतु प्रजानन्देवेभ्यो दैव्यः शमितोप हव्यम् ॥ १० ॥
घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतमस्वस्य धाम ।
अनुष्वधमा वह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥ ११ ॥ २३ ॥

सरस्वती । साधयंती । धियं । नः । इळा । देवी । भारती । विश्वऽतूर्तिः । तिस्रः । देवीः । स्वधया । बर्हिः । आ । इदं । अच्छिद्रं । पांतु । शरणं । निऽसद्य ॥ ८ ॥ पिशंगऽरूपः । सुऽभरः । वयःऽधाः । श्रुष्टी । वीरः । जायते । देवऽकामः । प्रऽजा । त्वष्टा । वि । स्यतु । नाभिं । अस्मे इति । अथ । देवानां । अपि । एतु । पाथः ॥ ९ ॥ वनस्पतिः । अवऽसृजन् । उप । स्थात् । अग्निः । हविः । सूदयाति । प्र । धीभिः । त्रिधा । संऽअक्तं । नयतु । प्रऽजानन् । देवेभ्यः । दैव्यः । शमिता । उप । हव्यं ॥ १० ॥ घृतं । मिमिक्षे । घृतं । अस्य । योनिः । घृते । श्रितः । घृतं । ऊं इति । अस्य । धाम । अनुऽस्वधं । आ । वह । मादयस्व । स्वाहाऽकृतं । वृषभ । वक्षि । हव्यं ॥ ११ ॥ २३ ॥

॥ ४ ॥ ऋषिः-सोमाहुतिर्भार्गवः । देवता-अग्निः । छन्दः-त्रिष्टुप् ॥

॥ ४ ॥ हुवे वः सुद्योत्मानं सुवृक्तिं विशामग्निमतिथिं सुप्रयसम् ।
मित्र इव यो दिधिषाय्यो भूद्देव आदेवे जनें जातवेदाः ॥ १ ॥
इमं विधन्तो अपां सधस्थें द्विता दधुर्भृगवो विक्ष्वायोः ।
एष विश्वान्यभ्यस्तु भूमा देवानामग्निररतिर्जीराश्वः ॥ २ ॥
अग्निं देवासो मानुषीषु विक्षु प्रियं धुः क्षेष्यन्तो न मित्रम् ।
स दीदयदुशतीरूर्म्या आ दक्षाय्यो यो दास्वते दमे आ ॥ ३ ॥
अस्य रण्वा स्वर्स्येव पुष्टिः सन्दृष्टिरस्य हियानस्य दक्षोः ।
वि यो भरिभ्रदोषधीषु जिह्मामत्यो न रथ्यो दोधवीति वारान् ॥ ४ ॥

हुवे । वः । सुऽद्योत्मानं । सुऽवृक्तिं । विशां । अग्निं । अतिथिं । सुऽप्रयसं । मित्रःऽइव । यः । दिधिषाय्यः । भूत् । देवः । आऽदेवे । जने । जातऽवेदाः ॥ १ ॥ इमं । विधंतः । अपां । सधऽस्थे । द्विता । अदधुः । भृगवः । विक्षु । आयोः । एषः । विश्वानि । अभि । अस्तु । भूम । देवानां । अग्निः । अरतिः । जीरऽअश्वः ॥ २ ॥ अग्निं । देवासः । मानुषीषु । विक्षु । प्रियं । धुः । क्षेष्यंतः । न । मित्रं । सः । दीदयत् । उशतीः । ऊर्म्याः । आ । दक्षाय्यः । यः । दास्वंते । दमे । आ ॥ ३ ॥ अस्य । रण्वा । स्वर्स्यऽइव । पुष्टिः । संऽदृष्टिः । अस्य । हियानस्य । धक्षोः । वि । यः । भरिभ्रत् । ओषधीषु । जिह्मां । अत्यः । न । रथ्यः । दोधवीति । वारान् ॥ ४ ॥

आ यन्मे अभ्वं वनदः पनन्तोशिग्भ्यो नामिमीत वर्णम् ।
स चित्रेण चिकिते रंसु भासा जुजुर्वाँ यो मुहुरा युवा भूत् ॥ ५ ॥ २४ ॥
आ यो वना तातृषाणो न भाति वार्ण पथा रथ्येव स्वानीत् ।
कृष्णाध्वा तपू रण्वश्चिकेत द्यौरिव स्मयमानो नभोभिः ॥ ६ ॥
स यो व्यस्थादभि दक्षदुर्वीं पशुर्नैति स्वयुरगोपाः ।
अग्निः शोचिष्माँ अतसान्युष्णन्कृष्णव्यथिरस्वदयन्न भूम ॥ ७ ॥
नू ते पूर्वस्यावसो अधीतौ तृतीये विदथे मन्म शंसि ।
अस्मे अग्ने संयद्वीरं बृहन्तं क्षुमन्तं वाजं स्वपत्यं रयिं दाः ॥ ८ ॥
त्वया यथा गृत्समदासो अग्ने गुहा बन्वन्त उपरा अभि ष्युः ।
सुवीरासो अभिमातिषाहः स्मत्सूरिभ्यो गृणते तद्वयो धाः ॥ ९ ॥ २५ ॥

आ । यत् । मे । अभ्वं । वनदः । पनंत । उशिक्ऽभ्यः । न । अमिमीत । वर्णं ।
सः । चित्रेण । चिकिते । रंऽसु । भासा । जुजुर्वान् । यः । मुहुः । आ । युवा ।
भूत् ॥ ५ ॥ २४ ॥ आ । यः । वना । ततृषाणः । न । भाति । वाः । न । पथा ।
रथ्याऽइव । स्वानीत् । कृष्णऽअध्वा । तपुः । रण्वः । चिकेत । द्यौऽइव । स्मयमानः ।
नभःऽभिः ॥ ६ ॥ सः । यः । वि । अस्थात् । अभि । दक्षत् । उर्वीं । पशुः । न ।
एति । स्वऽयुः । अगोपाः । अग्निः । शोचिष्मान् । अतसानि । उष्णन् ।
कृष्णऽव्यथिः । अस्वदयत् । न । भूम ॥ ७ ॥ नु । ते । पूर्वस्य । अवसः ।
अधिऽइतौ । तृतीये । विदथे । मन्म । शंसि । अस्मे इति । अग्ने । संयत्ऽवीरं ।
बृहंतं । क्षुऽमंतं । वाजं । क्षुऽअपत्यं । रयिं । दाः ॥ ८ ॥ त्वया । यथा ।
गृत्सऽमदासः । अग्ने । गुहा । बन्वंतः । उपरान् । अभि । स्युरिति स्युः । सुऽवीरासः ।
अभिमातिऽसहः । स्मत् । सूरिऽभ्यः । गृणते । तत् । वयः । धाः ॥ ९ ॥ २५ ॥

॥ ५ ॥ ऋषिः-सोमाहुतिर्भार्गवः । देवता-अग्निः । छन्दः-अनुष्टुप् ॥

॥ ५ ॥ होतांजनिष्ट चेतनः पिता पितृभ्य ऊतये ।
प्रयक्षञ्जेन्यं वसु शकेम वाजिनो यमम् ॥ १ ॥
आ यस्मिन्त्सप्त रश्मयस्तता यज्ञस्य नेतरि ।
मनुष्वदैव्यमष्टमं पोता विश्वं तदिन्वति ॥ २ ॥
दधन्वे वा यदीमनु वोचद्ब्रह्माणि वेरु तत् ।
परि विश्वानि काव्या नेमिश्चक्रमिवाभवत् ॥ ३ ॥
साकं हि शुचिना शुचिः प्रशास्ता क्रतुनाजनि ।
विद्वाँ अस्य व्रता ध्रुवा वया इवानु रोहते ॥ ४ ॥
ता अस्य वर्णमायुवो नेष्टुः सचन्त धेनवः ।
कुवित्सिस्रभ्य आ वरं स्वसारो या इदं ययुः ॥ ५ ॥
यदीं मातुरुप स्वसा घृतं भरंत्यस्थित ।
तासामध्वर्युरागतौ यवौ वृषीव मोदते ॥ ६ ॥

होता । अजनिष्ट । चेतनः । पिता । पितृऽभ्यः । ऊतये । प्रऽयक्षन् । जेन्यं । वसु । शकेम । वाजिनः । यमं ॥ १ ॥ आ । यस्मिन् । सप्त । रश्मयः । ततः । यज्ञस्य । नेतरि । मनुष्वत् । दैव्यं । अष्टमं । पोता । विश्वं । तत् । इन्वति ॥ २ ॥ दधन्वे । वा । यत् । ईं । अनु । वोचत् । ब्रह्माणि । वेः । ऊं इति । तत् । परि । विश्वानि । काव्या । नेमिः । चक्रंऽइव । अभवत् ॥ ३ ॥ साकं । हि । शुचिना । शुचेः । प्रऽशास्ता । क्रतुना । अजनि । विद्वान् । अस्य । व्रता । ध्रुवा । वयाःऽइव । अनु । रोहते ॥ ४ ॥ ताः । अस्य । वर्णं । आयुवः । नेष्टुः । सचंत । धेनवः । कुवित् । तिसृऽभ्यः । आ । वरं । स्वसारः । याः । इदं । ययुः ॥ ५ ॥ यदिं । मातुः । उप । स्वसा । घृतं । भरंती । अस्थित । तासां । अध्वर्युः । आऽगंतौ । यवः । वृष्टीऽइव । मोदते ॥ ६ ॥

स्वः स्वाय धायसे कृणुताम्रत्विगृत्विजम् ।
स्तोमं यज्ञं चादरे वनेमा ररिमा वयम् ॥ ७ ॥
यथा विद्वाँ अरं करद्विश्वेभ्यो यजतेभ्यः ।
अयमग्ने त्वे अपि यं यज्ञं चकृमा वयम् ॥ ८ ॥ २६ ॥

॥ ६ ॥ ऋषिः-सोमाहुतिर्भार्गवः । देवता-अग्निः । छन्दः-गायत्री ॥

॥६॥ इमां मे अग्ने समिधमिमामुपसदं वनेः । इमा ऊ षु श्रुधी गिरः ॥१॥
अया ते अग्ने विधेमोर्जो नपादश्वमिष्टे । एना सूक्तेन सुजात ॥ २ ॥
तं त्वा गीर्भिर्गिर्वणसं द्रविणस्युं द्रविणोदः । सपर्येम सपर्यवः ॥ ३ ॥
स बोधि सूरिर्मघवा वसुपते वसुदावन् । युयोध्यस्मद्वेषांसि ॥ ४ ॥
स नो वृष्टिं दिवस्परि स नो वाजमनर्वाणम् । स नः सहस्रिणीरिषः ॥५॥

स्वः । स्वाय । धायसे । कृणुत । ऋत्विक् । ऋत्विजम् । स्तोमम् । यज्ञम् । च । आत् । अरम् । वनेम । ररिम । वयम् ॥ ७ ॥ यथा । विद्वान् । अरम् । करत् । विश्वेभ्यः । यजतेभ्यः । अयम् । अग्ने । त्वे इति । अपि । यम् । यज्ञम् । चकृम । वयम् ॥ ८ ॥ २६ ॥

इमा । मे । अग्ने । समिधम् । इमा । उपऽसदम् । वनेरिति वनेः । इमाः । ऊम् इति । सु । श्रुधि । गिरः ॥ १ ॥ अया । ते । अग्ने । विधेम । ऊर्जः । नपात् । अश्वम्ऽइष्टे । एना । सुऽउक्तेन । सुऽजात ॥ २ ॥ तम् । त्वा । गीःऽभिः । गिर्वणसम् । द्रविणस्युम् । द्रविणःऽदः । सपर्येम । सपर्यवः ॥ ३ ॥ सः । बोधि । सूरिः । मघऽवा । वसुऽपते । वसुऽदावन् । युयोधि । अस्मत् । द्वेषांसि ॥ ४ ॥ सः । नः । वृष्टिम् । दिवः । परि । सः । नः । वाजम् । अनर्वाणम् । सः । नः । सहस्रिणीः । इषः ॥ ५ ॥

ईळानायावस्यवे यविष्ठ दूत नो गिरा । यजिष्ठ होतरा गहि ॥ ६ ॥
अन्तर्ह्यग्न ईयसे विद्वाञ्जन्मोभया कवे । दूतो जन्येव मित्र्यः ॥ ७ ॥
स विद्वाँ आ च पिप्रयो यक्षि चिकित्व आनुषक् ।
आ चास्मिन्त्सत्सि बर्हिषि ॥ ८ ॥ २७ ॥

॥ ७ ॥ ऋषिः—सोमाहुतिर्भार्गवः । देवता—अग्निः । छन्दः—गायत्री ॥

॥ ७ ॥ श्रेष्ठं यविष्ठ भारताग्ने द्युमन्तमा भर । वसो पुरुस्पृहं रयिम् ॥१॥
मा नो अरातिरीशत देवस्य मर्त्यस्य च । परि तस्या उत द्विषः ॥ २ ॥
विश्वा उत त्वया वयं धारा उदन्या इव । अति गाहेमहि द्विषः ॥ ३ ॥
शुचिः पावक वन्द्योऽग्ने बृहद्वि रोचसे । त्वं घृतेभिराहुतः ॥ ४ ॥
त्वं नो असि भारताग्ने वशाभिरुक्षभिः । अष्टापदीभिराहुतः ॥ ५ ॥

ईळानाय । अवस्यवे । यविष्ठ । दूत । नः । गिरा । यजिष्ठ । होतः । आ । गहि ॥ ६ ॥ अंतः । हि । अग्ने । ईयसे । विद्वान् । जन्म । उभया । कवे । दूतः । जन्याऽइव । मित्र्यः ॥ ७ ॥ सः । विद्वान् । आ । च । पिप्रयः । यक्षि । चिकित्वः । आनुषक् । आ । च । अस्मिन् । सत्सि । बर्हिषि ॥ ८ ॥ २७ ॥

श्रेष्ठं । यविष्ठ । भारत । अग्ने । द्युमंतं । आ । भर । वसो इति । पुरुऽस्पृहं । रयिं ॥ १ ॥ मा । नः । अरातिः । ईशत । देवस्य । मर्त्यस्य । च । परि । तस्याः । उत । द्विषः ॥ २ ॥ विश्वाः । उत । त्वया । वयं । धाराः । उदन्याःऽइव । अति । गाहेमहि । द्विषः ॥ ३ ॥ शुचिः । पावक । वंद्यः । अग्ने । बृहत् । वि । रोचसे । त्वं । घृतेभिः । आऽहुतः ॥ ४ ॥ त्वं । नः । असि । भारत । अग्ने । वशाभिः । उक्षऽभिः । अष्टाऽपदीभिः । आऽहुतः ॥ ५ ॥

द्रुऽअन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः । सहसस्पुत्रो अद्भुतः ॥ ६ ॥ २८ ॥

॥ ८ ॥ ऋषिः—गृत्समदः । देवता—अग्निः । छन्दः—गायत्री ॥

॥८॥ वाजयन्निव नू रथान्योगाँ अग्नेरुप स्तुहि । यशस्तमस्य मीळ्हुषः ॥१॥
यः सुनीथो ददाशुषेऽजुर्यो जरयन्नरिं । चारुप्रतीक आहुतः ॥ २ ॥
य उ श्रिया दमेष्वा दोषोषसि प्रशस्यते । यस्य व्रतं न मीयते ॥ ३ ॥
आ यः स्वर्ण भानुना चित्रो विभात्यर्चिषा । अञ्जानो अजरैरभि ॥ ४ ॥
अत्रिमनु स्वराज्यमग्निमुक्थानि वावृधुः । विश्वा अधि श्रियो दधे ॥ ५ ॥
अग्नेरिन्द्रस्य सोमस्य देवानामूतिभिर्वयम् ।
अरिष्यन्तः सचेमह्यभि ष्याम पृतन्यतः ॥ ६ ॥ २९ ॥ ५ ॥

द्रुऽअन्नः । सर्पिःऽआसुतिः । प्रत्नः । होता । वरेण्यः । सहसः । पुत्रः । अद्भुतः ॥ ६ ॥ २८ ॥

वाजयनऽइव । नु । रथान् । योगान् । अग्नेः । उप । स्तुहि । यशःऽतमस्य । मीळ्हुषः ॥ १ ॥ यः । सुऽनीथः । ददाशुषे । अजुर्यः । जरयन् । अरिं । चारुऽप्रतीकः । आऽहुतः ॥ २ ॥ यः । ऊं इति । श्रिया । दमेषु । आ । दोषा । उषसि । प्रऽशस्यते । यस्य । व्रतं । न । मीयते ॥ ३ ॥ आ । यः । स्वः । न । भानुना । चित्रः । विऽभाति । अर्चिषा । अंजानः । अजरैः । अभि ॥ ४ ॥ अत्रिं । अनु । स्वऽराज्यं । अग्निं । उक्थानि । वावृधुः । विश्वाः । अधि । श्रियः । दधे ॥ ५ ॥ अग्नेः । इंद्रस्य । सोमस्य । देवानां । ऊतिऽभिः । वयं । अरिष्यंतः । सचेमहि । अभि । स्याम । पृतन्यतः ॥ ६ ॥ २९ ॥ ५ ॥

॥ इति द्वितीयाष्टके पंचमोऽध्यायः ॥ ५ ॥

॥ अथ द्वितीयाष्टके षष्ठोऽध्यायः ॥ ६ ॥

॥ ९ ॥ ऋषिः—गृत्समदः । देवता—अग्निः । छन्दः—त्रिष्टुप् ॥

॥ ९ ॥ नि होता होतृषदने विदानस्त्वेषो दीदिवाँ असदत्सुदक्षः ।
अदंब्धव्रतप्रमतिर्वसिष्ठः सहस्रम्भरः शुचिर्जिह्वो अग्निः ॥ १ ॥
त्वं दूतस्त्वमु नः परस्पास्त्वं वस्य आ वृषभ प्रणेता ।
अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन्दीद्यद्बोधि गोपाः ॥ २ ॥
विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे ।
यस्माद्योनेरुदारिथा यजे तं प्र त्वे हवींषि जुहुरे समिद्धे ॥ ३ ॥
अग्ने यजस्व हविषा यजीयाञ्छुष्टी देष्णमभि गृणीहि राधः ।
त्वं ह्यसि रयिपती रयीणां त्वं शुक्रस्य वचसो मनोता ॥ ४ ॥

नि । होता । होतृऽसदने । विदानः । त्वेषः । दीदिऽवान् । असदत् । सुऽदक्षः । अदंब्धव्रतऽप्रमतिः । वसिष्ठः । सहस्रंऽभरः । शुचिंऽजिह्वः । अग्निः ॥१॥
त्वं । दूतः । त्वं । ऊं इति । नः । परःऽपाः । त्वं । वस्यः । आ । वृषभ । प्रऽनेता ।
अग्ने । तोकस्य । नः । तने । तनूना । अप्रंऽयुच्छन् । दीद्यत् । बोधि । गोपाः ॥ २ ॥
विधेम । ते । परमे । जन्मन् । अग्ने । विधेम । स्तोमैः । अवरे । सधऽस्थे । यस्मात् ।
योनेः । उत्ऽआरिथ । यजे । तं । प्र । त्वे इति । हवींषि । जुहुरे । संऽइद्धे ॥ ३ ॥
अग्ने । यजस्व । हविषा । यजीयान् । शुष्टी । देष्णं । अभि । गृणीहि । राधः । त्वं ।
हि । असि । रयिऽपतिः । रयीणां । त्वं । शुक्रस्य । वचसः । मनोता ॥ ४ ॥

उभयं ते न क्षीयते वसव्यं दिवेदिवे जायमानस्य दस्म ।
कृधि क्षुमन्तं जरितारमग्ने कृधि पतिं स्वपत्यस्य रायः ॥ ५ ॥
सैनानीकेन सुविदत्रो अस्मे यष्टा देवाँ आर्यजिष्ठः स्वस्ति ।
अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवदिदीहि ॥ ६ ॥ १ ॥

॥ १० ॥ ऋषिः—यत्समदः । देवता—अग्निः । छन्दः—त्रिष्टुप् ॥

॥ १० ॥ जोहूत्रो अग्निः प्रथमः पितेवेळस्पदे मनुषा यत्समिद्धः ।
श्रियं वसानो अमृतो विचेता मर्मृजेन्यः अवस्यूःस वाजी ॥ १ ॥
श्रुया अग्निश्चित्रभानुर्हवं मे विश्वाभिर्गीभिरमृतो विचेताः ।
श्यावा रथं वहतो रोहिता वोतारुषाह चक्रे विभृत्रः ॥ २ ॥
उत्तानायामजनयन्त्सुभूतं भुवदग्निः पुरुपेशासु गर्भः ।
शिरिणायां चिदक्तुना महोभिरपरीवृतो वसति प्रचेताः ॥ ३ ॥

उभयं । ते । न । क्षीयते । वसव्यं । दिवेऽदिवे । जायमानस्य । दस्म । कृधि । क्षुऽमंतं । जरितारं । अग्ने । कृधि । पतिं । सुऽअपत्यस्य । रायः ॥ ५ ॥ सः । एना । अनीकेन । सुऽविदत्रः । अस्मे इति । यष्टा । देवान् । आऽर्यजिष्ठः । स्वस्ति । अदब्धः । गोपाः । उत । नः । परःऽपाः । अग्ने । द्युऽमत् । उत । रेवत् । दिदीहि ॥ ६ ॥ १ ॥

जोहूत्रः । अग्निः । प्रथमः । पिताऽइव । इळः । पदे । मनुषा । यत् । संऽइद्धः । श्रियं । वसानः । अमृतः । विऽचेताः । मर्मृजेन्यः । श्रवस्यः । सः । वाजी ॥ १ ॥ श्रुयाः । अग्निः । चित्रऽभानुः । हवं । मे । विश्वाभिः । गीःऽभिः । अमृतः । विऽचेताः । श्यावा । रथं । वहतः । रोहिता । वा । उत । अरुषा । अह । चक्रे । विऽभृत्रः ॥ २ ॥ उत्तानायां । अजनयन् । सुऽसूतं । भुवत् । अग्निः । पुरुऽपेशासु । गर्भः । शिरिणायां । चित् । अक्तुना । महःऽभिः । अपरिऽवृतः । वसति । प्रऽचेताः ॥ ३ ॥

जिघर्म्यग्निं हविषा घृतेनं प्रतिक्षियंतं भुवनानि विश्वा ।
पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नै रभसं दृशानं ॥ ४ ॥
आ विश्वतः प्रत्यञ्चं जिघर्म्यरक्षसा मनसा तज्जुषेत ।
मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशै तन्वा३ जभुराणः ॥ ५ ॥
ज्ञेया भागं सहसानो वरेण त्वादूतासो मनुवद्वदेम ।
अनूनमग्निं जुह्वा वचस्या मधुपृचं धनसा जोहवीमि ॥ ६ ॥ २ ॥

॥ ११ ॥ ऋषिः-गृत्समदः । देवता-इन्द्रः । छन्दः-त्रिष्टुप् ॥

॥ ११ ॥ श्रुधी हवमिन्द्र मा रिषण्यः स्यामं ते दावने वसूनाम् ।
इमा हि त्वामूर्जो वर्धयंति वसूयवः सिन्धवो न क्षरंन्तः ॥ १ ॥
सृजो महीरिन्द्र या अपिन्वः पारिष्ठिता अहिना शूर पूर्वीः ।
अमर्त्यं चिद्दासं मन्यमानमवाभिनदुक्थैर्वावृधानः ॥ २ ॥

जिघर्मि । अग्निं । हविषा । घृतेनं । प्रतिऽक्षियंतं । भुवनानि । विश्वा । पृथुं । तिरश्चा । वयसा । बृहंतं । व्यचिष्ठं । अन्नैः । रभसं । दृशानं ॥ ४ ॥ आ । विश्वतः । प्रत्यंचं । जिघर्मि । अरक्षसा । मनसा । तत् । जुषेत । मर्यऽश्रीः । स्पृहयत्ऽवर्णः । अग्निः । न । अभिऽमृशै । तन्वा । जभुराणः ॥ ५ ॥ ज्ञेयाः । भागं । सहसानः । वरेण । त्वाऽदूतासः । मनुऽवत् । वदेम । अनूनं । अग्निं । जुह्वा । वचस्या । मधुऽपृचं । धनऽसाः । जोहवीमि ॥ ६ ॥ २ ॥

श्रुधि । हवं । इंद्र । मा । रिषण्यः । स्यामं । ते । दावनें । वसूनां । इमाः । हि । त्वां । ऊर्जः । वर्धयंति । वसुऽयवः । सिंधवः । न । क्षरंतः ॥ १ ॥ सृजः । महीः । इंद्र । याः । अपिन्वः । परिऽस्थिताः । अहिंना । शूर । पूर्वीः । अमर्त्यं । चित् । दासं । मन्यमानं । अव । अभिनत् । उक्थैः । ववृधानः ॥ २ ॥

उक्थेष्विन्नु शूर येषु चाकन्स्तोमेष्विन्द्र रुद्रियेषु च ।
तुभ्येदेता यासु मन्दसानः प्र वायवे सिस्रते न शुभ्राः ॥ ३ ॥
शुभ्रं नु ते शुष्मं वर्धयन्तः शुभ्रं वज्रं बाह्वोर्दधानाः ।
शुभ्रस्त्वमिन्द्र वावृधानो अस्मे दासीर्विशः सूर्येण सह्याः ॥ ४ ॥
गुहा हितं गुह्यं गूळ्हमप्स्वपीवृतं मायिनं क्षियन्तम् ।
उतो अपो द्यां तस्तभ्वांसमहन्नहिं शूर वीर्येण ॥ ५ ॥ ३ ॥
स्तवा नु त इन्द्र पूर्व्या महान्युत स्तवाम नूतना कृतानि ।
स्तवा वज्रं बाह्वोरुशन्तं स्तवा हरी सूर्यस्य केतू ॥ ६ ॥
हरी नु त इन्द्र वाजयन्ता घृतश्चुतं स्वारमस्वार्ष्टाम् ।
वि समना भूमिरप्रथिष्टारस्त पर्वतश्चित्सरिष्यन् ॥ ७ ॥

उक्थेषु । इत् । नु । शूर । येषु । चाकन् । स्तोमेषु । इन्द्र । रुद्रियेषु । च । तुभ्य । इत् । एताः । यासु । मन्दसानः । प्र । वायवे । सिस्रते । न । शुभ्राः ॥ ३ ॥ शुभ्रं । नु । ते । शुष्मं । वर्धयंतः । शुभ्रं । वज्रं । बाह्वोः । दधानाः । शुभ्रः । त्वं । इन्द्र । ववृधानः । अस्मे इति । दासीः । विशः । सूर्येण । सह्याः ॥ ४ ॥ गुहा । हितं । गुह्यं । गूळ्हं । अप्ऽसु । आपिऽवृतं । मायिनं । क्षियंतं । उतो इति । अपः । द्यां । तस्तभ्वांसं । अहन् । अहिं । शूर । वीर्येण ॥ ५ ॥ ३ ॥ स्तव । नु । ते । इन्द्र । पूर्व्या । महानि । उत । स्तवाम । नूतना । कृतानि । स्तव । वज्रं । बाह्वोः । उशंतं । स्तव । हरी इति । सूर्यस्य । केतू इति ॥ ६ ॥ हरी इति । नु । ते । इन्द्र । वाजयंता । घृतऽश्चुतं । स्वारं । अस्वार्ष्टां । वि । समना । भूमिः । अप्रथिष्ट । अरंस्त । पर्वतः । चित् । सरिष्यन् ॥ ७ ॥

नि पर्वतः सादयप्रयुच्छन्त्सं मातृभिर्वावशानो अक्रान् ।
दूरे पारे वाणीं वर्धयन्त इन्द्रेषितां धमनिं पप्रथन्नि ॥ ८ ॥
इन्द्रो महां सिन्धुमाशयानं मायाविनं वृत्रमस्फुरन्निः ।
अरेजेतां रोदसी भियाने कनिक्रदतो वृष्णो अस्य वज्रात् ॥ ९ ॥
अरोरवीद्वृष्णो अस्य वज्रोऽमानुषं यन्मानुषो निजूर्वीत् ।
नि मायिनो दानवस्य माया अपादयत्पप्रिवान्त्सुतस्य ॥ १० ॥ ४ ॥
पिबापिबेदिन्द्र शूर सोमं मन्दन्तु त्वा मन्दिनः सुतासः ।
पृणन्तस्ते कुक्षी वर्धयन्त्वित्था सुतः पौर इन्द्रमाव ॥ ११ ॥
त्वे इन्द्राप्यंभूम विप्रा धियं वनेम ऋतया सपन्तः ।
अवस्यवो धीमहि प्रशस्तिं सद्यस्ते रायो दावने स्याम ॥ १२ ॥

नि । पर्वतः । सादि । अप्रऽयुच्छन् । सं । मातृऽभिः । वावशानः । अक्रान् । दूरे । पारे । वाणीं । वर्धयंतः । इंद्रऽइषितां । धमनिं । पप्रथन् । नि ॥ ८ ॥ इंद्रः । महां । सिंधुं । आऽशयानं । मायाऽविनं । वृत्रं । अस्फुरत् । निः । अरेजेतां । रोदसी इति । भियाने इति । कनिक्रदतः । वृष्णः । अस्य । वज्रात् ॥ ९ ॥ अरोरवीत् । वृष्णः । अस्य । वज्रः । अमानुषं । यत् । मानुषः । निऽजूर्वीत् । नि । मायिनः । दानवस्य । मायाः । अपादयत् । पप्रिऽवान् । सुतस्य ॥ १० ॥ ४ ॥ पिबऽपिब । इत् । इंद्र । शूर । सोमं । मंदंतु । त्वा । मंदिनः । सुतासः । पृणंतः । ते । कुक्षी इति । वर्धयंतु । इत्था । सुतः । पौरः । इंद्र । आव ॥ ११ ॥ त्वे इति । इंद्र । आपं । अभूम । विप्राः । धियं । वनेम । ऋतऽया । सपंतः । अवस्यवः । धीमहि । प्रऽशस्तिं । सद्यः । ते । रायः । दावने । स्याम ॥ १२ ॥

स्याम ते तं इन्द्र ये त ऊती अवस्यव ऊजं वर्धयन्तः ।
शुष्मिन्तमं यं चाकनाम देवास्मे रयिं रासि वीरवन्तम् ॥ १३ ॥
रासि क्षयं रासि मित्रमस्मे रासि शर्धं इन्द्र मारुतं नः ।
सजोषसो ये च मन्दसानाः प्र वायवः पान्त्यग्रणीतिम् ॥ १४ ॥
व्यन्त्वित्तु येषु मन्दसानस्तृपत्सोमं पाहि द्रह्यदिन्द्र ।
अस्मान्त्सु पृत्सा तरुत्रावर्धयो द्यां बृहद्भिरर्कैः ॥ १५ ॥ ५ ॥
बृहन्त इत्तु ये ते तरुत्रोक्थेभिर्वा सुम्नमाविवांसान् ।
स्तृणानासो बर्हिः पस्त्यावत्त्वोताः इदिन्द्र वाजमग्मन् ॥ १६ ॥
उग्रेष्वित्तु शूर मन्दसानस्त्रिकद्रुकेषु पाहि सोममिन्द्र ।
प्रदोधुवच्छमश्रुषु प्रीणानो याहि हरिभ्यां सुतस्य पीतिम् ॥ १७ ॥

स्याम । ते । ते । इंद्र । ये । ते । ऊती । अवस्यवः । ऊजं । वर्धयंतः । शुष्मिन्ऽतमं । यं । चाकनाम । देव । अस्मे इति । रयिं । रासि । वीरऽवंतं ॥ १३ ॥ रासि । क्षयं । रासि । मित्रं । अस्मे इति । रासि । शर्धः । इंद्र । मारुतं । नः । सऽजोषसः । ये । च । मंदसानाः । प्र । वायवः । पांति । अग्रंऽनीतिं ॥ १४ ॥ व्यंतु । इत् । नु । येषु । मंदसानः । तृपत् । सोमं । पाहि । द्रह्यत् । इंद्र । अस्मान् । सु । पृत्ऽसु । आ । तरुत्र । अवर्धयः । द्यां । बृहत्ऽभिः । अर्कैः ॥ १५ ॥ बृहंतः । इत् । नु । ये । ते । तरुत्र । उक्थेभिः । वा । सुम्नं । आऽविवांसान् । स्तृणानासः । बर्हिः । पस्त्यऽवत् । त्वाऽऊताः । इत् । इंद्र । वाजं । अग्मन् ॥ १६ ॥ उग्रेषु । इत् । नु । शूर । मंदसानः । त्रिऽकद्रुकेषु । पाहि । सोमं । इंद्र । प्रऽदोधुवत् । श्मश्रुषु । प्रीणानः । याहि । हरिऽभ्यां । सुतस्य । पीतिं ॥ १७ ॥

धिष्वा शवः शूर येन वृत्रमवाभिनदाल्मौर्णवाभम् ।
अपावृणोज्ज्योतिरार्याय नि सव्यतः सादि दस्युरिन्द्र ॥ १८ ॥
सनेम ये ते ऊतिभिस्तरन्तो विश्वाः स्पृध आर्येण दस्यून् ।
अस्मभ्यं तत्त्वाष्ट्रं विश्वरूपमरन्धयः साख्यस्य त्रिताय ॥ १९ ॥
अस्य सुवानस्य मन्दिनस्त्रितस्य न्यर्बुदं वावृधानो अस्तः ।
अवर्तयत्सूर्यो न चक्रं भिनद्बलमिन्द्रो अङ्गिरस्वान् ॥ २० ॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्ददेम विदथे सुवीराः ॥२१॥६॥१॥

॥ द्वितीयोऽनुवाकः ॥

॥ १२ ॥ ऋषिः-गृत्समदः । देवता-इन्द्रः । छन्दः-त्रिष्टुप् ॥

॥ १२ ॥ यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत् ।
यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः ॥ १ ॥

धिष्व । शवः । शूर । येन । वृत्रं । अवऽअभिनत् । दानुं । और्णऽवाभं । अप ।
अवृणोः । ज्योतिः । आर्याय । नि । सव्यतः । सादि । दस्युः । इन्द्र ॥ १८ ॥
सनेम । ये । ते । ऊतिऽभिः । तरंतः । विश्वाः । स्पृधः । आर्येण । दस्यून् ।
अस्मभ्यं । तत् । त्वाष्ट्रं । विश्वऽरूपं । अरंधयः । साख्यस्य । त्रिताय ॥ १९ ॥ अस्य ।
सुवानस्य । मंदिनः । त्रितस्य । नि । अर्बुदं । वावृधानः । अस्तरित्यस्तः । अवर्तयत् ।
सूर्यः । न । चक्रं । भिनत् । बलं । इंद्रः । अंगिरस्वान् ॥ २० ॥ नूनं । सा । ते ।
प्रति । वरं । जरित्रे । दुहीयत् । इंद्र । दक्षिणा । मघोनी । शिक्ष । स्तोतृऽभ्यः । मा ।
अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुवीराः ॥ २१ ॥ १ ॥
यः । जातः । एव । प्रथमः । मनस्वान् । देवः । देवान् । क्रतुना । परिऽअभूषत् । यस्य । शुष्मात् । रोदसी इति । अभ्यसेतां । नृम्णस्य । मह्ना । सः ।
जनासः । इंद्रः ॥ १ ॥

यः पृथिवीं व्यथमानामदृंन्हयः पर्वतान्प्रकुपिताँ अरंम्णात् ।
यो अन्तरिक्षं विममे वरीयो यो द्यामस्तभ्नात्स जनास इन्द्रः ॥ २ ॥
यो हत्वाहिमरिंणात्सप्त सिन्धून्यो गा उदाजदपधा वलस्य ।
यो अश्मनोरन्तरग्निं जजानं संवृक्समत्सु स जनास इन्द्रः ॥ ३ ॥
येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः ।
श्वघ्नीव यो जिगीवाँ लक्षमाददर्यः पुष्टानि स जनास इन्द्रः ॥ ४ ॥
यं स्मा पृच्छन्ति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनम् ।
सो अर्यः पुष्टीर्विज इवामिनाति श्रदस्मै धत्त स जनास इन्द्रः ॥ ५ ॥ ७ ॥
यो रध्रस्य चोदिता यः कृशस्य यो ब्रह्मणो नाधमानस्य कीरेः ।
युक्तग्रावणो योऽविता सुशिप्रः सुतसोमस्य स जनास इन्द्रः ॥ ६ ॥

यः । पृथिवीं । व्यथमानां । अदृंहत् । यः । पर्वतान् । प्रऽकुपितान् । अरंम्णात् । यः । अन्तरिक्षं । विऽममे । वरीयः । यः । द्यां । अस्त-भ्नात् । सः । जनासः । इंद्रः ॥ २ ॥ यः हत्वा । अहिं । अरिंणात् । सप्त । सिंधून् । यः । गाः । उत्ऽआजत् । अपऽधा । वलस्य । यः । अश्मनोः । अंतः । अग्निं । जजानं । संऽवृक् । समत्ऽसु । सः । जनासः । इंद्रः ॥ ३ ॥ येनं । इमा । विश्वा । च्यवना । कृतानिं । यः । दासं । वर्णं । अधरं । गुहा । अकरित्यकः । श्वघ्नीऽइव । यः । जिगीवान् । लक्षं । आदंत् । अर्यः । पुष्टानिं । सः । जनासः । इंद्रः ॥ ४ ॥ यं । स्म । पृच्छंति । कुहं । सः । इतिं । घोरं । उत । ईं । आहुः । न । एषः । अस्ति । इतिं । एनं । सः । अर्यः । पुष्टीः । विजःऽइव । आ । मिनाति । श्रत् । अस्मै । धत्त । सः । जनासः । इंद्रः ॥ ५ ॥ ७ ॥ यः । रध्रस्य । चोदिता । यः । कृशस्य । यः । ब्रह्मणः । नाधमानस्य । कीरेः । युक्तऽग्रावणः । यः । अविता । सुऽशिप्रः । सुतऽसोमस्यः । सः । जनासः । इंद्रः ॥ ६ ॥

यस्याश्वासः प्रदिशि यस्य गावो यस्य ग्रामा यस्य विश्वे रथासः ।
यः सूर्यं य उषसं जजान यो अपां नेता स जनास इन्द्रः ॥ ७ ॥
यं क्रन्दसी संयती विह्वयेते परेऽवर उभया अमित्राः ।
समानं चिद्रथमातस्थिवांसा नाना हवेते स जनास इन्द्रः ॥ ८ ॥
यस्मान्न ऋते विजयन्ते जनासो यं युध्यमाना अवसे हवन्ते ।
यो विश्वस्य प्रतिमानं बभूव यो अच्युतच्युत्स जनास इन्द्रः ॥ ९ ॥
यः शश्वतो महो नो दधानानमन्यमानाञ्छर्वा जघान ।
यः शर्धते नानुददाति शृध्यां यो दस्योर्हन्ता स जनास इन्द्रः ॥ १० ॥ ८ ॥
यः शम्बरं पर्वतेषु क्षियन्तं चत्वारिंश्यां शरद्यन्वविन्दत् ।
ओजायमानं यो अहिं जघान दानुं शयानं स जनास इन्द्रः ॥ ११ ॥

यस्य । अश्वासः । प्रऽदिशि । यस्य । गावः । यस्य । ग्रामाः । यस्य । विश्वे । रथासः । यः । सूर्यं । यः । उषसं । जजान । यः । अपां । नेता । सः । जनासः । इंद्रः ॥ ७ ॥ यं । क्रंदसी इति । संयती इति संऽयती । विह्वयेते इति विऽह्वयेते । परे । अवरे । उभयाः । अमित्राः । समानं । चित् । रथं । आतस्थिऽवांसा । नाना । हवेते इति । सः । जनासः । इंद्रः ॥ ८ ॥ यस्मात् । न । ऋते । विऽजयंते । जनासः । यं । युध्यमानाः । अवसे । हवंते । यः । विश्वस्य । प्रतिऽमानं । बभूव । यः । अच्युतऽच्युत् । सः । जनासः । इंद्रः ॥ ९ ॥ यः । शश्वतः । महः । एनः । दधानान् । अमंन्यमानान् । शर्वा । जघान । यः । शर्धते । न । अनुऽददाति । शृध्यां । यः । दस्योः । हंता । सः । जनासः । इंद्रः ॥ १० ॥ ८ ॥ यः । शंबरं । पर्वतेषु । क्षियंतं । चत्वारिंश्यां । शरदि । अनुऽअविंदत् । ओजायमानं । यः । अहिं । जघान । दानुं । शयानं । सः । जनासः । इंद्रः ॥ ११ ॥

यः सप्तरश्मिर्वृषभस्तुविष्मानवासृजत्सर्तवे सप्त सिन्धून् ।
यो रौहिणमस्फुरद्वज्रबाहुर्द्यामारोहन्तं स जनास इन्द्रः ॥ १२ ॥
द्यावा चिदस्मै पृथिवी नमेते शुष्माच्चिदस्य पर्वता भयन्ते ।
यः सोमपा निचितो वज्रबाहुर्यो वज्रहस्तः स जनास इन्द्रः ॥ १३ ॥
यः सुन्वन्तमवति यः पचन्तं यः शंसन्तं यः शशमानमूती ।
यस्य ब्रह्म वर्धनं यस्य सोमो यस्येदं राधः स जनास इन्द्रः ॥ १४ ॥
यः सुन्वते पचते दुध्र आ चिद्वाजं ददर्षि स किलासि सत्यः ।
वयं ते इन्द्र विश्वहा प्रियासः सुवीरासो विदथमा वदेम ॥ १५ ॥ ९ ॥

॥ १३ ॥ ऋषिः—गृत्समदः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥१३॥ ऋतुर्जनित्री तस्या अपस्परि मक्षू जात आविशद्यासु वर्धते ।
तदाहना अभवत्पिप्युषी पयोंऽशोः पीयूषं प्रथमं तदुक्थ्यम् ॥ १ ॥

यः । सप्तऽरश्मिः । वृषभः । तुविष्मान् । अवऽअसृजत् । सर्तवे । सप्त । सिन्धून् । यः । रौहिणं । अस्फुरत् । वज्रऽबाहुः । द्याम् । आऽरोहंतं । सः । जनासः । इंद्रः ॥ १२ ॥ द्यावा । चित् । अस्मै । पृथिवी इति । नमेते इति । शुष्मात् । चित् । अस्य । पर्वताः । भयंते । यः । सोमऽपाः । निऽचितः । वज्रऽबाहुः । यः । वज्रऽहस्तः । सः । जनासः । इंद्रः ॥ १३ ॥ यः । सुन्वंतं । अवति । यः । पचंतं । यः । शंसंतं । यः । शसमानं । ऊती । यस्य । ब्रह्म । वर्धनं । यस्य । सोमः । यस्य । इदं । राधः । सः । जनासः । इंद्रः ॥ १४ ॥ यः । सुन्वते । पचते । दुध्रः । आ । चित् । वाजं । ददर्षि । सः । किल । असि । सत्यः । वयं । ते । इंद्र । विश्वहा । प्रियासः । सुऽवीरासः । विदथं । आ । वदेम ॥ १५ ॥ ९ ॥

ऋतुः । जनित्री । तस्याः । अपः । परि । मक्षु । जातः । आ । अविशत् । यासु । वर्धते । तत् । आहनाः । अभवत् । पिप्युषी । पयः । अंशोः । पीयुषं । प्रथमं । तत् । उक्थ्यं ॥ १ ॥

सध्रीमा यंन्ति परि विभ्रंतीः पर्यो विश्वप्न्यांय प्र भंरन्त भोजनम् ।
समानो अध्वा प्रवतांमनुष्यदे यस्ताकृंणोः प्रथमं सास्युक्थ्यः ॥ २ ॥
अन्वेकों वदति यद्दांति तद्रूपा मिनन्तदंपा एकं ईयते ।
विश्वा एकंस्य विनुदंस्तितिक्षते यस्ताकृंणोः प्रथमं सास्युक्थ्यः ॥ ३ ॥
प्रजाभ्यः पुष्टिं विभजन्त आसते रयिमिव पृष्ठं प्रभवन्तमायते ।
असिन्वन्दंष्ट्रैः पितुरत्ति भोजनं यस्ताकृंणोः प्रथमं सास्युक्थ्यः ॥ ४ ॥
अर्धाकृणोः पृथिवीं सन्दृशे दिवे यो धौतीनामंहिहन्नारिंणक्पथः ।
तं त्वा स्तोमेंभिरुदभिर्न वाजिनं देवं देवा अंजनन्त्सास्युक्थ्यः ॥ ५ ॥ १० ॥
यो भोजनं च दयंसे च वर्धनमाद्रादा शुष्कं मधुंमदुदोहिथ ।
सः शेवधिं नि दंधिषे विवस्वंति विश्वस्यैकं ईशिषे सास्युक्थ्यः ॥ ६ ॥

सध्री । ईं । आ । यंति । परि । विभ्रंतीः । पर्यः । विश्वऽप्न्याय । प्र । भरंत । भोजनं । समानः । अध्वा । प्रऽवतां । अनुऽस्यदे । यः । ता । अकृंणोः । प्रथमं । सः । असि । उक्थ्यः ॥ २ ॥ अनु । एकः । वदति । यत् । ददाति । तत् । रूपा । मिनन् । तत्ऽअपाः । एकः । ईयते । विश्वाः । एकस्य । विऽनुदः । तितिक्षते । यः । ता । अकृंणोः । प्रथमं । सः । असि । उक्थ्यः ॥ ३ ॥ प्रऽजाभ्यः । पुष्टिं । विऽभजंतः । आसते । रयिंऽइव । पृष्ठं । प्रऽभवंतं । आऽयते । असिन्वन् । दंष्ट्रैः । पितुः । अत्ति । भोजनं । यः । ता । अकृंणोः । प्रथमं । सः । असि । उक्थ्यः ॥४॥ अर्ध । अकृणोः । पृथिवीं । संऽदृशे । दिवे । यः । धौतीना । अहिऽहन् । अरिंणक् । पथः । तं । त्वा । स्तोमेंभिः । उदऽभिः । न । वाजिनं । देवं । देवाः । अजनन् । सः । असि । उक्थ्यः ॥ ५ ॥ १० ॥ यः । भोजनं । च । दयंसे । च । वर्धनं । आद्रात् । आ । शुष्कं । मधुंऽमत् । दुदोहिथ । सः । शेवऽधिं । नि । दधिषे । विवस्वंति । विश्वस्य । एकः । ईशिषे । सः । असि । उक्थ्यः ॥ ६ ॥

यः पुष्पिणीश्च प्रस्वश्च धर्मणाधि दाने व्यवनीरधारयः ।
यश्चासमा अजनो दिद्युतो दिव उरूर्वाँ अभितः सास्युक्थ्यः ॥ ७ ॥
यो नार्मरं सहवसुं निहन्तवे पृक्षाय च दासवेशाय चावहः ।
ऊर्जयन्त्या अपरिविष्टमास्यमुतैवाद्य पुरुकृत्सास्युक्थ्यः ॥ ८ ॥
शतं वा यस्य दशं साकमाद्य एकस्य श्रुष्टौ यदं चोदमाविथ ।
अरञ्जौ दस्यून्त्समुनब्दभीतये सुप्राव्यो अभवः सास्युक्थ्यः ॥ ९ ॥
विश्वेदनु रोधना अस्य पौंस्यं ददुरस्मै दधिरे कृत्नवे धनम् ।
षळस्तभ्ना विष्टिरः पञ्च सन्दृशः परि परो अभवः सास्युक्थ्यः ॥ १०॥११॥
सुप्रवाचनं तव वीर वीर्यं यदेकेन क्रतुना विन्दसे वसु ।
जातूष्ठिरस्य प्र वयः सहस्वतो या चकर्थ सेन्द्र विश्वास्युक्थ्यः ॥ ११ ॥

यः । पुष्पिणीः । च । प्रऽस्वः । च । धर्मणा । अधि । दाने । वि । अवनीः । अधारयः । यः । च । असमाः । अजनः । दिद्युतः । दिवः । उरुः । ऊर्वान् । अभितः । सः । असि । उक्थ्यः ॥ ७ ॥ यः । नार्मरं । सहऽवसुं । निऽहंतवे । पृक्षाय । च । दासऽवेशाय । च । अवहः । ऊर्जयंत्याः । अपरिऽविष्टं । आस्यं । उत । एव । अद्य । पुरुऽकृत् । सः । असि । उक्थ्यः ॥ ८ ॥ शतं । वा । यस्य । दशं । साकं । आ । अद्यः । एकस्य । श्रुष्टौ । यत् । ह । चोदं । आविथ । अरञ्जौ । दस्यून् । सं । उनप् । दभीतये । सुप्रऽअव्यः । अभवः । सः । असि । उक्थ्यः ॥९॥ विश्वा । इत् । अनु । रोधनाः । अस्य । पौंस्यं । ददुः । अस्मै । दधिरे । कृत्नवे । धनं । षट् । अस्तभ्नाः । विऽस्तिरः । पंच । संऽदृशः । परि । परः । अभवः । सः । असि । उक्थ्यः ॥ १० ॥ ११ ॥ सुऽप्रवाचनं । तव । वीर । वीर्यं । यत् । एकेन । क्रतुना । विंदसे । वसु । जातुऽस्थिरस्य । प्र । वयः । सहस्वतः । या । चकर्थ । सः । इंद्र । विश्वा । असि । उक्थ्यः ॥ ११ ॥

अरंमयः सरंपसस्तरांय कं तुर्वीतंये च वय्यांय च स्तुतिम् ।
नीचा सन्तमुदंनयः परावृजं प्रान्धं श्रोणं श्रवयन्त्सास्युक्थ्यः ॥ १२ ॥
अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु तें वसव्यम् ।
इन्द्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथें सुवीराः ॥ १३ ॥ १२ ॥

॥ १४ ॥ ऋषिः-गृत्समदः । देवता-इन्द्रः । छन्दः-त्रिष्टुप् ॥

॥ १४ ॥ अध्वर्यवो भरतेन्द्रांय सोममार्भत्रेभिः सिञ्चता मद्यमन्धंः ।
कामी हि वीरः सदंमस्य पीतिं जुहोत वृष्णे तदिदेष वष्टि ॥ १ ॥
अध्वर्यवो यो अपो वव्रिवांसं वृत्रं जघानाशन्येव वृक्षम् ।
तस्मा एतं भरत तद्वशायँ एष इन्द्रो अर्हति पीतिमस्य ॥ २ ॥
अध्वर्यवो यो दृभीकं जघान यो गा उदाजदप हि वलं वः ।
तस्मा एतमन्तरिक्षे न वातमिन्द्रं सोमैरोर्णुत जूर्न वस्त्रैः ॥ ३ ॥

अरंमयः । सरंऽअपसः । तरांय । कं । तुर्वीतंये । च । वय्यांय । च । स्तुतिं । नीचा । सन्तं । उत् । अनयः । पराऽवृजं । प्र । अंधं । श्रोणं । श्रवयन् । सः । असि । उक्थ्यः ॥ १२ ॥ अस्मभ्यं । तत् । वसो इतिं । दानायं । राधः । सं । अर्थयस्व । बहु । ते । वसव्यं । इंद्र । यत् । चित्रं । श्रवस्याः । अनु । द्यून् । बृहत् । वदेम । विदथें । सुऽवीराः ॥ १३ ॥ १२ ॥

अध्वर्यवः । भरत । इंद्रांय । सोमं । आ । अर्भत्रेभिः । सिंचत । मद्यं । अंधः । कामी । हि । वीरः । सदं । अस्य । पीतिं । जुहोत । वृष्णे । तत् । इत् । एषः । वष्टि ॥ १ ॥ अध्वर्यवः । यः । अपः । वव्रिऽवासं । वृत्रं । जघानं । अशन्याऽइव । वृक्षं । तस्मै । एतं । भरत । तत्ऽवशायं । एषः । इंद्रः । अर्हति । पीतिं । अस्य ॥२॥ अध्वर्यवः । यः । दृभीकं । जघानं । यः । गाः । उत्ऽआजत् । अप । हि । वलं । वरिति वः । तस्मै । एतं । अंतरिक्षे । न । वातं । इंद्रं । सोमैः । आ । ऊर्णुत । जूः । न वस्त्रैः ॥ ३ ॥

अध्वर्यवो य उरणं जघान नव चख्वांसं नवतिं च बाहून् ।
यो अर्बुदमव नीचा बबाधे तमिन्द्रं सोमस्य भृथे हिनोत ॥ ४ ॥
अध्वर्यवो यः स्वश्नं जघान यः शुष्णमशुषं यो व्यंसम् ।
यः पिप्रुं नमुचिं यो रुधिक्रां तस्मा इन्द्रायान्धसो जुहोत ॥ ५ ॥
अध्वर्यवो यः शतं शम्बरस्य पुरो बिभेदाश्मनेव पूर्वीः ।
यो वर्चिनः शतमिन्द्रः सहस्रमपावपद्भरता सोममस्मै ॥ ६ ॥ १३ ॥
अध्वर्यवो यः शतमा सहस्रं भूम्या उपस्थेऽवपज्जघन्वान् ।
कुत्सस्यायोरतिथिग्वस्य वीरान्न्यब्रृणग्भरता सोममस्मै ॥ ७ ॥
अध्वर्यवो यन्नरः कामयाध्वे श्रुष्टी वहन्तो नशथा तदिन्द्रे ।
गर्भस्तिपूतं भरत श्रुतायेन्द्राय सोमं यज्यवो जुहोत ॥ ८ ॥

अध्वर्यवः । यः । उरणं । जघान । नव । चख्वांसं । नवतिं । च । बाहून् । यः । अर्बुदं । अव । नीचा । बबाधे । तं । इंद्रं । सोमस्य । भृथे । हिनोत ॥ ४ ॥ अध्वर्यवः । यः । सु । अश्नं । जघान । यः । शुष्णं । अशुषं । यः । विऽअंसं । यः । पिप्रुं । नमुचिं । यः । रुधिऽक्रां । तस्मै । इंद्राय । अंधसः । जुहोत ॥ ५ ॥ अध्वर्यवः । यः । शतं । शंबरस्य । पुरः । बिभेद । अश्मनाऽइव । पूर्वीः । यः । वर्चिनः । शतं । इंद्रः । सहस्रं । अप्ऽअवपत् । भरत । सोमं । अस्मै ॥ ६ ॥ १३ ॥ अध्वर्यवः । यः । शतं । आ । सहस्रं । भूम्याः । उपऽस्थे । अवपत् । जघन्वान् । कुत्सस्य । आयोः । अतिथिऽग्वस्य । वीरान् । नि । अब्रृणक् । भरत । सोमं । अस्मै ॥ ७ ॥ अध्वर्यवः । यत् । नरः । कामयाध्वे । श्रुष्टी । वहंतः । नशथ । तत् । इंद्रे । गर्भस्तिऽपूतं । भरत । श्रुताय । इंद्राय । सोमं । यज्यवः । जुहोत ॥ ८ ॥

अध्वर्यवः कर्तेना श्रुष्टिमस्मै वने निषूतं वन उन्नयध्वम् ।
जुषाणो हस्त्यमभि वावशे वः इन्द्राय सोमं मदिरं जुहोत ॥ ९ ॥
अध्वर्यवः पयसोधर्यथा गोः सोमेभिरीं पृणता भोजमिन्द्रम् ।
वेदाहमस्य निभृतं म एतदित्सन्तं भूयो यजतश्चिकेत ॥ १० ॥
अध्वर्यवो यो दिव्यस्य वस्वो यः पार्थिवस्य क्षम्यस्य राजा ।
तमूदरं न पृणता यवेनेन्द्रं सोमेभिस्तदपो वो अस्तु ॥ ११ ॥
अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यम् ।
इन्द्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे सुवीराः ॥ १२ ॥ १४ ॥

॥ १५ ॥ ऋषि—गृत्समदः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥१५॥ प्र घा न्वस्य महतो महानि सत्या सत्यस्य करणानि वोचम् ।
त्रिकद्रुकेष्वपिबत्सुतस्यास्य मदे अहिमिन्द्रो जघान ॥ १ ॥

अध्वर्यवः । कर्तेन । श्रुष्टि । अस्मै । वने । निऽपूतं । वने । उत् । नयध्वं । जुषाणः । हस्त्यं । अभि । वावशे । वः । इंद्राय । सोमं । मदिरं । जुहोत ॥ ९ ॥ अध्वर्यवः । पयसा । ऊर्धः । यथा । गोः । सोमेभिः । ईं । पृणत । भोजं । इंद्रं । वेद । अहं । अस्य । निऽभृतं । मे । एतत् । दित्सतं । भूयः । यजतः । चिकेत ॥ १० ॥ अध्वर्यवः । यः । दिव्यस्य । वस्वः । यः । पार्थिवस्य । क्षम्यस्य । राजा । तं । ऊदरं । न । पृणत । यवेन । इंद्रं । सोमेभिः । तत् । अपः । वः । अस्तु ॥ ११ ॥ अस्मभ्यं । तत् । वसो इति । दानाय । राधः । सं । अर्थयस्व । बहु । ते । वसव्यं । इंद्र । यत् । चित्रं । श्रवस्याः । अनु । द्यून् । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १२ ॥ १४ ॥

प्र । घ । नु । अस्य । महतः । महानि । सत्या । सत्यस्य । करणानि । वोचं । त्रिऽकद्रुकेषु । अपिबत् । सुतस्य । अस्य । मदे । अहिं । इंद्रः । जघान ॥१॥

अवंशे द्यामंस्तभायद्बृहन्तमा रोदंसी अपृणदन्तरिक्षम् ।
स धारयत्पृथिवीं पप्रथच्च सोमंस्य ता मद इन्द्रश्चकार ॥ २ ॥
सद्मेव प्राचो वि मिमाय मानैर्वज्रेण खान्यतृणन्नदीनाम् ।
वृथासृजत्पथिभिर्दीर्घयाथैः सोमंस्य ता मद इन्द्रश्चकार ॥ ३ ॥
स प्रवोळ्हॄन्परिगत्या दभीतेर्विश्वंमधाग्यायुधमिद्धे अग्नौ ।
सं गोभिरश्वैरसृजद्रथेभिः सोमंस्य ता मद इन्द्रश्चकार ॥ ४ ॥
स ईं महीं धुनिमेतोरम्णात्सो अंस्रातॄनपारयत्स्वस्ति ।
त उत्स्रायं रयिमभि प्र तस्थुः सोमंस्य ता मद इन्द्रश्चकार ॥ ५ ॥ १५ ॥
सोदंश्चं सिन्धुमरिणान्महित्वा वज्रेणान उषसः सं पिपेष ।
अजवसो जविनीभिर्विवृश्चन्त्सोमंस्य ता मद इन्द्रश्चकार ॥ ६ ॥

अवंशे । द्याम् । अस्तभायत् । बृहंतैं । आ । रोदंसी इतिं । अपृणत् । अंतरिक्षं । सः । धारयत् । पृथिवीं । पप्रथंत् । च । सोमंस्य । ता । मदें । इंद्रः । चकार ॥ २ ॥ सद्मेऽइव । प्राचः । वि । मिमाय । मानैः । वज्रेंण । खानिं । अतृणत् । नदीनां । वृथां । असृजत् । पथिऽभिः । दीर्घऽयाथैः । सोमंस्य । ता । मदें । इंद्रः । चकार ॥ ३ ॥ सः । प्रऽवोळ्हॄन् । परिऽगत्यं । दभीतेः । विश्वं । अधाक् । आयुधं । इद्धे । अग्नौ । सं । गोभिः । अश्वैः । असृजत् । रथेभिः । सोमंस्य । ता । मदें । इंद्रः । चकार ॥ ४ ॥ सः । ईं । महीं । धुनिं । एतोः । अरम्णात् । सः । अस्रातॄन् । अपारयत् । स्वस्ति । ते । उत्ऽस्रायं । रयिं । अभि । प्र । तस्थुः । सोमंस्य । ता । मदें । इंद्रः । चकार ॥ ५ ॥ १५ ॥ सः । उदंचं । सिंधुं । अरिणात् । महिऽत्वा । वज्रेंण । अनः । उषसः । सं । पिपेष । अजवसः । जविनीभिः । विऽवृश्चन् । सोमंस्य । ता । मदें । इंद्रः । चकार ॥ ६ ॥

स विद्वाँ अपगोहं कनीनामाविर्भवन्नुदतिष्ठत्परावृक् ।
प्रति श्रोणः स्थाद्ध्यनगंचष्ट सोमस्य ता मद इन्द्रश्चकार ॥ ७ ॥
भिनद्वलमङ्गिरोभिर्गृणानो वि पर्वतस्य दंहितान्यैरत् ।
रिणग्रोधांसि कृत्रिमाण्येषां सोमस्य ता मद इन्द्रश्चकार ॥ ८ ॥
स्वर्मेनाभ्युप्या चुमुरिं धुनिं च जघन्थ दस्युं प्र दभीतिमावः ।
रम्भी चिदत्र विविदे हिरण्यं सोमस्य ता मद इन्द्रश्चकार ॥ ९ ॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो मातिं धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ १० ॥ १६ ॥

॥ १६ ॥ ऋषिः—गृत्समदः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥१६॥ प्र वः सतां ज्येष्ठतमाय सुष्टुतिमग्नाविव समिधाने हविर्भरे ।
इन्द्रमजुर्यं जरयन्तमुक्षितं सनाद्युवानमवसे हवामहे ॥ १ ॥

सः । विद्वान् । अपऽगोहं । कनीनां । आविः । भवन् । उत् । अतिष्ठत् । पराऽवृक् । प्रति । श्रोणः । स्थात् । वि । अनक् । अचष्ट । सोमस्य । ता । मदे । इंद्रः । चकार ॥ ७ ॥ भिनत् । वलं । अंगिरःऽभिः । गृणानः । वि । पर्वतस्य । दंहितानि । ऐरत् । रिणक् । रोधांसि । कृत्रिमाणि । एषां । सोमस्य । ता । मदे । इंद्रः । चकार ॥ ८ ॥ स्वर्मेन । अभिऽउप्य । चुमुरिं । धुनिं । च । जघंथ । दस्युं । प्र । दभीतिं । आवः । रंभी । चित् । अत्र । विविदे । हिरण्यं । सोमस्य । ता । मदे । इंद्रः । चकार ॥ ९ ॥ नूनं । सा । ते । प्रति । वरं । जरित्रे । दुहीयत् । इंद्र । दक्षिणा । मघोनी । शिक्ष । स्तोतृऽभ्यः । मा । अतिं । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १० ॥ १६ ॥

प्र । वः । सता । ज्येष्ठऽतमाय । सुऽस्तुतिं । अग्नौऽइव । संऽइधाने । हविः । भरे । इंद्रं । अजुर्यं । जरयंतं । उक्षितं । सनात् । युवानं । अवसे । हवामहे ॥ १ ॥

यस्मादिन्द्राद्बृहतः किं चनेमृते विश्वान्यस्मिन्त्सम्भृताधि वीर्या ।
जठरे सोमं तन्वी३सहो महो हस्ते वज्रं भरति शीर्षणि क्रतुम् ॥ २ ॥
न क्षोणीभ्यां परिभ्वे त इन्द्रियं न समुद्रैः पर्वतैरिन्द्र ते रथः ।
न ते वज्रमन्वश्नोति कश्चन यदाशुभिः पतसि योजना पुरु ॥ ३ ॥
विश्वे ह्यस्मै यजताय धृष्णवे क्रतुं भरन्ति वृषभाय सश्चते ।
वृषा यजस्व हविषा विदुष्टरः पिबेन्द्र सोमं वृषभेण भानुना ॥ ४ ॥
वृष्णः कोशः पवते मध्व ऊर्मिर्वृषभान्नाय वृषभाय पातवे ।
वृषणाध्वर्यू वृषभासो अद्रयो वृषणं सोमं वृषभाय सुष्वति ॥ ५ ॥ १७ ॥
वृषा ते वज्र उत ते वृषा रथो वृषणा हरी वृषभाण्यायुधा ।
वृष्णो मदस्य वृषभ त्वमीशिष इन्द्र सोमस्य वृषभस्य तृप्णुहि ॥ ६ ॥

यस्मात् । इंद्रात् । बृहतः । किं । चन । ईं । ऋते । विश्वानि । अस्मिन् । संऽभृता । अधि । वीर्या । जठरे । सोमं । तन्वि । सहः । महः । हस्ते । वज्रं । भरति । शीर्षणि । क्रतुं ॥ २ ॥ न । क्षोणीभ्यां । परिऽभ्वे । ते । इंद्रियं । न । समुद्रैः । पर्वतैः । इंद्र । ते । रथः । न । ते । वज्रं । अनु । अश्नोति । कः । चन । यत् । आशुऽभिः । पतसि । योजना । पुरु ॥ ३ ॥ विश्वे । हि । अस्मै । यजताय । धृष्णवे । क्रतुं । भरंति । वृषभाय । सश्चते । वृषा । यजस्व । हविषा । विदुःऽतरः । पिब । इंद्र । सोमं । वृषभेण । भानुना ॥ ४ ॥ वृष्णः । कोशः । पवते । मध्वः । ऊर्मिः । वृषभऽअन्नाय । वृषभाय । पातवे । वृषणा । अध्वर्यू इति । वृषभासः । अद्रयः । वृषणं । सोमं । वृषभाय सुस्वति ॥ ५ ॥ १७ ॥ वृषा । ते । वज्रः । उत । ते । वृषा । रथः । वृषणा । हरी इति । वृषभाणि । आयुधा । वृष्णः । मदस्य । वृषभ । त्वं । ईशिषे । इंद्र । सोमस्य । वृषभस्य । तृप्णुहि ॥ ६ ॥

प्र ते नावं न समने वचस्युवं ब्रह्मणा यामि सवनेषु दाधृषिः ।
कुवित्नो अस्य वचसो निबोधिषदिन्द्रमुत्सं न वसुनः सिचामहे ॥ ७ ॥
पुरा संम्बाधाद्भ्या ववृत्स्व नो धेनुर्न वत्सं यवसस्य पिप्युषी ।
सकृत्सु ते सुमतिभिः शतक्रतो सं पत्नीभिर्न वृषणो नसीमहि ॥ ८ ॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥ १८ ॥

॥ १७ ॥ ऋषिः—गृत्समदः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥१७॥ तदस्मै नव्यमङ्गिरस्वदर्चत शुष्मा यदस्य प्रत्नथोदीरते ।
विश्वा यद्गोत्रा सहसा परीवृता मदे सोमस्य दंहितान्यैरयत् ॥ १ ॥
स भूतु यो ह प्रथमाय धायस ओजो मिमानो महिमानमातिरत् ।
शूरो यो युत्सु तन्वं परिव्यत शीर्षणि द्यां महिना प्रत्यमुञ्चत ॥ २ ॥

प्र । ते । नावं । न । समने । वचस्युवं । ब्रह्मणा । यामि । सवनेषु । दाधृषिः । कुवित् । नः । अस्य । वचसः । निऽबोधिषत् । इंद्रं । उत्सं । न । वसुनः । सिचामहे ॥ ७ ॥ पुरा । संऽबाधात् । अभि । आ । ववृत्स्व । नः । धेनुः । न । वत्सं । यवसस्य । पिप्युषी । सकृत् । सु । ते । सुमतिऽभिः । शतक्रतो इति शतऽक्रतो । सं । पत्नीभिः । न । वृषणः । नसीमहि ॥ ८ ॥ नूनं । सा । ते । प्रति । वरं । जरित्रे । दुहीयत् । इंद्र । दक्षिणा । मघोनी । शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुवीराः ॥ ९ ॥ १८ ॥

तत् । अस्मै । नव्यं । अंगिरस्वत् । अर्चत । शुष्माः । यत् । अस्य । प्रत्नऽथा । उत्ऽईरते । विश्वा । यत् । गोत्रा । सहसा । परिऽवृता । मदे । सोमस्य । दंहितानि । ऐरयत् ॥ १ ॥ सः । भूतु । यः । ह । प्रथमाय । धायसे । ओजः । मिमानः । महिमानं । आ । अतिरत् । शूरः । यः । युत्ऽसु । तन्वं । परिऽव्यत । शीर्षणि । द्यां । महिना । प्रति । अमुंचत ॥ २ ॥

अधाकृणोः प्रथमं वीर्यं महद्यदस्याग्रे ब्रह्मणा शुष्ममैरयः ।
रथेष्ठेन हर्यश्वेन विच्युताः प्र जीरयः सिस्रते सध्र्यक् पृथक् ॥ ३ ॥
अधा यो विश्वा भुवनाभि मज्मनेशानकृत्प्रवया अभ्यवर्धत ।
आद्रोदसी ज्योतिषा वह्निरातनोत्सीव्यन्तमांसि दुधिता समव्ययत् ॥ ४ ॥
स प्राचीनान्पर्वताँ इंहदोजसाधराचीनमकृणोदपामपः ।
अधारयत्पृथिवीं विश्वधायसमस्तभ्नान्मायया द्यामवस्रसः ॥ ५ ॥ १९ ॥
सास्मा अरं बाहुभ्यां यं पिताकृणोदिश्वस्मादा जनुषो वेदस्परि ।
येना पृथिव्यां नि किरिं शयध्यै वज्रेण हत्व्यवृणक्तुविष्वणिः ॥ ६ ॥
अमाजूरिव पित्रोः सचा सती समानादा सदसस्त्वामिये भगम् ।
कृधि प्रकेतमुप मास्या भर दद्धि भागं तन्वो येन मामहः ॥ ७ ॥

अध । अकृणोः । प्रथमं । वीर्यं । महत् । यत् । अस्य । अग्रे । ब्रह्मणा । शुष्मं । ऐरयः । रथेऽस्थेन । हरिऽअश्वेन । विऽच्युताः । प्र । जीरयः । सिस्रते । सध्र्यक् । पृथक् ॥ ३ ॥ अध । यः । विश्वा । भुवना । अभि । मज्मना । ईशानऽकृत् । प्रऽवयाः । अभि । अवर्धत । आत् । रोदसी इति । ज्योतिषा । वह्निः । आ । अतनोत् । सीव्यन् । तमांसि । दुधिता । सं । अव्ययत् ॥ ४ ॥ सः । प्राचीनान् । पर्वतान् । इंहत् । ओजसा । अधराचीनं । अकृणोत् । अपां । अपः । अधारयत् । पृथिवीं । विश्वऽधायसं । अस्तभ्नात् । मायया । द्यां । अवऽस्रसः ॥ ५ ॥ १९ ॥ सः । अस्मै । अरं । बाहुऽभ्यां । यं । पिता । अकृणोत । विश्वस्मात् । आ । जनुषः । वेदसः । परि । येन । पृथिव्यां । नि । किरिं । शयध्यै । वज्रेण । हत्वी । अवृणक् । तुविऽस्वनिः ॥ ६ ॥ अमाजूःऽइव । पित्रोः । सचा । सती । समानात् । आ । सदसः । त्वा । इये । भगं । कृधि । प्रऽकेतं । उप । मासि । आ । भर । दद्धि । भागं । तन्वः । येन । ममहः ॥ ७ ॥

भोजं त्वामिन्द्र वयं हुवेम ददिष्टमिन्द्रापांसि वाजान् ।
अविड्ढीन्द्र चित्रया न ऊती कृधि वृषन्निन्द्र वस्यसो नः ॥ ८ ॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥ २० ॥

॥ १८ ॥ ऋषिः—गृत्समदः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥ १८ ॥ प्रातो रथो नवो योजि सस्निश्चतुर्युगस्त्रिकशः ससरश्मिः ।
दशारित्रो मनुष्यः स्वर्षाः स इष्टिभिर्मतिभी रंह्यो भूत् ॥ १ ॥
सास्मा अरं प्रथमं स द्वितीयमुतो तृतीयं मनुषः स होता ।
अन्यस्या गर्भमन्य ऊं जनन्त सो अन्येभिः सचते जेन्यो वृषा ॥ २ ॥
हरी नु कं रथ इन्द्रस्य योजमायै सूक्तेन वचसा नवेन ।
मो षु त्वामत्र बहवो हि विप्रा नि रीरमन्यजमानासो अन्ये ॥ ३ ॥

भोजं । त्वां । इंद्र । वयं । हुवेम । ददिः । त्वं । इंद्र । अपांसि । वाजान् । अविड्ढि । इंद्र । चित्रया । नः । ऊती । कृधि । वृषन् । इंद्र । वस्यसः । नः ॥ ८ ॥ नूनं । सा । ते । प्रति । वरं । जरित्रे । दुहीयत् । इंद्र । दक्षिणा । मघोनी । शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुवीराः ॥ ९ ॥ २० ॥

प्रातरिति । रथः । नवः । योजि । सस्निः । चतुःऽयुगः । त्रिऽकशः । सप्तऽरश्मिः । दशऽअरित्रः । मनुष्यः । स्वःऽसाः । सः । इष्टिऽभिः । मतिऽभिः । रंह्यः । भूत् ॥ १ ॥ सः । अस्मै । अरं । प्रथमं । सः । द्वितीयं । उतो इति । तृतीयं । मनुषः । सः । होता । अन्यस्याः । गर्भं । अन्ये । ऊं इति । जनंत । सः । अन्येभिः । सचते । जेन्यः । वृषा ॥ २ ॥ हरी इति । नु । कं । रथे । इंद्रस्य । योजं । आऽयै । सुऽउक्तेन । वचसा । नवेन । मो इति । सु । त्वां । अत्र । बहवः । हि । विप्राः । नि । रीरमन् । यजमानासः । अन्ये ॥ ३ ॥

आ द्वाभ्यां हरिभ्यामिन्द्र याह्या चतुर्भिरा षड्भिर्हूयमानः ।
आष्टाभिर्दशभिः सोमपेयमयं सुतः सुमख मा मृधस्कः ॥ ४ ॥
आ विंशत्या त्रिंशता याह्यर्वाङा चत्वारिंशता हरिभिर्युजानः ।
आ पञ्चाशता सुरथेभिरिन्द्रा षष्टया सप्तत्या सोमपेयम् ॥ ५ ॥ २१ ॥
आशीत्या नवत्या याह्यर्वाङा शतेन हरिभिरुह्यमानः ।
अयं हि ते शुनहोत्रेषु सोम इन्द्र त्वाया परिषिक्तो मदाय ॥ ६ ॥
मम ब्रह्मेन्द्र याह्यच्छा विश्वा हरी धुरि धिष्वा रथस्य ।
पुरुत्रा हि विहव्यो बभूथास्मिञ्छूर सवने मादयस्व ॥ ७ ॥
न म इन्द्रेण सख्यं वि योषदस्मभ्यमस्य दक्षिणा दुहीत ।
उप ज्येष्ठे वरूथे गभस्तौ प्रायेप्राये जिगीवांसः स्याम ॥ ८ ॥

आ । द्वाभ्यां । हरिऽभ्यां । इंद्र । याहि । आ । चतुःऽभिः । आ । षट्ऽभिः । हूयमानः । आ । अष्टाभिः । दशऽभिः । सोमऽपेयं । अयं । सुतः । सुऽमख । मा । मृधः । कॅरितिं कः ॥ ४ ॥ आ । विंशत्या । त्रिंशता । याहि । अर्वाङ् । आ । चत्वारिंशता । हरिऽभिः । युजानः । आ । पंचाशता । सुऽरथेभिः । इंद्र । आ । षष्टया । सप्तत्या । सोमऽपेयं ॥ ५ ॥ २१ ॥ आ । अशीत्या । नवत्या । याहि । अर्वाङ् । आ । शतेन । हरिऽभिः । उह्यमानः । अयं । हि । ते । शुनऽहोत्रेषु । सोमः । इंद्र । त्वाऽया । परिऽसिक्तः । मदाय ॥ ६ ॥ मम । ब्रह्म । इंद्र । याहि । अच्छ । विश्वा । हरी इतिं । धुरि । धिष्व । रथस्य । पुरुऽत्रा । हि । विऽहव्यः । बभूथ । अस्मिन् । शूर । सवने । मादयस्व ॥ ७ ॥ न । मे । इंद्रेण । सख्यं । वि । योषत् । अस्मभ्यं । अस्य । दक्षिणा । दुहीत । उप । ज्येष्ठे । वरूथे । गभस्तौ । प्रायेऽप्राये । जिगीवांसः । स्याम ॥ ८ ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥ २२ ॥

॥ १९ ॥ ऋषिः-गृत्समदः । देवता-इन्द्रः । छन्दः-त्रिष्टुप् ॥

॥ १९ ॥ अपाय्यस्यान्धसो मदाय मनीषिणः सुवानस्य प्रयसः ।
यस्मिन्निन्द्रः प्रदिवि वावृधान ओको दधे ब्रह्मण्यन्तश्च नरः ॥ १ ॥
अस्य मन्दानो मघवो वज्रहस्तोऽहिमिन्द्रो अर्णोवृतं वि वृश्चत् ।
प्र यद्वयो न स्वसराण्यच्छा प्रयांसि च नदीनां चकमन्त ॥ २ ॥
स माहिन इन्द्रो अर्णो अपां प्रैरयदहिहाच्छा समुद्रम् ।
अजनयत्सूर्यं विदद्गा अक्तुनाह्नां वयुनानि साधत् ॥ ३ ॥
सो अप्रतीनि मनवे पुरूणीन्द्रो दाशदाशुषे हन्ति वृत्रम् ।
सद्यो यो नृभ्यो अतसाय्यो भूत्पस्पृधानेभ्यः सूर्यस्य सातौ ॥ ४ ॥

नूनं । सा । ते । प्रति । वरं । जरित्रे । दुहीयत् । इंद्र । दक्षिणा । मघोनी । शिक्ष । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुवीराः ॥ ९ ॥ २२ ॥

अपायि । अस्य । अंधसः । मदाय । मनीषिणः । सुवानस्य । प्रयसः । यस्मिन् । इंद्रः । प्रऽदिवि । वृधानः । ओकः । दधे । ब्रह्मण्यंतः । च । नरः ॥ १ ॥ अस्य । मंदानः । मघवः । वज्रऽहस्तः । अहिं । इंद्रः । अर्णःऽवृतं । वि । वृश्चत् । प्र । यत् । वयः । न । स्वसराणि । अच्छ । प्रयांसि । च । नदीनां । चकमंत ॥ २ ॥ सः । माहिनः । इंद्रः । अर्णः । अपां । प्र । ऐरयत् । अहिऽहा । अच्छ । समुद्रं । अजनयत् । सूर्यं । विदत् । गाः । अक्तुना । अह्नां । वयुनानि । साधत् ॥ ३ ॥ सः । अप्रतीनि । मनवे । पुरुणि । इंद्रः । दाशत् । दाशुषे । हंति । वृत्रं । सद्यः । यः । नृऽभ्यः । अतसाय्यः । भूत् । पस्पृधानेभ्यः । सूर्यस्य । सातौ ॥ ४ ॥

स सुन्वत इन्द्रः सूर्यमा देवो रिणङ्मर्त्यायं स्तवान् ।
आ यद्रयिं गुहदवद्यमस्मै भरदंशं नैतशो दशस्यन् ॥ ५ ॥ २३ ॥
स रंन्धयत्सदिवः सारथये शुष्णमशुषं कुयवं कुत्साय ।
दिवोदासाय नवतिं च नवेन्द्रः पुरो व्यैरच्छम्बरस्य ॥ ६ ॥
एवा त इन्द्रोचथमहेम श्रवस्या न त्मना वाजयन्तः ।
अश्याम तत्सासमाशुषाणा ननमो वधरदेवस्य पीयोः ॥ ७ ॥
एवा तें गृत्समदाः शूर मन्मावस्यवो न वयुनानि तक्षुः ।
ब्रह्मण्यन्त इन्द्र ते नवीय इषमूर्जं सुक्षितिं सुम्नमश्युः ॥ ८ ॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो मातिं धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥ २४ ॥

सः । सुन्वते । इंद्रः । सूर्यं । आ । देवः । रिणक् । मर्त्यायं । स्तवान् । आ । यत् । रयिं । गुहत्ऽअवद्यं । अस्मै । भरत् । अंशं । न । एतशः । दशस्यन् ॥ ५ ॥ २३ ॥
सः । रंधयत् । सऽदिवः । सारथये । शुष्णं । अशुषं । कुयवं । कुत्साय । दिवःऽदासाय । नवतिं । च । नव । इंद्रः । पुरः । वि । ऐरत् । शंबरस्य ॥ ६ ॥
एव । ते । इंद्र । उचथं । अहेम । श्रवस्या । न । त्मना । वाजयंतः । अश्याम । तत् । सासं । आशुषाणाः । ननमः । वधः । अदेवस्य । पीयोः ॥ ७ ॥ एव । ते । गृत्सऽमदाः । शूर । मन्म । अवस्यवः । न । वयुनानि । तक्षुः । ब्रह्मण्यंतः । इंद्र । ते । नवीयः । इषं । ऊर्जं । सुऽक्षितिं । सुम्नं । अश्युः ॥ ८ ॥ नूनं । सा । ते । प्रतिं । वरं । जरित्रे । दुहीयत् । इंद्र । दक्षिणा । मघोनी । शिक्ष । स्तोतृऽभ्यः । मा । अतिं । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुवीराः ॥ ९ ॥ २४ ॥

॥ २० ॥ ऋषिः-गृत्समदः । देवता-इन्द्रः । छन्दः-त्रिष्टुप् ॥

॥ २० ॥ वयं ते वय इन्द्र विद्धि षु णः प्र भरामहे वाजयुर्न रथम् ।
विदन्यवो दीध्यतो मनीषा सुम्नमियक्षन्तस्त्वावतो नॄन् ॥ १ ॥
त्वं नं इन्द्र त्वाभिरूती त्वायतो अभिष्टिपासि जनान् ।
त्वमिनो दाशुषो वरूतेत्थाधीरभि यो नक्षति त्वा ॥ २ ॥
स नो युवेन्द्रो जोहूत्रः सखा शिवो नरामस्तु पाता ।
यः शंसन्तं यः शशमानमूती पचन्तं च स्तुवन्तं च प्रणेषत् ॥ ३ ॥
तमु स्तुष इन्द्रं तं गृणीषे यस्मिन्पुरा वावृधुः शाशदुश्च ।
स वस्वः कामं पीपरदियानो ब्रह्मण्यतो नूतनस्यायोः ॥ ४ ॥
सो अङ्गिरसामुचथा जुजुष्वान्ब्रह्मा तूतोदिन्द्रो गातुमिष्णन् ।
मुष्णन्नुषसः सूर्येण स्तवानश्नस्य चिच्छिश्नथत्पूर्व्याणि ॥ ५ ॥ २५ ॥

वयं । ते । वयः । इंद्र । विद्धि । सु । नः । प्र । भरामहे । वाजऽयुः । न ।
रथं । विपन्यवः । दीध्यतः । मनीषा । सुम्नं । इयक्षंतः । त्वाऽवंतः । नॄन् ॥ १ ॥
त्वं । नः । इंद्र । त्वाभिः । ऊती । त्वाऽयतः । अभिष्टिऽपा । असि । जनान् । त्वं ।
इनः । दाशुषः । वरूता । इत्थाऽधीः । अभि । यः । नक्षति । त्वा ॥ २ ॥ सः ।
नः । युवा । इंद्रः । जोहूत्रः । सखा । शिवः । नरा । अस्तु । पाता । यः । शंसंतं ।
यः । शशमानं । ऊती । पचंतं । च । स्तुवंतं । च । प्रऽनेषत् ॥ ३ ॥ तं । ऊं इति ।
स्तुषे । इंद्रं । तं । गृणीषे । यस्मिन् । पुरा । ववृधुः । शाशदुः । च । सः । वस्वः ।
कामं । पीपरत् । इयानः । ब्रह्मण्यतः । नूतनस्य । आयोः ॥ ४ ॥ सः । अंगिरसां ।
उचथा । जुजुष्वान् । ब्रह्मा । तूतोत् । इंद्रः । गातुं । इष्णन् । मुष्णन् । उषसः ।
सूर्येण । स्तवान् । अश्नस्य । चित् । शिश्नथत् । पूर्व्याणि ॥ ५ ॥ २५ ॥

स ह श्रुत इन्द्रो नाम देव ऊर्ध्वो भुवन्मनुषे दस्मतमः ।
अवं प्रियमर्शसानस्य साह्वाञ्छिरो भरद्दासस्य स्वधावान् ॥ ६ ॥
स वृत्रहेन्द्रः कृष्णयोनीः पुरन्दरो दासीरैरयद्वि ।
अजनयन्मनवे क्षामपश्च सत्रा शंसं यजमानस्य तूतोत् ॥ ७ ॥
तस्मै तवस्यमनु दायि सत्रेन्द्राय देवेभिरर्णसातौ ।
प्रति यदस्य वज्रं बाह्वोर्धुर्हत्वी दस्यून्पुर आयसीर्नि तारीत् ॥ ८ ॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ ९ ॥ २६ ॥

॥ २१ ॥ ऋषिः—गृत्समदः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥२१॥ विश्वजितं धनजितं स्वर्जितं सत्राजितं नृजितं उर्वराजितं ।
अश्वजितं गोजितं अब्जितं भरेन्द्राय सोमं यजतायं हर्यतम् ॥ १ ॥

सः । ह । श्रुतः । इंद्रः । नाम । देवः । ऊर्ध्वः । भुवत् । मनुषे । दस्मऽतमः । अव । प्रियं । अर्शसानस्य । सह्वान् । शिरः । भरत् । दासस्य । स्वधाऽवान् ॥ ६ ॥ सः । वृत्रऽहा । इंद्रः । कृष्णऽयोनीः । पुरंऽदरः । दासीः । ऐरयत् । वि । अजनयत् । मनवे । क्षां । अपः । च । सत्रा । शंसं । यजमानस्य । तूतोत् ॥ ७ ॥ तस्मै । तवस्यं । अनु । दायि । सत्रा । इंद्राय । देवेभिः । अर्णऽसातौ । प्रति । यत् । अस्य । वज्रं । बाहोः । धुः । हत्वी । दस्यून् । पुरः । आयसीः । नि । तारीत् ॥ ८ ॥ नूनं । सा । ते । प्रति । वरं । जरित्रे । दुहीयत् । इन्द्र । दक्षिणा । मघोनी । शिक्षा । स्तोतृऽभ्यः । मा । अति । धक् । भगः । नः । बृहत् । वदेम । विदथे । सुवीराः ॥ ९ ॥ २६ ॥

विश्वऽजितं । धनऽजितं । स्वःऽजितं । सत्राऽजितं । नृऽजितं । उर्वराऽजितं । अश्वऽजितं । गोऽजितं । अप्ऽजितं । भर । इंद्राय । सोमं । यजताय । हर्यतं ॥ १ ॥

अभिभुवेऽभिभङ्गायं वन्वतेऽषाळ्हाय सहमानाय वेधसे ।
तुविग्रये वह्नये दुष्टरीतवे सत्रासाहे नम इन्द्राय वोचत ॥ २ ॥
सत्रासाहो जनभक्षो जनंसहश्च्यवनो युध्मो अनु जोषमुक्षितः ।
वृतञ्चयः सहुरिर्विक्ष्वारित इन्द्रस्य वोचं प्र कृतानि वीर्या ॥ ३ ॥
अनानुदो वृषभो दोधतो वधो गम्भीर ऋष्वो असमष्टकाव्यः ।
रध्रचोदः श्रथनो वीळितस्पृथुरिन्द्रः सुयज्ञ उषस स्वर्जनत् ॥ ४ ॥
यज्ञेन गातुमप्तुरो विविद्रिरे धियो हिन्वाना उशिजो मनीषिणः ।
अभिस्वरा निषदा गा अवस्यव इन्द्रे हिन्वाना द्रविणान्याशत ॥ ५ ॥
इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे ।
पोषं रयीणामरिष्टिं तनूनां स्वाध्यानं वाचः सुदिनत्वमह्नाम् ॥ ६ ॥ २७ ॥

अभिऽभुवे । अभिऽभंगाय । वन्वते । अषाळ्हाय । सहमानाय । वेधसे । तुविऽग्रये । वह्नये । दुस्तरीतवे । सत्राऽसहे । नमः । इंद्राय । वोचत ॥ २ ॥ सत्राऽसहः । जनऽभक्षः । जनंऽसहः । च्यवनः । युध्मः । अनु । जोषं । उक्षितः । वृतंऽचयः । सहुरिः । विक्षु । आरितः । इंद्रस्य । वोचं । प्र । कृतानि । वीर्या ॥ ३ ॥ अननुऽदः । वृषभः । दोधतः । वधः । गंभीरः । ऋष्वः । असमष्टऽकाव्यः । रध्रऽचोदः । श्रथनः । वीळितः । पृथुः । इंद्रः । सुऽयज्ञः । उषसः । स्वः । जनत् ॥ ४ ॥ यज्ञेन । गातुं । अप्ऽतुरः । विविद्रिरे । धियः । हिन्वानाः । उशिजः । मनीषिणः । अभिऽस्वरा । निऽसदा । गाः । अवस्यवः । इंद्रे । हिन्वानाः । द्रविणानि । आशत ॥ ५ ॥ इंद्र । श्रेष्ठानि । द्रविणानि । धेहि । चित्तिं । दक्षस्य । सुभगऽत्वं । अस्मे इति । पोषं । रयीणा । अरिष्टिं । तनूनां । स्वाध्यानं । वाचः । सुदिनऽत्वं । अह्नां ॥ ६ ॥ २७ ॥

॥ २२ ॥ ऋषिः-गृत्समदः । देवता-इन्द्रः । छन्दः-अष्टिः ॥

॥ २२ ॥ त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत्सोममपिबद्विष्णुना सुतं यथावशत् । स ईं ममाद महि कर्म कर्तवे महामुरुं सैनꣳ सश्चद्देवो देवं सत्यमिन्द्रꣳ सत्य इन्दुः ॥ १ ॥

अध त्विषीमाँ अभ्योजसा क्रिविं युधाभवदा रोदसी अपृणदस्य मज्मना प्र वावृधे । अधत्तान्यं जठरे प्रेमरिच्यत सैनꣳ सश्चद्देवो देवं सत्यमिन्द्रꣳ सत्य इन्दुः ॥ २ ॥

साकं जातः क्रतुना साकमोजसा ववक्षिथ साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः । दाता राधः स्तुवते काम्यं वसु सैनꣳ सश्चद्देवो देवं सत्यमिन्द्रꣳ सत्य इन्दुः ॥ ३ ॥

तव त्यन्नर्यं नृतोऽप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतम् ।
यद्देवस्य शवसा प्रारिणा असुं रिणन्नपः ।
भुवद्विश्वमभ्यादेवमोजसा विदादूर्जꣳ शतक्रतुर्विदादिषम् ॥ ४ ॥ २८ ॥ २ ॥

त्रिऽकद्रुकेषु । महिषः । यवऽआशिरं । तुविऽशुष्मः । तृपत् । सोमं । अपिबत् । विष्णुना । सुतं । यथा । अवशत् । सः । ईं । ममाद । महिं । कर्म । कर्तवे । महां । उरुं । सः । एनं । सश्चत् । देवः । देवं । सत्यं । इंद्रं । सत्यः । इंदुः ॥ १ ॥ अध । त्विषिऽमान् । अभि । ओजसा । क्रिविं । युधा । अभवत् । आ । रोदसी इति । अपृणत् । अस्य । मज्मना । प्र । ववृधे । अधत्त । अन्यं । जठरे । प्र । ईं । अरिच्यत । सः । एनं । सश्चत् । देवः । देवं । सत्यं । इंद्रं । सत्यः । इंदुः ॥ २ ॥ साकं । जातः । क्रतुना । साकं । ओजसा । ववक्षिथ । साकं । वृद्धः । वीर्यैः । ससहिः । मृधः । विऽचर्षणिः । दाता । राधः । स्तुवते । काम्यं । वसु । सः । एनं । सश्चत् । देवः । देवं । सत्यं । इंद्रं । सत्यः । इंदुः ॥ ३ ॥ तव । त्यत् । नर्यं । नृतो इति । अपः । इंद्र । प्रथमं । पूर्व्यं । दिवि । प्रऽवाच्यं । कृतं । यत् । देवस्य । शवसा । प्र । अरिणाः । असुं । रिणन् । अपः । भुवत् । विश्वं । अभि । अदेवं । ओजसा । विदात् । ऊर्जं । शतऽक्रतुः । विदात् । इषं ॥ ४ ॥ २८ ॥

॥ तृतीयोऽनुवाकः ॥

॥ २३ ॥ ऋषिः-गृत्समदः । देवता-बृहस्पतिः । छन्दः-जगती ॥

॥२३॥ गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥ १ ॥
देवाश्चित्ते असुर्य प्रचेतसो बृहस्पते यज्ञियं भागमानशुः ।
उस्रा इव सूर्यो ज्योतिषा महो विश्वेषामिज्जनिता ब्रह्मणामसि ॥ २ ॥
आ विबाध्या परिरापस्तमांसि च ज्योतिष्मन्तं रथमृतस्य तिष्ठसि ।
बृहस्पते भीममभिमित्रदम्भनं रक्षोहणं गोत्रभिदं स्वर्विदम् ॥ ३ ॥
सुनीतिभिर्नयसि त्रायसे जनं यस्तुभ्यं दाशान्न तमंहो अश्नवत् ।
ब्रह्मद्विषस्तपनो मन्युमीरसि बृहस्पते महि तत्ते महित्वनम् ॥ ४ ॥

गणानां । त्वा । गणऽपतिं । हवामहे । कविं । कवीनां । उपमऽश्रवःऽतमं ।
ज्येष्ठऽराजं । ब्रह्मणां । ब्रह्मणः । पते । आ । नः । शृण्वन् । ऊतिऽभिः । सीद ।
सादनं ॥ १ ॥ देवाः । चित् । ते । असुर्य । प्रऽचेतसः । बृहस्पते । यज्ञियं । भागं ।
आनशुः । उस्राःऽइव । सूर्यः । ज्योतिषा । महः । विश्वेषां । इत् । जनिता । ब्रह्मणां ।
असि ॥ २ ॥ आ । विऽबाध्य । परिऽरपः । तमांसि । च । ज्योतिष्मंतं । रथं ।
ऋतस्य । तिष्ठसि । बृहस्पते । भीमं । अमित्रऽदंभनं । रक्षःऽहनं । गोत्रऽभिदं ।
स्वःऽविदं ॥ ३ ॥ सुनीतिऽभिः । नयसि । त्रायसे । जनं । यः । तुभ्यं । दाशात् ।
न । तं । अंहः । अश्नवत् । ब्रह्मऽद्विषः । तपनः । मन्युऽमीः । असि । बृहस्पते ।
महि । तत् । ते । महिऽत्वनं ॥ ४ ॥

न तमंहो न दुंरितं कुतश्चन नारांतयस्तितिरुर्न द्वयाविनः ।
विश्वा इदस्माध्वरसो वि बाधसे यं सुगोपा रक्षसि ब्रह्मणस्पते ॥ ५ ॥ २९ ॥
त्वं नो गोपाः पथिकृद्विचक्षणस्तव व्रतायं मतिभिर्जरामहे ।
बृहस्पते यो नो अभि हरौ दधे स्वा तं मर्मर्तु दुच्छुना हरस्वती ॥ ६ ॥
उत वा यो नो मर्चयादनागसोऽरातीवा मर्तः सानुको वृकः ।
बृहस्पते अप तं वर्तया पथः सुगं नो अस्यै देववीतये कृधि ॥ ७ ॥
त्रातारं त्वा तनूनां हवामहेऽवस्पर्तरधिवक्तारमस्मयुम् ।
बृहस्पते देवनिदो नि बर्हय मा दुरेवा उत्तरं सुम्नमुन्नशन् ॥ ८ ॥
त्वया वयं सुवृधा ब्रह्मणस्पते स्पार्हा वसु मनुष्या ददीमहि ।
या नो दूरे तळितो या अरातयोऽभि सन्ति जम्भया ता अनमसः ॥ ९ ॥

न । तं । अंहः । न । दुःऽइतं । कुतः । चन । न । अरातयः । तितिरुः । न । द्वयाविनः । विश्वाः । इत् । अस्मात् । ध्वरसः । वि । बाधसे । यं । सुऽगोपाः । रक्षसि । ब्रह्मणः । पते ॥ ५ ॥ २९ ॥ त्वं । नः । गोपाः । पथिऽकृत् । विऽचक्षणः । तव । व्रताय । मतिऽभिः । जरामहे । बृहस्पते । यः । नः । अभि । हरः । दधे । स्वा । तं । मर्मर्तु । दुच्छुना । हरस्वती ॥ ६ ॥ उत । वा । यः । नः । मर्चयात् । अनागसः । अरातिऽवा । मर्तः । सानुकः । वृकः । बृहस्पते । अप । तं । वर्तय । पथः । सुऽगं । नः । अस्यै । देवऽवीतये । कृधि ॥ ७ ॥ त्रातारं । त्वा । तनूनां । हवामहे । अवःऽस्पर्तः । अधिऽवक्तारं । अस्मऽयुं । बृहस्पते । देवऽनिदः । नि । बर्हय । मा । दुःऽएवाः । उत्ऽतरं । सुम्नं । उत् । नशन् ॥ ८ ॥ त्वया । वयं । सुऽवृधा । ब्रह्मणः । पते । स्पार्हा । वसु । मनुष्या । आ । ददीमहि । याः । नः । दूरे । तळितः । याः । अरातयः । अभि । संति । जंभय । ताः । अनमसः ॥ ९ ॥

त्वया वयमुत्तमं धीमहे वयो बृहस्पते पप्रिणा सस्निना युजा ।
मा नो दुःशंसो अभिदिप्सुरीशत प्र सुशंसा मतिभिस्तारिषीमहि ॥१०॥३०॥
अनानुदो वृषभो जग्मिराहवं निष्टप्ता शत्रुं पृतनासु सासहिः ।
असि सत्य ऋणया ब्रह्मणस्पत उग्रस्य चिदमिता वीळुहर्षिणः ॥ ११ ॥
अदेवेन मनसा यो रिषण्यति शासामुग्रो मन्यमानो जिघांसति ।
बृहस्पते मा प्रणक्तस्य नो वधो नि कर्म मन्युं दुरेवस्य शर्धतः ॥ १२ ॥
भरेषु हव्यो नमसोपसद्यो गन्ता वाजेषु सनिता धनंधनम् ।
विश्वा इद्यो अभिदिप्स्वो३मृधो बृहस्पतिर्वि ववर्हा रथाँ इव ॥ १३ ॥
तेजिष्ठया तपनी रक्षसस्तप ये त्वा निदे ददिरे दृष्टवीर्यम् ।
आविस्तत्कृष्व यदसत्त उक्थ्यं३बृहस्पते वि परिरापो अर्दय ॥ १४ ॥

त्वया । वयं । उत्ऽतमं । धीमहे । वयः । बृहस्पते । पप्रिणा । सस्निना । युजा ।
मा । नः । दुःऽशंसः । अभिऽदिप्सुः । ईशत । प्र । सुऽशंसाः । मतिऽभिः ।
तारिषीमहि ॥ १० ॥ ३० ॥ अननुऽदः । वृषभः । जग्मिः । आऽहवं । निःऽतप्ता ।
शत्रुं । पृतनासु । ससहिः । असि । सत्यः । ऋणऽयाः । ब्रह्मणः । पते । उग्रस्य ।
चित् । दमिता । वीळुऽहर्षिणः ॥ ११ ॥ अदेवेन । मनसा । यः । रिषण्यति ।
शासा । उग्रः । मन्यमानः । जिघांसति । बृहस्पते । मा । प्रणक् । तस्य । नः ।
वधः । नि । कर्म । मन्युं । दुःऽएवस्य । शर्धतः ॥ १२ ॥ भरेषु । हव्यः । नमसा ।
उपऽसद्यः । गंता । वाजेषु । सनिता । धनंऽधनं । विश्वाः । इत् । अर्यः । अभि-
ऽदिप्स्वः । मृधः । बृहस्पतिः । वि । ववर्ह । रथान्ऽइव ॥ १३ ॥ तेजिष्ठया । तपनी ।
रक्षसः । तप । ये । त्वा । निदे । ददिरे । दृष्टऽवीर्यं । आविः । तत् । कृष्व । यत् ।
असत् । ते । उक्थ्यं । बृहस्पते । वि । परिऽरापः । अर्दय ॥ १४ ॥

बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥ १५ ॥ ३१ ॥
मा नः स्तेनेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः ।
आ देवानामोहते वि व्रयो हृदि बृहस्पते न परः साम्नो विदुः ॥ १६ ॥
विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ १७ ॥
तव श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदङ्गिरः ।
इन्द्रेण युजा तमसा परीवृतं बृहस्पते निरपामौब्जो अर्णवम् ॥ १८ ॥
ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥ १९ ॥ ३२ ॥ ६ ॥

बृहस्पते । अति । यत् । अर्यः । अर्हात् । द्युऽमत् । विऽभाति । क्रतुऽमत् । जनेषु ।
यत् । दीदयत् । शवसा । ऋतऽप्रजात । तत् । अस्मासु । द्रविणं । धेहि ।
चित्रं ॥ १५ ॥ ३१ ॥ मा । नः । स्तेनेभ्यः । ये । अभि । द्रुहः । पदे । निरामिणः ।
रिपवः । अन्नेषु । जागृधुः । आ । देवानां । ओहते । वि । व्रयः । हृदि । बृहस्पते ।
न । परः । साम्नः । विदुः ॥ १६ ॥ विश्वेभ्यः । हि । त्वा । भुवनेभ्यः । परि ।
त्वष्टा । अजनत् । साम्नःऽसाम्नः । कविः । सः । ऋणऽचित् । ऋणऽयाः । ब्रह्मणः ।
पतिः । द्रुहः । हन्ता । महः । ऋतस्य । धर्तरि ॥ १७ ॥ तव । श्रिये । वि ।
वि । अजिहीत । पर्वतः । गवां । गोत्रं । उत्ऽअसृजः । यत् । अंगिरः । इंद्रेण ।
युजा । तमसा । परिऽवृतं । बृहस्पते । निः । अपां । औब्जः । अर्णवं ॥ १८ ॥
ब्रह्मणः । पते । त्वं । अस्य । यंता । सुऽउक्तस्य । बोधि । तनयं । च । जिन्व ।
विश्वं । तत् । भद्रं । यत् । अवंति । देवाः । बृहत् । वदेम । विदथे । सुवीराः ॥ १९ ॥

॥ इति द्वितीयाष्टके षष्ठोऽध्यायः ॥ ६ ॥

॥ अथ द्वितीयाष्टके सप्तमोऽध्यायः ॥ ७ ॥

॥ २४ ॥ ऋषिः-गृत्समदः । देवता-ब्रह्मणस्पतिः । छन्दः-जगती ॥

॥२४॥ सेमामंविड्ढि प्रभृतिं य ईशिषेऽया विधेम नवया महा गिरा ।
यथा नो मीढ्वान्स्तवते सखा तव बृहस्पते सीषधः सोत नो मतिम् ॥ १ ॥
यो नन्त्वान्यनमन्योजसोतादर्दर्मन्युना शम्बराणि वि ।
प्राच्यावयदच्युता ब्रह्मणस्पतिरा चाविशद्वसुमन्तं वि पर्वतम् ॥ २ ॥
तद्देवानां देवतमाय कर्त्वमश्रथ्नन्दृळ्हाव्रदन्त वीळिता ।
उद्गा आजदभिनद्ब्रह्मणा वलमगूहत्तमो व्यचक्षयत्स्वः ॥ ३ ॥
अश्मास्यमवतं ब्रह्मणस्पतिर्मधुधारमभि यमोजसातृणत् ।
तमेव विश्वे पपिरे स्वर्दृशो बहु साकं सिसिचुरुत्समुद्रिणम् ॥ ४ ॥

॥ अथ द्वितीयाष्टके सप्तमोऽध्यायः ॥ ७ ॥

सः । इमा । अविड्ढि । प्रऽभृतिं । यः । ईशिषे । अया । विधेम । नवया ।
महा । गिरा । यथा । नः । मीढ्वान् । स्तवते । सखा । तव । बृहस्पते । सीषधः ।
सः । उत । नः । मतिं ॥ १ ॥ यः । नन्त्वानि । अनमत् । नि । ओजसा । उत ।
अदर्दः । मन्युना । शंबराणि । वि । प्र । अच्यवयत् । अच्युता । ब्रह्मणः । पतिः ।
आ । च । अविशत् । वसुऽमंतं । वि । पर्वतं ॥ २ ॥ तत् । देवानां । देवऽतमाय ।
कर्त्वं । अश्रथ्नन् । दृळ्हा । अव्रदंत । वीळिता । उत् । गाः । आजत् । अभिनत् ।
ब्रह्मणा । वलं । अगूहत् । तमः । वि । अचक्षयत् । स्वः१रितिं स्वः ॥ ३ ॥
अश्मऽआस्यं । अवतं । ब्रह्मणः । पतिः । मधुऽधारं । अभि । यं । ओजसा ।
अतृणत् । तं । एव । विश्वे । पपिरे । स्वःऽदृशः । बहु । साकं । सिसिचुः । उत्सं ।
उद्रिणं ॥ ४ ॥

सना ता का चिद्भुवना भवीत्वा माद्भिः शरद्भिर्दुरो वरन्त वः ।
अयंतन्ता चरतो अन्यदन्यदिद्या चकार वयुना ब्रह्मणस्पतिः ॥ ५ ॥ १ ॥
अभिनक्षन्तो अभि ये तमानशुर्निधिं पणीनां परमं गुहा हितम् ।
ते विद्वांसः प्रतिचक्ष्यानृता पुनर्यत उ आयन्तदुदीयुराविशम् ॥ ६ ॥
ऋतावानः प्रतिचक्ष्यानृता पुनरात आ तस्थुः कवयो महस्पथः ।
ते बाहुभ्यां धमितमग्निमश्मनि नकिः षो अस्त्यरणो जहुर्हि तम् ॥ ७ ॥
ऋतज्येन क्षिप्रेण ब्रह्मणस्पतिर्यत्र वष्टि प्र तदश्नोति धन्वना ।
तस्य साध्वीरिषवो याभिरस्यति नृचक्षसो दृशये कर्णयोनयः ॥ ८ ॥

सना । ता । का । चित् । भुवना । भवीत्वा । मात्ऽभिः । शरत्ऽभिः । दुरः । वरंत ।
वः । अयंतंता । चरतः । अन्यत्ऽअन्यत् । इत् । या । चकार । वयुना । ब्रह्मणः ।
पतिः ॥ ५ ॥ १ ॥ अभिऽनक्षंतः । अभि । ये । तं । आनशुः । निऽधिं । पणीनां ।
परमं । गुहा । हितं । ते । विद्वांसः । प्रतिऽचक्ष्य । अनृता । पुनः । यतः । ऊं इति ।
आयन् । तत् । उत् । ईयुः । आऽविशं ॥ ६ ॥ ऋतऽवानः । प्रतिऽचक्ष्य । अनृता ।
पुनः । आ । अतः । आ । तस्थुः । कवयः । महः । पथः । ते । बाहुऽभ्यां धमितं ।
अग्निं । अश्मनि । नकिः । सः । अस्ति । अरंणः । जहुः । हि । तं ॥ ७ ॥
ऋतऽज्येन । क्षिप्रेण । ब्रह्मणः । पतिः । यत्र । वष्टि । प्र । तत् । अश्नोति । धन्वना ।
तस्य । साध्वीः । इषवः । याभिः । अस्यति । नृऽचक्षसः । दृशये । कर्णऽयोनयः ॥८॥

स संन्नयः स विनयः पुरोहितः स सुष्टुतः स युधि ब्रह्मणस्पतिः ।
चाक्ष्मो यद्वाजं भरते मती धनादित्सूर्यस्तपति तप्यतुर्वृथा ॥ ९ ॥
विभु प्रभु प्रथमं मेहनावतो बृहस्पतेः सुविदत्राणि राध्या ।
इमा सातानि वेन्यस्य वाजिनो येन जना उभये भुञ्जते विशः ॥ १० ॥ २ ॥
योऽवरे वृजने विश्वथा विभुर्महासु रण्वः शवसा ववक्षिथ ।
स देवो देवान्प्रति पप्रथे पृथु विश्वेदु ता परिभूर्ब्रह्मणस्पतिः ॥ ११ ॥
विश्वं सत्यं मघवाना युवोरिदापश्चन प्र मिनन्ति व्रतं वाम् ।
अच्छेन्द्राब्रह्मणस्पती हविर्नोऽन्नं युजेव वाजिना जिगातम् ॥ १२ ॥

सः । संऽनयः । सः । विऽनयः । पुरःऽहितः । सः । सुऽस्तुतः । सः । युधि । ब्रह्मणः । पतिः । चाक्ष्मः । यत् । वाजं । भरते । मती । धना । आत् । इत् । सूर्यः । तपति । तप्यतुः । वृथा ॥ ९ ॥ विऽभु । प्रऽभु । प्रथमं । मेहनाऽवतः । बृहस्पतेः । सुऽविदत्राणि । राध्या । इमा । सातानि । वेन्यस्य । वाजिनः । येन । जनाः । उभये । भुंजते । विशः । ॥ १० ॥ २ ॥ यः । अवरे । वृजने । विश्वऽथा । विऽभुः । महां । ऊं इति । रण्वः । शवसा । ववक्षिथ । सः । देवः । देवान् । प्रति । पप्रथे । पृथु । विश्वा । इत् । ऊं इति । ता । परिऽभूः । ब्रह्मणः । पतिः ॥ ११ ॥ विश्वं । सत्यं । मघऽवाना । युवोः । इत् । आपः । चन । प्र । मिनंति । व्रतं । वां । अच्छ । इंद्राब्रह्मणस्पती इति । हविः । नः । अन्नं । युजाऽइव । वाजिना । जिगातं ॥ १२ ॥

उताशिष्ठा अनु शृण्वन्ति वह्नयः सभेयो विप्रो भरते मती धना ।
वीळुद्वेषा अनु वशं ऋणमादृदिः स ह वाजी समिथे ब्रह्मणस्पतिः ॥ १३ ॥
ब्रह्मणस्पतेरभवद्यथावशं सत्यो मन्युर्महि कर्मा करिष्यतः ।
यो गा उदाजत्स दिवे वि चाभजन्महीव रीतिः शवसासरत्पृथक् ॥ १४ ॥
ब्रह्मणस्पते सुयमस्य विश्वहा रायः स्याम रथ्योऽवयस्वतः ।
वीरेषु वीराँ उप पृङ्धि नस्त्वं यदीशानो ब्रह्मणा वेषि मे हवम् ॥ १५ ॥
ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥ १६ ॥ ३ ॥

उत । आशिष्ठाः । अनु । शृण्वंति । वह्नयः । सभेयः । विप्रः । भरते । मती । धना ।
वीळुऽद्वेषाः । अनु । वशं । ऋणं । आऽददिः । सः । ह । वाजी । सऽमिथे । ब्रह्मणः ।
पतिः ॥ १३ ॥ ब्रह्मणः । पतेः । अभवत् । यथाऽवशं । सत्यः । मन्युः । महि ।
कर्म । करिष्यतः । यः । गाः । उत्ऽआजत् । सः । दिवे । वि । च । अभजत् ।
महीऽइव । रीतिः । शवसा । असरत् । पृथक् ॥ १४ ॥ ब्रह्मणः । पते । सुऽयमस्य ।
विश्वहा । रायः । स्याम । रथ्यः । वयस्वतः । वीरेषु । वीरान् । उप । पृङ्धि । नः ।
त्वं । यत् । ईशानः । ब्रह्मणा । वेषि । मे । हवं ॥ १५ ॥ ब्रह्मणः । पते । त्वं ।
अस्य । यंता । सुऽउक्तस्य । बोधि । तनयं । च । जिन्व । विश्वं । तत् । भद्रं । यत् ।
अवंति । देवाः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १६ ॥ ३ ॥

॥ २५ ॥ ऋषिः—गृत्समदः । देवता—ब्रह्मणस्पतिः । छन्दः—जगती ॥

॥२५॥ इन्धानो अग्निं वनवद्वनुष्यतः कृतब्रह्मा शूशुवद्रातहव्य इत् ।
जातेन जातमति स प्र सर्सृते यं युजं कृणुते ब्रह्मणस्पतिः ॥ १ ॥
वीरेभिर्वीरान्वनवद्वनुष्यतो गोभी रयिं पप्रथद्बोधति त्मना ।
तोकं च तस्य तनयं च वर्धते यं युजं कृणुते ब्रह्मणस्पतिः ॥ २ ॥
सिन्धुर्न क्षोदः शिमीवाँ ऋघायतो वृषेव वध्रीँरभि वष्ट्योजसा ।
अग्नेरिव प्रसितिर्नाह वर्तवे यं युजं कृणुते ब्रह्मणस्पतिः ॥ ३ ॥
तस्मा अर्षन्ति दिव्या असश्चतः स सत्वभिः प्रथमो गोषु गच्छति ।
अनिभृष्टतविषिर्हन्त्योजसा यं युजं कृणुते ब्रह्मणस्पतिः ॥ ४ ॥
तस्मा इद्विश्वे धुनयन्त सिन्धवोऽच्छिद्रा शर्म दधिरे पुरूणि ।
देवानां सुम्ने सुभगः स एधते यं युजं कृणुते ब्रह्मणस्पतिः ॥ ५ ॥ ४ ॥

इंधानः । अग्निं । वनवत् । वनुष्यतः । कृतऽब्रह्मा । शूशुवत् । रातऽहव्यः । इत् । जातेन । जातं । अति । सः । प्र । ससृते । यंऽयं । युजं । कृणुते । ब्रह्मणः । पतिः ॥ १ ॥ वीरेभिः । वीरान् । वनवत् । वनुष्यतः । गोभिः । रयिं । पप्रथत् । बोधति । त्मना । तोकं । च । तस्य । तनयं । च । वर्धते । यंऽयं । युजं । कृणुते । ब्रह्मणः । पतिः ॥ २ ॥ सिंधुः । न । क्षोदः । शिमीऽवान् । ऋघायतः । वृषाऽइव । वध्रीन् । अभि । वष्टि । ओजसा । अग्नेःऽइव । प्रऽसितिः । न । अहं । वर्तवे । यंऽयं । युजं । कृणुते । ब्रह्मणः । पतिः ॥ ३ ॥ तस्मै । अर्षति । दिव्याः । असश्चतः । सः । सत्वऽभिः । प्रथमः । गोषु । गच्छति । अनिभृष्टऽतविषिः । हंति । ओजसा । यंऽयं । युजं । कृणुते । ब्रह्मणः । पतिः ॥ ४ ॥ तस्मै । इत् । विश्वे । धुनयंत । सिंधवः । अच्छिद्रा । शर्म । दधिरे । पुरूणि । देवानां । सुम्ने । सुऽभगः । सः । एधते । यंऽयं । युजं । कृणुते । ब्रह्मणः । पतिः ॥ ५ ॥ ४ ॥

॥ २६ ॥ ऋषि—गृत्समदः । देवता—ब्रह्मणस्पतिः । छन्दः—जगती ॥

॥ २६ ॥ ऋजुरिच्छंसो वनवद्वनुष्यतो देवयन्निद्देवयंतमभ्यसत् ।
सुप्रावीरिद्वनवत्पृत्सु दुष्टरं यज्वेदयज्योर्वि भजाति भोजनम् ॥ १ ॥
यजस्व वीर प्र विहि मनायतो भद्रं मनः कृणुष्व वृत्रतूर्ये ।
हविष्कृणुष्व सुभगो यथाससि ब्रह्मणस्पतेरव आ वृणीमहे ॥ २ ॥
स इज्जनेन स विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः ।
देवानां यः पितरमाविवासति श्रद्धामना हविषा ब्रह्मणस्पतिम् ॥ ३ ॥
यो अस्मै हव्यैर्घृतवद्भिरविधत्प्र तं प्राचा नयति ब्रह्मणस्पतिः ।
उरुष्यतीमंहसो रक्षती रिषोऽहोश्चिदस्मा उरुचक्रिरद्भुतः ॥ ४ ॥ ५ ॥

ऋजुः । इत् । शंसः । वनवत् । वनुष्यतः । देवऽयन् । इत् । अदेवऽयंतं । अभि । असत् । सुप्रऽअवीः । इत् । वनवत् । पृत्ऽसु । दुस्तरं । यज्वा । इत् । अयज्योः । वि । भजाति । भोजनं ॥ १ ॥ यजस्व । वीर । प्र । विहि । मनायतः । भद्रं । मनः । कृणुष्व । वृत्रऽतूर्ये । हविः । कृणुष्व । सुऽभगः । यथा । असंसि । ब्रह्मणः । पतेः । अवः । आ । वृणीमहे ॥ २ ॥ सः । इत् । जनेन । सः । विशा । सः । जन्मना । सः । पुत्रैः । वाजं । भरते । धना । नृऽभिः । देवानां । यः । पितरं । आऽविवासति । श्रद्धाऽमनाः । हविषा । ब्रह्मणः । पतिं ॥ ३ ॥ यः । अस्मै । हव्यैः । घृतवत्ऽभिः । अविधत् । प्र । तं । प्राचा । नयति । ब्रह्मणः । पतिः । उरुष्यति । ईं । अंहसः । रक्षति । रिषः । अंहोः । चित् । अस्मै । उरुऽचक्रिः । अद्भुतः ॥४॥५॥

॥ २७ ॥ ऋषिः-गृत्समदः । देवता-आदित्यः । छन्दः-त्रिष्टुप् ॥

॥२७॥ इमा गिर आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि ।
शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः ॥ १ ॥
इमं स्तोमं सक्रतवो मे अद्य मित्रो अर्यमा वरुणो जुषन्त ।
आदित्यासः शुचयो धारपूता अवृजिना अनवद्या अरिष्टाः ॥ २ ॥
त आदित्यासं उरवो गभीरा अदब्धासो दिप्सन्तो भूर्यक्षाः ।
अन्तः पश्यन्ति वृजिनोत साधु सर्वे राजभ्यः परमा चिदन्ति ॥ ३ ॥
धारयन्त आदित्यासो जगत्स्था देवा विश्वस्य भुवनस्य गोपाः ।
दीर्घाधियो रक्षमाणा असुर्यमृतावानश्चयमाना ऋणानि ॥ ४ ॥

इमाः । गिरः । आदित्येभ्यः । घृतऽस्नूः । सनात् । राजऽभ्यः । जुह्वा । जुहोमि । शृणोतु । मित्रः । अर्यमा । भगः । नः । तुविऽजातः । वरुणः । दक्षः । अंशः ॥ १ ॥ इमं । स्तोमं । सऽक्रतवः । मे । अद्य । मित्रः । अर्यमा । वरुणः । जुषंत । आदित्यासः । शुचयः । धारऽपूताः । अवृजिनाः । अनवद्याः । अरिष्टाः ॥ २ ॥ ते । आदित्यासः । उरवः । गभीराः । अदब्धासः । दिप्संतः । भूरिऽअक्षाः । अंतरिति । पश्यंति । वृजिना । उत । साधु । सर्वे । राजऽभ्यः । परमा । चित् । अंति ॥ ३ ॥ धारयंतः । आदित्यासः । जगत् । स्थाः । देवाः । विश्वस्य । भुवनस्य । गोपाः । दीर्घऽधियः । रक्षमाणाः । असुर्यं । ऋतऽवानः । चयमानाः । ऋणानि ॥४॥

विद्यामादित्या अवसो वो अस्य यदर्यमन्भय आ चिन्मयोभु ।
युष्माकं मित्रावरुणा प्रणीतौ परि श्वभ्रेव दुरितानि वृज्याम् ॥ ५ ॥ ६ ॥
सुगो हि वो अर्यमन्मित्र पन्था अनृक्षरो वरुण साधुरस्ति ।
तेनादित्या अधि वोचता नो यच्छता नो दुष्परिहन्तु शर्म ॥ ६ ॥
पिपर्तु नो अदितिी राजपुत्रात्ति द्वेषांस्यर्यमा सुगेभिः ।
बृहन्मित्रस्य वरुणस्य शर्मोप स्याम पुरुवीरा अरिष्टाः ॥ ७ ॥
तिस्रो भूमीर्धारयन् त्रीरुत द्यून्त्रीणि व्रता विदथे अन्तरेषाम् ।
ऋतेनादित्या महि वो महित्वं तदर्यमन्वरुण मित्र चारु ॥ ८ ॥
त्री रोचना दिव्या धारयन्त हिरण्ययाः शुचयो धारपूताः ।
अस्वंभ्रजो अनिमिषा अदब्धा उरुशंसा ऋजवे मर्त्याय ॥ ९ ॥

विद्याम । आदित्याः । अवसः । वः । अस्य । यत् । अर्यमन् । भये । आ । चित् । मयःऽभु । युष्माकं । मित्रावरुणा । प्रऽनीतौ । परि । श्वभ्राऽइव । दुःऽइतानि । वृज्याम ॥ ५ ॥ ६ ॥ सुऽगः । हि । वः । अर्यमन् । मित्र । पंथाः । अनृक्षरः । वरुण । साधुः । अस्ति । तेन । आदित्याः । अधि । वोचत । नः । यच्छत । नः । दुःऽपरिहंतु । शर्म ॥ ६ ॥ पिपर्तु । नः । अदितिः । राजऽपुत्रा । अति । द्वेषांसि । अर्यमा । सुऽगेभिः । बृहत् । मित्रस्य । वरुणस्य । शर्म । उप । स्याम । पुरुऽवीराः । अरिष्टाः ॥ ७ ॥ तिस्रः । भूमीः । धारयन् । त्रीन् । उत । द्यून् । त्रीणि । व्रता । विदथे । अंतः । एषां । ऋतेन । आदित्याः । महि । वः । महिऽत्वं । तत् । अर्यमन् । वरुण । मित्र । चारु ॥ ८ ॥ त्री । रोचना । दिव्या । धारयंत । हिरण्ययाः । शुचयः । धारऽपूताः । अस्वंभ्रऽजः । अनिऽमिषाः । अदब्धाः । उरुऽशंसाः । ऋजवे । मर्त्याय ॥ ९ ॥

त्वं विश्वेषां वरुणासि राजा ये च देवा असुर ये च मर्ताः ।
शतं नो रास्व शरदो विचक्षेऽक्ष्यामायूंषि सुधितानि पूर्वी ॥ १० ॥ ७ ॥
न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा ।
पाक्या चिद्वसवो धीर्या चिद्युष्मानीतो अभयं ज्योतिरश्याम् ॥ ११ ॥
यो राजभ्य ऋतनिभ्यो ददाश यं वर्धयन्ति पुष्टयश्च नित्याः ।
स रेवान्याति प्रथमो रथेन वसुदावा विदथेषु प्रशस्तः ॥ १२ ॥
शुचिरपः सूयवसा अदब्ध उप क्षेति वृद्धवयाः सुवीरः ।
नकिष्टं घ्नन्त्यन्तितो न दूराद्य आदित्यानां भवति प्रणीतौ ॥ १३ ॥

त्वं । विश्वेषां । वरुण । असि । राजा । ये । च । देवाः । असुर । ये । च । मर्ताः ।
शतं । नः । रास्व । शरदः । विऽचक्षे । अक्ष्यामं । अयूंषि । सुऽधितानि ।
पूर्वी ॥ १० ॥ ७ ॥ न । दक्षिणा । वि । चिकिते । न । सव्या । न । प्राचीनं ।
आदित्याः । न । उत । पश्चा । पाक्या । चित् । वसवः । धीर्या । चित् । युष्माऽनीतः ।
अभयं । ज्योतिः । अश्यां ॥ ११ ॥ यः । राजऽभ्यः । ऋतनिऽभ्यः । ददाश । यं ।
वर्धयंति । पुष्टयः । च । नित्याः । सः । रेवान् । याति । प्रथमः । रथेन । वसुऽदावा ।
विदथेषु । प्रऽशस्तः ॥ १२ ॥ शुचिः । अपः । सुऽयवसाः । अदब्धः । उप । क्षेति ।
वृद्धऽवयाः । सुऽवीरः । नकिः । तं । घ्नंति । अंतितः । न । दूरात् । यः ।
आदित्यानां । भवति । प्रऽनीतौ ॥ १३ ॥

अदितेऽ मित्र वरुणोत मृळ यद्वो वयं चकृमा कच्चिदागः ।
उर्वश्यामभयं ज्योतिरिन्द्र मा नो दीर्घा अभि नशन्तमिस्राः ॥ १४ ॥
उभे अस्मै पीपयतः समीची दिवो वृष्टिं सुभगो नाम पुष्यन् ।
उभा क्षयावाजयन्याति पृत्सूभावर्धौ भवतः साधू अस्मै ॥ १५ ॥
या वो माया अभिद्रुहे यजत्राः पाशा आदित्या रिपवे विचृत्ताः ।
अश्वीव ताँ अति येषं रथेनारिष्टा उरावा शर्मन्त्स्याम ॥ १६ ॥
माहं मघोनो वरुण प्रियस्य भूरिदात्र आ विदं शूनमापेः ।
मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ॥ १७ ॥ ८ ॥

अदितेः । मित्र । वरुण । उत । मृळ । यत् । वः । वयं । चकृम । कत् । चित् ।
आगः । उरु । अश्याम । अभयं । ज्योतिः । इंद्र । मा । नः । दीर्घाः । अभि । नशन् ।
तमिस्राः ॥ १४ ॥ उभे इति । अस्मै । पीपयतः । समीची इति संऽईची । दिवः ।
वृष्टिं । सुऽभगः । नाम । पुष्यन् । उभा । क्षयौ । आऽजयन् । याति । पृत्ऽसु ।
उभौ । अर्धौ । भवतः । साधू इति । अस्मै ॥ १५ ॥ याः । वः । मायाः । अभिऽद्रुहे ।
यजत्राः । पाशाः । आदित्याः । रिपवे । विऽचृत्ताः । अश्वीऽइव । तान् । अति ।
येषं । रथेन । अरिष्टाः । उरौ । आ । शर्मन् । स्याम ॥ १६ ॥ मा । अहं । मघोनः ।
वरुण । प्रियस्य । भूरिऽदात्रः । आ । विदं । शूनं । आपेः । मा । रायः । राजन् ।
सुऽयमात् । अव । स्थां । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १७ ॥ ८ ॥

॥ २८ ॥ ऋषिः-गृत्समदः । देवता-वरुणः । छन्दः-त्रिष्टुप् ॥

॥ २८ ॥ इदं कवेरादित्यस्य स्वराजो विश्वानि सान्त्यभ्यस्तु महा ।
अति यो मन्द्रो यजथाय देवः सुकीर्तिं भिक्षे वरुणस्य भूरेः ॥ १ ॥
तवं व्रते सुभगासः स्याम स्वाध्यो वरुण तुष्टुवांसः ।
उपायन उषसां गोमतीनामग्रयो न जरमाणा अनु द्यून् ॥ २ ॥
तवं स्याम पुरुवीरस्य शर्मन्नुरुशंसस्य वरुण प्रणेतः ।
यूयं नः पुत्रा अदितेरदब्धा अभि क्षमध्वं युज्याय देवाः ॥ ३ ॥
प्र सीमादित्यो असृजद्विधर्ता ऋतं सिन्धवो वरुणस्य यन्ति ।
न श्राम्यन्ति न वि मुचन्त्येते वयो न पप्तू रघुया परिज्मन् ॥ ४ ॥

इदं । कवेः । आदित्यस्य । स्वऽराजः । विश्वानि । संति । अभि । अस्तु । महा । अति । यः । मंद्रः । यजथाय । देवः । सुऽकीर्तिं । भिक्षे । वरुणस्य । भूरेः ॥ १ ॥ तवं । व्रते । सुऽभगासः । स्याम । सुऽआध्यः । वरुण । तुस्तुऽवांसः । उपऽअयने । उषसां । गोऽमतीनां । अग्रयः । न । जरमाणाः । अनु । द्यून् ॥ २ ॥ तवं । स्याम । पुरुऽवीरस्य । शर्मन् । उरुऽशंसस्य । वरुण । प्रनेतरिति प्रऽनेतः । यूयं । नः । पुत्राः । अदितेः । अदब्याः । अभि । क्षमध्वं । युज्याय । देवाः ॥ ३ ॥ प्र । सीं । आदित्यः । असृजत् । विऽधर्ता । ऋतं । सिंधवः । वरुणस्य । यंति । न । श्राम्यंति । न । वि । मुचंति । एते । वयः । न । पप्तुः । रघुऽया । परिऽज्मन् ॥४॥

वि मच्छ्रथाय रशनामिवाग ऋध्याम ते वरुण खामृतस्य ।
मा तन्तुश्छेदि वयतो धियं मे मा मात्रा शार्यपसः पुर ऋतोः ॥ ५ ॥ ९ ॥
अपो सु म्यक्ष वरुण भियसं मत्सम्राळृतावोऽनु मा गृभाय ।
दामेव वत्साद्वि मुमुग्ध्यंहो नहि त्वदारे निमिषश्चनेशे ॥ ६ ॥
मा नो वधैर्वरुण ये त इष्टावेनः कृण्वन्तमसुर भ्रीणन्ति ।
मा ज्योतिषः प्रवसथानि गन्म वि षू मृधः शिश्रथो जीवसे नः ॥ ७ ॥
नमः पुरा ते वरुणोत नूनमुतापरं तुविजात ब्रवाम ।
त्वे हि कं पर्वते न श्रितान्यप्रच्युतानि दूळभ व्रतानि ॥ ८ ॥
परा ऋणा सावीरध मत्कृतानि माहं राजन्नन्यकृतेन भोजं ।
अव्युष्टा इन्नु भूयसीरुषास आ नो जीवान्वरुण तासु शाधि ॥ ९ ॥

वि । मत् । श्रथय । रशनाऽइव । आगः । ऋध्याम । ते । वरुण । खा । ऋतस्य ।
मा । तंतुः । छेदि । वयतः । धियं । मे । मा । मात्रा । शारि । अपसः । पुरा ।
ऋतोः ॥ ५ ॥ ९ ॥ अपो इति । सु । म्यक्ष । वरुण । भियसं । मत् । सऽराट् ।
ऋतऽवः । अनु । मा । गृभाय । दामऽइव । वत्सात् । वि । मुमुग्धि । अंहः । नहि ।
त्वत् । आरे । निऽमिषः । चन । ईशे ॥ ६ ॥ मा । नः । वधैः । वरुण । ये । ते ।
इष्टौ । एनः । कृण्वंतं । असुर । भ्रीणंति । मा । ज्योतिषः । प्रऽवसथानि । गन्म ।
वि । सु । मृधः । शिश्रथः । जीवसे । नः ॥ ७ ॥ नमः । पुरा । ते । वरुण । उत ।
नूनं । उत । अपरं । तुविऽजात । ब्रवाम । त्वे इति । हि । कं । पर्वते । न । श्रितानि ।
अप्रऽच्युतानि । दुःऽदभ । व्रतानि ॥ ८ ॥ परा । ऋणा । सावीः । अध ।
मत्ऽकृतानि । मा । अहं । राजन् । अन्यऽकृतेन । भोजं । अविऽउष्टाः । इत् । नु ।
भूयसीः । उषसः । आ । नः । जीवान् । वरुण । तासु । शाधि ॥ ९ ॥

यो मे राजन्युज्यो वा सखा वा स्वप्ने भयं भीरवे मह्यमाह ।
स्तेनो वा यो दिप्सति नो वृको वा त्वं तस्माद्वरुण पाह्यस्मान् ॥ १० ॥
माहं मघोनो वरुण प्रियस्य भूरिदाम्न आ विदं शूनमापेः ।
मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ॥ ११ ॥ १० ॥

॥ २९ ॥ ऋषिः–गृत्समदः । देवता–विश्वेदेवाः । छन्दः–त्रिष्टुप् ॥

॥ २९ ॥ धृतव्रता आदित्या इषिरा आरे मत्कर्त रहसूरिवागः ।
शृण्वतो वो वरुण मित्र देवा भद्रस्य विद्वाँ अवसे हुवे वः ॥ १ ॥
यूयं देवाः प्रमतिर्यूयमोजो यूयं द्वेषांसि सनुतर्युयोत ।
अभिक्षत्तारो अभि च क्षमध्वमद्या च नो मृळयतापरं च ॥ २ ॥

यः । मे । राजन् । युज्यः । वा । सखा । वा । स्वप्ने । भयं । भीरवे । मह्यं । आह । स्तेनः । वा । यः । दिप्सति । नः । वृकः । वा । त्वं । तस्मात् । वरुण । पाहि । अस्मान् ॥ १० ॥ मा । अहं । मघोनः । वरुण । प्रियस्य । भूरिऽदाम्नः । आ । विदं । शूनं । आपेः । मा । रायः । राजन् । सुऽयमात् । अव । स्थां । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ११ ॥ १० ॥

धृतऽव्रताः । आदित्याः । इषिराः । आरे । मत् । कर्त । रहसूःऽइव । आगः । शृण्वतः । वः । वरुण । मित्र । देवाः । भद्रस्य । विद्वान् । अवसे । हुवे । वः ॥ १ ॥ यूय । देवाः । प्रऽमतिः । यूयं । ओजः । यूयं । द्वेषांसि । सनुतः । युयोत । अभिऽक्षत्तारः । अभि । च । क्षमध्वं । अद्य । च । नः । मृळयत । अपरं । च ॥ २ ॥

किमू नु वः कृणवामापरेण किं सनेन वसव आप्येन ।
यूयं नो मित्रावरुणादिते च स्वस्तिमिन्द्रामरुतो दधात ॥ ३ ॥
हये देवा यूयमिदापयः स्थ ते मृळत नाधमानाय मह्यम् ।
मा वो रथो मध्यमवाक्रुते भून्मा युष्मावत्स्वापिषु श्रमिष्म ॥ ४ ॥
प्र व एको मिमय भूर्यागो यन्मा पितेव कितवं शशास ।
आरे पाशा आरे अघानि देवा मा माधि पुत्रे विमिव ग्रभीष्ट ॥ ५ ॥
अर्वाञ्चो अद्या भवता यजत्रा आ वो हार्दि भयमानो व्ययेयम् ।
आध्वं नो देवा निजुरो वृकस्य आध्वं कर्तादवपदो यजत्राः ॥ ६ ॥
माहं मघोनो वरुण प्रियस्य भूरिदाम्न आ विदं शूनमापेः ।
मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ॥ ७ ॥ ११ ॥

किं । ऊं इति । नु । वः । कृणवाम । अपरेण । किं । सनेन । वसवः । आप्येन । यूयं । नः । मित्रावरुणा । अदिते । च । स्वस्ति । इंद्रामरुतः । दधात ॥ ३ ॥ हये । देवाः । यूयं । इत् । आपयः । स्थ । ते । मृळत । नाधमानाय । मह्यं । मा । वः । रथः । मध्यमऽवाट् । कृते । भूत् । मा । युष्मावत्ऽसु । आपिषु । श्रमिष्म ॥ ४ ॥ प्र । वः । एकः । मिमय । भूरि । आगः । यत् । मा । पिताऽइव । कितवं । शशास । आरे । पाशाः । आरे । अघानि । देवाः । मा । मा । अधि । पुत्रे । विऽइव । ग्रभीष्ट ॥ ५ ॥ अर्वाचः । अद्य । भवत । यजत्राः । आ । वः । हार्दि । भयमानः । व्ययेयं । आध्वं । नः । देवाः । निऽजुरः । वृकस्य । आध्वं । कर्तात् । अवऽपदः । यजत्राः ॥ ६ ॥ मा । अहं । मघोनः । वरुण । प्रियस्य । भूरिऽदाम्नः । आ । विदं । शूनं । आपेः । मा । रायः । राजन् । सुऽयमात् । अव । स्थां । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ७ ॥ ११ ॥

॥ ३० ॥ ऋषिः-गृत्समदः । देवता-इन्द्रः । छन्दः-त्रिष्टुप् ॥

॥ ३० ॥ ऋतं देवाय कृण्वते सवित्र इन्द्रायाहिघ्ने न रमन्त आपः ।
अहरहर्यात्यक्तुरपां कियात्या प्रथमः सर्ग आसाम् ॥ १ ॥
यो वृत्राय सिनमत्राभरिष्यत्प्र तं जनित्री विदुषे उवाच ।
पथो रदन्तीरनु जोषमस्मै दिवेदिवे धुनयो यन्त्यर्थम् ॥ २ ॥
ऊर्ध्वो ह्यस्थादध्यन्तरिक्षेऽधा वृत्राय प्र वधं जभार ।
मिहं वसान उप हीमदुद्रोत्तिग्मायुधो अजयच्छत्रुमिन्द्रः ॥ ३ ॥
बृहस्पते तपुषाश्नेव विध्य वृकद्वरसो असुरस्य वीरान ।
यथा जघन्थ धृषता पुरा चिदेवा जहि शत्रुमस्माकमिन्द्र ॥ ४ ॥

ऋतं । देवाय । कृण्वते । सवित्रे । इंद्राय । अहिऽघ्ने । न । रमंते । आपः ।
अहंःऽअहः । याति । अक्तुः । अपां । कियंति । आ । प्रथमः । सर्गः । आसां ॥ १ ॥
यः । वृत्राय । सिनं । अत्र । अभरिष्यत् । प्र । तं । जनित्री । विदुषे । उवाच ।
पथः । रदंतीः । अनु । जोषं । अस्मै । दिवेऽदिवे । धुनयः । यंति । अर्थं ॥ २ ॥
ऊर्ध्वः । हि । अस्थात् । अधि । अंतरिक्षे । अध । वृत्राय । प्र । वधं । जभार । मिहं ।
वसानः । उप । हि । ईं । अदुद्रोत् । तिग्मऽआयुधः । अजयत् । शत्रुं । इंद्रः ॥ ३ ॥
बृहस्पते । तपुषा । अश्नाऽइव । विध्य । वृकऽद्वरसः । असुरस्य । वीरान् । यथा ।
जघंथ । धृषता । पुरा । चित् । एव । जहि । शत्रुं । अस्माकं । इंद्र ॥ ४ ॥

अवं क्षिप दिवो अश्मानमुच्चा येन शत्रुं मन्दसानो निजूर्वीः ।
तोकस्य सातौ तनयस्य भूरेरस्माँ अर्ध कृणुतादिन्द्र गोनाम् ॥ ५ ॥ १२ ॥
प्र हि क्रतुं बृहथो यं वनुथो रध्रस्य स्थो यजमानस्य चोदौ ।
इन्द्रासोमा युवमस्माँ अविष्टमस्मिन्भयस्थे कृणुतमु लोकम् ॥ ६ ॥
न मा तमन्न श्रमन्नोत तन्द्रन्न वोचाम मा सुनोतेति सोमम् ।
यो मे पृणाद्यो ददद्यो निबोधाद्यो मा सुन्वन्तमुप गोभिरायत् ॥ ७ ॥
सरस्वति त्वमस्माँ अविड्ढि मरुत्वती धृषती जेषि शत्रून् ।
त्यं चिच्छर्धन्तं तविषीयमाणमिन्द्रो हन्ति वृषभं शण्डिकानाम् ॥ ८ ॥

अवं । क्षिप । दिवः । अश्मानं । उच्चा । येन । शत्रुं । मंदसानः । निऽजूर्वीः ।
तोकस्य । सातौ । तनयस्य । भूरेः । अस्मान् । अर्ध । कृणुतात् । इंद्र ।
गोनां ॥ ५ ॥ १२ ॥ प्र । हि । क्रतुं । बृहथः । यं । वनुथः । रध्रस्य । स्थः ।
यजमानस्य । चोदौ । इंद्रासोमा । युवं । अस्मान् । अविष्टं । अस्मिन् । भयऽस्थे ।
कृणुतं । ऊं इति । लोकं ॥ ६ ॥ न । मा । तमत् । न । श्रमत् । न । उत । तंद्रत् ।
न । वोचाम । मा । सुनोत । इति । सोमं । यः । मे । पृणात् । यः । ददत् । यः ।
निऽबोधात् । यः । मा । सुन्वंतं । उप । गोभिः । आ । अयत् ॥ ७ ॥ सरस्वति ।
त्वं । अस्मान् । अविड्ढि । मरुत्वती । धृषती । जेषि । शत्रून् । त्यं । चित् । शर्धंतं ।
तविषीऽयमाणं । इंद्रः । हंति । वृषभं । शंडिकानां ॥ ८ ॥

यो नः सनुत्य उत वा जिघत्नुरभिख्याय तं तिगितेन विध्य ।
बृहस्पत आयुधैर्जेषि शत्रून्द्रुहे रीषन्तं परि धेहि राजन् ॥ ९ ॥
अस्माकेभिः सत्वभिः शूर शूरैर्वीर्या कृधि यानि ते कत्वानि ।
ज्योगभूवन्ननुधूपितासो हत्वी तेषामा भरा नो वसूनि ॥ १० ॥
तं वः शर्धं मारुतं सुम्नयुर्गिरोप ब्रुवे नमसा दैव्यं जनम् ।
यथा रयिं सर्ववीरं नशामहा अपत्यसाचं श्रुत्यं दिवेदिवे ॥ ११ ॥ १३ ॥

॥ ३१ ॥ ऋषिः-गृत्समदः । देवता-विश्वेदेवाः । छन्दः-जगती ॥

॥३१॥ अस्माकं मित्रावरुणावतं रथमादित्यै रुद्रैर्वसुभिः सचाभुवा ।
प्र यद्वयो न पप्तन्वस्मन्नस्परि श्रवस्यवो हृषीवन्तो वनर्षदः ॥ १ ॥

यः । नः । सनुत्यः । उत । वा । जिघत्नुः । अभिऽख्याय । तं । तिगितेन । विध्य ।
बृहस्पते । आयुधैः । जेषि । शत्रून् । द्रुहे । रिषंतं । परि । धेहि । राजन् ॥ ९ ॥
अस्माकेभिः । सत्वऽभिः । शूर । शूरैः । वीर्या । कृधि । यानि । ते । कत्वानि ।
ज्योक् । अभूवन् । अनुऽधूपितासः । हत्वी । तेषां । आ । भर । नः । वसूनि ॥ १० ॥
तं । वः । शर्धं । मारुतं । सुम्नऽयुः । गिरा । उप । ब्रुवे । नमसा । दैव्यं । जनं ।
यथा । रयिं । सर्वऽवीरं । नशामहै । अपत्यऽसाचं । श्रुत्यं । दिवेऽदिवे ॥ ११ ॥ १३ ॥
अस्माकं । मित्रावरुणा । अवतं । रथं । आदित्यैः । रुद्रैः । वसुऽभिः ।
सचाऽभुवा । प्र । यत् । वयः । न । पप्तन् । वस्मनः । परि । श्रवस्यवः । हृषीऽवंतः ।
वनऽसदः ॥ १ ॥

अर्ध स्मा न उदवता सजोषसो रथं देवासो अभि विक्षु वाजयुम् ।
पदाशवः पद्याभिस्तितर्तनो रजः पृथिव्याः सानौ जङ्घनन्त पाणिभिः ॥ २ ॥
उत स्य न इन्द्रो विश्वचर्षणिर्दिवः शर्धेन मारुतेन सुक्रतुः ।
अनु नु स्थात्यवृकाभिरूतिभी रथं महे सनये वाजसातये ॥ ३ ॥
उत स्य देवो भुवनस्य सक्षणिस्त्वष्टा ग्नाभिः सजोषा जूजुवद्रथम् ।
इळा भगो बृहद्दिवोत रोदसी पूषा पुरंधिरश्विनावधा पती ॥ ४ ॥
उत त्ये देवी सुभगे मिथूदृशोषासानक्ता जगतामपीजुवा ।
स्तुषे यद्वां पृथिवि नव्यसा वचः स्थातुश्च वयस्त्रिवया उपस्तिरे ॥ ५ ॥

अर्ध । स्म । नः । उत् । अवत । सऽजोषसः । रथं । देवासः । अभि । विक्षु । वाजऽयुं । यत् । आशवः । पद्याभिः । तितर्तनः । रजः । पृथिव्याः । सानौ । जंघनंत । पाणिऽभिः ॥ २ ॥ उत । स्यः । नः । इंद्रः । विश्वऽचर्षणिः । दिवः । शर्धेन । मारुतेन । सुऽक्रतुः । अनु । नु । स्थाति । अवृकाभिः । ऊतिऽभिः । रथं । महे । सनये । वाजऽसातये ॥ ३ ॥ उत । स्यः । देवः । भुवनस्य । सक्षणिः । त्वष्टा । ग्नाभिः । सऽजोषाः । जूजुवत् । रथं । इळा । भगः । बृहत्ऽदिवा । उत । रोदसी इति । पूषा । पुरंऽधिः । अश्विनौ । अर्ध । पती इति ॥ ४ ॥ उत । त्ये इति । देवी इति । सुभगे इति सुऽभगे । मिथुऽदृशा । उषसानक्ता । जगतां । अपिऽजुवा । स्तुषे । यत् । वां । पृथिवि । नव्यसा । वचः । स्थातुः । च । वयः । त्रिऽवयाः । उपऽस्तिरे ॥ ५ ॥

उत वः शंसमुशिजामिव श्मस्यहिर्बुध्न्योऽज एकपादुत ।
त्रित ऋभुक्षाः सविता चनो दधेऽपां नपादाशुहेमा धिया शमि ॥ ६ ॥
एता वो वश्म्युद्यता यजत्रा अतक्षन्नायवो नव्यसे सम् ।
श्रवस्यवो वाजं चकानाः ससिर्न रथ्यो अह धीतिमश्याः ॥ ७ ॥ १४ ॥

॥ ३२ ॥ ऋषिः—गृत्समदः । देवता—द्यावापृथिव्यौ । छन्दः—जगती ॥

॥३२॥ अस्य मे द्यावापृथिवी ऋतायतो भूतमवित्री वचसः सिषासतः ।
ययोरायुः प्रतरं ते इदं पुर उपस्तुते वसुयुर्वां महो ददे ॥ १ ॥
मा नो गुह्या रिपं आयोरहन्दभन्मा नं आभ्यो रीरधो दुच्छुनाभ्यः ।
मा नो वि यौः सख्या विद्धि तस्य नः सुम्नायता मनसा तत्त्वेमहे ॥ २ ॥

उत । वः । शंसं । उशिजाऽइव । श्मसि । अहिः । बुध्न्यः । अजः । एकऽपात् । उत ।
त्रितः । ऋभुक्षाः । सविता । चनः । दधे । अपां । नपात् । आशुऽहेमा । धिया ।
शमि ॥ ६ ॥ एता । वः । वश्मि । उत्ऽयता । यजत्राः । अतक्षन् । आयवः ।
नव्यसे । सं । श्रवस्यवः । वाजं । चकानाः । ससिः । न । रथ्यः । अह । धीतिं ।
अश्याः ॥ ७ ॥ १४ ॥

अस्य । मे । द्यावापृथिवी इति । ऋतऽयतः । भूतं । अवित्री इति । वचसः ।
सिसासतः । ययोः । आयुः । प्रऽतरं । ते इति । इदं । पुरः । उपस्तुते इत्युपऽस्तुते ।
वसुऽयुः । वां । महः । ददे ॥ १ ॥ मा । नः । गुह्याः । रिपः । आयोः । अहन् ।
दभन् । मा । नः । आभ्यः । रीरधः । दुच्छुनाभ्यः । मा । नः । वि । यौः । सख्या ।
विद्धि । तस्य । नः । सुम्नऽयता । मनसा । तत् । त्वा । ईमहे ॥ २ ॥

अहेळता मनसा शृष्टिमा वह दुहानां धेनुं पिप्युषीमसश्चतम् ।
पथाभिराशुं वचसा च वाजिनं त्वां हिनोमि पुरुहूत विश्वहा ॥ ३ ॥
राकामहं सुहवां सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना ।
सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम् ॥ ४ ॥
यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ।
ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ॥ ५ ॥
सिनीवालि पृथुष्टुके या देवानामसि स्वसा ।
जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः ॥ ६ ॥
या सुबाहुः स्वङ्गुरिः सुपूमा बहुसूवरी ।
तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन ॥ ७ ॥

अहेळता । मनसा । शृष्टिं । आ । वह । दुहानां । धेनुं । पिप्युषीं । असश्चतं ।
पथाभिः । आशुं । वचसा । च । वाजिनं । त्वां । हिनोमि । पुरुऽहूत । विश्वहा ॥३॥
राकां । अहं । सुऽहवां । सुऽस्तुती । हुवे । शृणोतु । नः । सुऽभगा । बोधतु । त्मना ।
सीव्यतु । अपः । सूचया । आच्छिद्यमानया । ददातु । वीरं । शतऽदायं । उक्थ्यं ॥४॥
याः । ते । राके । सुऽमतयः । सुऽपेशसः । याभिः । ददासि । दाशुषे । वसूनि ।
ताभिः । नः । अद्य । सुऽमनाः । उपऽआगहि । सहस्रऽपोषं । सुऽभगे । रराणा ॥५॥
सिनीवालि । पृथुऽस्तुके । या । देवानां । असि । स्वसा । जुषस्व । हव्यं । आऽहुतं ।
प्रऽजां । देवि । दिदिड्ढि । नः ॥ ६ ॥ या । सुऽबाहुः । सुऽअंगुरिः । सुऽसूमा ।
बहुऽसूवरी । तस्यै । विश्पत्न्यै । हविः । सिनीवाल्यै । जुहोतन ॥ ७ ॥

या गुङ्गूर्या सिनीवाली या राका या सरस्वती ।
इन्द्राणीमह्व ऊतये वरुणानीं स्वस्तये ॥ ८ ॥ १५ ॥ ३ ॥

॥ चतुर्थोऽनुवाकः ॥

॥ ३३ ॥ ऋषिः-गृत्समदः । देवता-रुद्रः । छन्दः-त्रिष्टुप ॥

॥३३॥ आ ते पितर्मरुतां सुम्नमेतु मा नः सूर्यस्य सन्दृशो युयोथाः ।
अभि नो वीरो अर्वति क्षमेत प्र जायेमहि रुद्र प्रजाभिः ॥ १ ॥
त्वादत्तेभी रुद्र शन्तमेभिः शतं हिमा अशीय भेषजेभिः ।
व्यस्मद्द्वेषो वितरं व्यंहो व्यमीवाश्चातयस्वा विषूचीः ॥ २ ॥
श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो ।
पर्षि णः पारमंहसः स्वस्ति विश्वा अभीती रपसो युयोधि ॥ ३ ॥

या । गुंगूः । या । सिनीवाली । या । राका । या । सरस्वती । इंद्राणीं । अहे । ऊतये । वरुणानीं । स्वस्तये ॥ ८ ॥ १५ ॥ ३ ॥

आ । ते । पितः । मरुतां । सुम्नं । एतु । मा । नः । सूर्यस्य । संऽदृशः । युयोथाः । अभि । नः । वीरः । अर्वति । क्षमेत । प्र । जायेमहि । रुद्र । प्रऽजाभिः ॥ १ ॥ त्वाऽदत्तेभिः । रुद्र । शंऽतमेभिः । शतं । हिमाः । अशीय । भेषजेभिः । वि । अस्मत् । द्वेषः । वितरं । वि । अंहः । वि । अमीवाः । चातयस्व । विषूचीः ॥ २ ॥ श्रेष्ठः । जातस्य । रुद्र । श्रिया । असि । तवःऽतमः । तवसां । वज्रबाहो इति वज्रऽबाहो । पर्षि । नः । पारं । अंहसः । स्वस्ति । विश्वाः । अभिऽईतीः । रपसः । युयोधि ॥ ३ ॥

मा त्वा रुद्र चुकुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूंती ।
उन्नो वीराँ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि ॥ ४ ॥
हवींमभिर्हवंते यो हविर्भिरव स्तोमेभी रुद्रं दिषीय ।
ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरधन्मनायै ॥ ५ ॥ १६ ॥
उन्मा ममन्द वृषभो मरुत्वान्त्वक्षीयसा वयसा नाधमानम् ।
घृणीव छायामरपा अशीया विवासेयं रुद्रस्य सुम्नं ॥ ६ ॥
कस्य तें रुद्र मृळयाकुर्हस्तो यो अस्ति भेषजो जलाषः ।
अपभर्ता रपसो दैव्यस्याभी नु मा वृषभ चक्षमीथाः ॥ ७ ॥

मा । त्वा । रुद्र । चुकुधाम । नमःऽभिः । मा । दुःऽस्तुती । वृषभ । मा । सऽहूती ।
उत् । नः । वीरान् । अर्पय । भेषजेभिः । भिषक्ऽतमं । त्वा । भिषजां । शृणोमि ॥ ४ ॥
हवींमऽभिः । हवते । यः । हविःऽभिः । अव । स्तोमेभिः । रुद्रं । दिषीय । ऋदूदरः ।
सुऽहवः । मा । नः । अस्यै । बभ्रुः । सुऽशिप्रः । रीरधत् । मनायै ॥ ५ ॥ १६ ॥
उत् । मा । ममंद । वृषभः । मरुत्वान् । त्वक्षीयसा । वयसा । नाधमानं । घृणिंऽइव ।
छायां । अरपाः । अशीय । आ । विवासेयं । रुद्रस्य । सुम्नं ॥ ६ ॥ कं । स्यः । ते ।
रुद्र । मृळयाकुः । हस्तः । यः । अस्ति । भेषजः । जलाषः । अपऽभर्ता । रपसः ।
दैव्यस्य । अभि । नु । मा । वृषभ । चक्षमीथाः ॥ ७ ॥

प्र बभ्रवे वृषभाय श्वितीचे महो महीं सुष्टुतिमीरयामि ।
नमस्या कल्मलीकिनं नमोभिर्गृणीमसि त्वेषं रुद्रस्य नाम ॥ ८ ॥
स्थिरेभिरङ्गैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः ।
ईशानादस्य भुवनस्य भूरेर्न वा उ योषद्रुद्रादसुर्यम् ॥ ९ ॥
अहन्बिभर्षि सायकानि धन्वाहन्निष्कं यजतं विश्वरूपम् ।
अहन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति ॥ १० ॥ १७ ॥
स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् ।
मृळा जरित्रे रुद्र स्तवानोऽन्यं ते अस्मन्नि वपन्तु सेनाः ॥ ११ ॥

प्र । बभ्रवे । वृषभाय । श्वितीचे । महः । महीं । सुऽस्तुतिं । ईरयामि । नमस्य ।
कल्मलीकिनं । नमःऽभिः । गृणीमसि । त्वेषं । रुद्रस्य । नाम ॥ ८ ॥ स्थिरेभिः ।
अंगैः । पुरुऽरूपः । उग्रः । बभ्रुः । शुक्रेभिः । पिपिशे । हिरण्यैः । ईशानात् । अस्य ।
भुवनस्य । भूरेः । न । वै । ऊं इति । योषत् । रुद्रात् । असुर्यं ॥ ९ ॥ अहन् ।
बिभर्षि । सायकानि । धन्व । अहन् । निष्कं । यजतं । विश्वऽरूपं । अहन् । इदं ।
दयसे । विश्वं । अभ्वं । न । वै । ओजीयः । रुद्र । त्वत् । अस्ति ॥ १० ॥ १७ ॥
स्तुहि । श्रुतं । गर्तऽसदं । युवानं । मृगं । न । भीमं । उपऽहत्नुं । उग्रं । मृळ ।
जरित्रे । रुद्र । स्तवानः । अन्यं । ते । अस्मत् । नि । वपंतु । सेनाः ॥ ११ ॥

कुमारश्चित्पितरं वन्दमानं प्रति नानाम रुद्रोपयन्तम् ।
भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं भेषजा रांस्यस्मे ॥ १२ ॥
या वो भेषजा मरुतः शुचीनि या शन्तमा वृषणो या मयोभु ।
यानि मनुरवृणीता पिता नस्ता शं च योश्च रुद्रस्य वक्षिम ॥ १३ ॥
परि णो हेती रुद्रस्य वृज्याः परि त्वेषस्य दुर्मतिर्महीगात् ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ ॥ १४ ॥
एवा बभ्रो वृषभ चेकितान यथा देव न हृणीषे न हंसि ।
हवनश्रुन्नो रुद्रेह बोधि बृहद्वदेम विदथे सुवीराः ॥ १५ ॥ १८ ॥

कुमारः । चित् । पितरं । वंदमानं । प्रति । ननाम । रुद्र । उपऽयंतं । भूरेः । दातारं । सत्ऽपतिं । गृणीषे । स्तुतः । त्वं । भेषजा । रासि । अस्मे इति ॥ १२ ॥ या । वः । भेषजा । मरुतः । शुचीनि । या । शंऽतमा । वृषणः । या । मयःऽभु । यानि । मनुः । अवृणीत । पिता । नः । ता । शं । च । योः । च । रुद्रस्य । वक्षि ॥ १३ ॥ परि । नः । हेतिः । रुद्रस्य । वृज्याः । परि । त्वेषस्य । दुःऽमतिः । मही । गात् । अव । स्थिरा । मघवत्ऽभ्यः । तनुष्व । मीढ्वः । तोकाय । तनयाय । मृळ ॥ १४ ॥ एव । बभ्रो इति । वृषभ । चेकितान । यथा । देव । न । हृणीषे । न । हंसि । हवनऽश्रुत् । नः । रुद्र । इह । बोधि । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १५ ॥ १८ ॥

॥ ३४ ॥ ऋषिः—गृत्समदः । देवता—मरुतः । छन्दः—जगती ॥

॥३४॥ धारावरा मरुतो धृष्णवोजसो मृगा न भीमास्तविषीभिरर्चिनः ।
अग्नयो न शुशुचाना ऋजीषिणो भूमिं धमन्तो अप गा अवृण्वत ॥ १ ॥
द्यावो न स्तृभिश्चितयन्त खादिनो व्यभ्रिया न द्युतयन्त वृष्टयः ।
रुद्रो यद्वो मरुतो रुक्मवक्षसो वृषाजनि पृश्न्याः शुक्र ऊधनि ॥ २ ॥
उक्षन्ते अश्वाँ अत्याँ इवाजिषु नदस्य कर्णैस्तुरयन्त आशुभिः ।
हिरण्यशिप्रा मरुतो दविध्वतः पृक्षं याथ पृषतीभिः समन्यवः ॥ ३ ॥
पृक्षे ता विश्वा भुवना ववक्षिरे मित्रायं वा सदमा जीरदानवः ।
पृषदश्वासो अनवभ्रराधस ऋजिप्यासो न वयुनेषु धूर्षदः ॥ ४ ॥

धारावराः । मरुतः । धृष्णुऽओजसः । मृगाः । न । भीमाः । तविषीभिः । अर्चिनः । अग्नयः । न । शुशुचानाः । ऋजीषिणः । भूमिं । धमंतः । अप । गाः । अवृण्वत ॥ १ ॥ द्यावः । न । स्तृऽभिः । चितयंत । खादिनः । वि । अभ्रियाः । न । द्युतयंत । वृष्टयः । रुद्रः । यत् । वः । मरुतः । रुक्मऽवक्षसः । वृषा । अजनि । पृश्न्याः । शुक्रे । ऊधनि ॥ २ ॥ उक्षंते । अश्वान् । अत्यान्ऽइव । आजिषु । नदस्य । कर्णैः । तुरयंते । आशुऽभिः । हिरण्यऽशिप्राः । मरुतः । दविध्वतः । पृक्षं । याथ । पृषतीभिः । सऽमन्यवः ॥ ३ ॥ पृक्षे । ता । विश्वा । भुवना । ववक्षिरे । मित्रायं । वा । सदं । आ । जीरऽदानवः । पृषत्ऽअश्वासः । अनवभ्रऽराधसः । ऋजिप्यासः । न । वयुनेषु । धूःऽसदः ॥ ४ ॥

इन्धन्वभिर्धेनुभी रप्शदूधभिरध्वस्मभिः पथिभिर्भ्राजदृष्टयः ।
आ हंसासो न स्वसराणि गन्तन मधोर्मदाय मरुतः समन्यवः ॥ ५ ॥ १९ ॥
आ नो ब्रह्माणि मरुतः समन्यवो नरां न शंसः सवनानि गन्तन ।
अश्वांमिव पिप्यत धेनुमूधनि कर्ता धियं जरित्रे वाजपेशसम् ॥ ६ ॥
तं नो दात मरुतो वाजिनं रथं आपानं ब्रह्म चितयद्दिवेदिवे ।
इषं स्तोतृभ्यो बृजनेषु कारवे सनिं मेधामरिष्टं दुष्टरं सहः ॥ ७ ॥
यद्युञ्जते मरुतो रुक्मवक्षसोऽश्वान्रथेषु भग आ सुदानवः ।
धेनुर्न शिश्वे स्वसरेषु पिन्वते जनाय रातहविषे महीमिषम् ॥ ८ ॥
यो नो मरुतो दृकतांति मर्त्यो रिपुर्दधे वसवो रक्षता रिषः ।
वर्तयत तपुषा चक्रियाभि तमव रुद्रा अशसो हन्तना वधः ॥ ९ ॥

इंधन्वऽभिः । धेनुऽभिः । रप्शदूधऽभिः । अध्वस्मऽभिः । पथिऽभिः । भ्राजत्ऽऋष्टयः । आ । हंसासः । न । स्वसराणि । गंतन । मधोः । मदाय । मरुतः । सऽमन्यवः ॥ ५ ॥ १९ ॥ आ । नः । ब्रह्माणि । मरुतः । सऽमन्यवः । नरा । न । शंसः । सवनानि । गंतन । अश्वाँऽइव । पिप्यत । धेनुं । ऊधनि । कर्ता । धियं । जरित्रे । वाजंऽपेशसं ॥ ६ ॥ तं । नः । दात । मरुतः । वाजिनं । रथं । आपानं । ब्रह्म । चितयत् । दिवेऽदिवे । इषं । स्तोतृऽभ्यः । बृजनेषु । कारवे । सनिं । मेधा । अरिष्टं । दुस्तरं । सहः ॥ ७ ॥ यत् । युंजते । मरुतः । रुक्मऽवक्षसः । अश्वान् । रथेषु । भगे । आ । सुऽदानवः । धेनुः । न । शिश्वे । स्वसरेषु । पिन्वते । जनाय । रातऽहविषे । महीं । इषं ॥ ८ ॥ यः । नः । मरुतः । दृकऽतांति । मर्त्यः । रिपुः । दधे । वसवः । रक्षत । रिषः । वर्तयत । तपुषा । चक्रिया । अभि । तं । अव । रुद्राः । अशसः । हंतन । वधरिति ॥ ९ ॥

चित्रं तद्वो मरुतो यामं चेकिते पृश्न्या यद्धरण्यापयो दुहुः ।
यद्वा निदे नवमानस्य रुद्रियास्त्रितं जराय जुरतामदाभ्याः ॥ १० ॥ २० ॥
तान्वो महो मरुत एवयाम्नो विष्णोरेषस्य प्रभृथे हवामहे ।
हिरण्यवर्णान्ककुहान्यतस्रुचो ब्रह्मण्यन्तः शंस्यं राध ईमहे ॥ ११ ॥
ते दशग्वाः प्रथमा यज्ञमूहिरे ते नो हिन्वन्तूषसो व्युष्टिषु ।
उषा न रामीररुणैरपोर्णुते महो ज्योतिषा शुचता गोअर्णसा ॥ १२ ॥
ते क्षोणीभिररुणेभिर्नाञ्जिभी रुद्रा ऋतस्य सदनेषु वावृधुः ।
निमेघमाना अत्येन पाजसा सुश्चन्द्रं वर्ण दधिरे सुपेशसम् ॥ १३ ॥
ताँ इयानो महि वरूथमूतय उप घेदेना नमसा गृणीमसि ।
त्रितो न यान्पञ्च होतॄनभिष्टय आववर्तदवराञ्चक्रियावसे ॥ १४ ॥

चित्रं । तत् । वः । मरुतः । यामं । चेकिते । पृश्न्याः । यत् । ऊधः । अपि । आपयः । दुहुः । यत् । वा । निदे । नवमानस्य । रुद्रियाः । त्रितं । जराय । जुरता । अदाभ्याः ॥ १० ॥ २० ॥ तान् । वः । महः । मरुतः । एवऽयाम्नः । विष्णोः । एषस्य । प्रऽभृथे । हवामहे । हिरण्यऽवर्णान् । ककुहान् । यतऽस्रुचः । ब्रह्मण्यंतः । शंस्यं । राधः । ईमहे ॥ ११ ॥ ते । दशऽग्वाः । प्रथमाः । यज्ञं । ऊहिरे । ते । नः । हिन्वंतु । उषसः । विऽउष्टिषु । उषाः । न । रामीः । अरुणैः । अप । ऊर्णुते । महः । ज्योतिषा । शुचता । गोऽअर्णसा ॥ १२ ॥ ते । क्षोणीभिः । अरुणेभिः । न । अंजिऽभिः । रुद्राः । ऋतस्य । सदनेषु । वावृधुः । निऽमेघमानाः । अत्येन । पाजसा । सुऽचंद्रं । वर्णं । दधिरे । सुऽपेशसं ॥ १३ ॥ तान् । इयानः । महि । वरूथं । ऊतये । उप । घ । इत् । एना । नमसा । गृणीमसि । त्रितः । न । यान् । पंच । होतॄन् । अभिष्टये । आऽववर्तत् । अवरान् । चक्रियां । अवसे ॥ १४ ॥

यया रध्रं पारयथात्यंहो यया निदो मुञ्चथं वन्दितारम् ।
अर्वाची सा मरुतो या व ऊतिरो षु वाश्रेव सुमतिर्जिगातु ॥ १५ ॥ २१ ॥

॥ ३५ ॥ ऋषिः-गृत्समदः । देवता-अपान्नपात् । छन्दः-त्रिष्टुप् ॥

॥ ३५ ॥ उपेमसृक्षि वाजयुर्वचस्यां चनो दधीत नाद्यो गिरो मे ।
अपां नपादाशुहेमा कुवित्स सुपेशसस्करति जोजिषद्धि ॥ १ ॥
इमं स्वस्मै हृद आ सुतष्टं मन्त्रं वोचेम कुविदस्य वेदत् ।
अपां नपादसुर्यस्य मन्हा विश्वान्यर्यो भुवना जजान ॥ २ ॥
समन्या यन्त्युप यन्त्यन्याः समानमूर्वं नद्यः पृणन्ति ।
तमू शुचिं शुचयो दीदिवांसमपां नपातं परि तस्थुरापः ॥ ३ ॥

यया । रध्रं । पारयथ । अति । अंहः । यया । निदः । मुंचथं । वंदितारं । अर्वाची । सा । मरुतः । या । वः । ऊतिः । ओ इति । सु । वाश्राऽइव । सुऽमतिः । जिगातु ॥ १५ ॥ २१ ॥

उप । ईं । असृक्षि । वाजऽयुः । वचस्यां । चनः । दधीत । नाद्यः । गिरः । मे । अपां । नपात् । आशुऽहेमा । कुवित् । सः । सुऽपेशसः । करति । जोजिषत् । हि ॥ १ ॥ इमं । सु । अस्मै । हृदः । आ । सुऽतष्टं । मंत्रं । वोचेम । कुवित् । अस्य । वेदत् । अपा । नपात् । असुर्यस्य । मन्हा । विश्वानि । अर्यः । भुवना । जजान ॥ २ ॥ सं । अन्याः । यंति । उप । यंति । अन्याः । समानं । ऊर्वं । नद्यः । पृणंति । तं । ऊं इति । शुचिं । शुचयः । दीदिऽवांसं । अपां । नपातं । परि । तस्थुः । आपः ॥ ३ ॥

तमस्मेरा युवतयो युवानं मर्मृज्यमानाः परि यन्त्यापः ।
स शुक्रेभिः शिक्वभी रेवदस्मे दीदायानिध्मो घृतनिर्णिगप्सु ॥ ४ ॥
अस्मै तिस्रो अव्यथ्याय नारीर्देवाय देवीर्दिधिषन्त्यन्नम् ।
कृता इवोप हि प्रसर्स्रे अप्सु स पीयूषं धयति पूर्वसूनाम् ॥ ५ ॥ २२ ॥
अश्वस्यात्र जनिमास्य च स्वर्द्रुहो रिषः सम्पृचः पाहि सूरीन् ।
आमासु पूर्षु परो अप्रमृष्यं नारातयो वि नशन्नानृतानि ॥ ६ ॥
स्व आ दमे सुदुघा यस्य धेनुः स्वधां पीपाय सुभ्वन्नमत्ति ।
सो अपां नपादूर्जयन्नप्स्वन्तर्वसुदेयाय विधते वि भाति ॥ ७ ॥
यो अप्स्वा शुचिना दैव्येन ऋतावाजस्र उर्विया विभाति ।
वया इदन्या भुवनान्यस्य प्र जायन्ते वीरुधश्च प्रजाभिः ॥ ८ ॥

तं । अस्मेराः । युवतयः । युवानं । मर्मृज्यमानाः । परि । यंति । आपः । सः । शुक्रेभिः । शिक्वऽभिः । रेवत् । अस्मे इति । दीदाय । अनिध्मः । घृतऽनिर्विक् । अप्ऽसु ॥ ४ ॥ अस्मै । तिस्रः । अव्यथ्याय । नारीः । देवाय । देवीः । दिधिषंति । अन्नं । कृताःऽइव । उप । हि । प्रऽसर्स्रे । अप्ऽसु । सः । पीयूषं । धयति । पूर्वेऽसूनां ॥ ५ ॥ २२ ॥ अश्वस्य । अत्र । जनिम । अस्य । च । स्वः । द्रुहः । रिषः । संऽपृचः । पाहि । सूरीन् । आमासु । पूर्षु । परः । अप्रऽमृष्यं । न । अरातयः । वि । नशन् । न । अनृतानि ॥ ६ ॥ स्वे । आ । दमे । सुऽदुघा । यस्य । धेनुः । स्वधां । पीपाय । सुऽभु । अन्नं । अत्ति । सः । अपां । नपात् । ऊर्जयन् । अप्ऽसु । अंतः । वसुऽदेयाय । विधते । वि । भाति ॥ ७ ॥ यः । अप्ऽसु । आ । शुचिना । दैव्येन । ऋतऽवा । अजस्रः । उर्विया । विऽभाति । वयाः । इत् । अन्या । भुवनानि । अस्य । प्र । जायंते । वीरुधः । च । प्रऽजाभिः ॥ ८ ॥

अपां नपादा ह्यस्थादुपस्थं जिह्मानामूर्ध्वो विद्युतं वसानः ।
तस्य ज्येष्ठं महिमानं वहन्तीर्हिरण्यवर्णाः परि यन्ति यह्वीः ॥ ९ ॥
हिरण्यरूपः स हिरण्यसन्दृगपां नपात्सेदु हिरण्यवर्णः ।
हिरण्ययात्परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै ॥ १० ॥ २३ ॥
तदस्यानीकमुत चारु नामापीच्यं वर्धते नप्तुरपाम् ।
यमिन्धते युवतयः समित्था हिरण्यवर्णं घृतमन्नमस्य ॥ ११ ॥
अस्मै बहूनामवमाय सख्ये यज्ञैर्विधेम नमसा हविर्भिः ।
सं सानु मार्ज्मि दिधिषामि बिल्मैर्दधाम्यन्नैः परि वन्द ऋग्भिः ॥ १२ ॥
स ईं वृषाजनयत्तासु गर्भं स ईं शिशुर्धयति तं रिहन्ति ।
सो अपां नपादनभिम्लातवर्णोऽन्यस्येवेह तन्वा विवेष ॥ १३ ॥

अपां । नपात् । आ । हि । अस्थात् । उपऽस्थे । जिह्मानाम् । ऊर्ध्वः । विऽद्युतम् । वसानः । तस्य । ज्येष्ठम् । महिमानम् । वहन्तीः । हिरण्यऽवर्णाः । परि । यन्ति । यह्वीः ॥ ९ ॥ हिरण्यऽरूपः । सः । हिरण्यऽसंदृक् । अपां । नपात् । सः । इत् । ऊं इति । हिरण्यऽवर्णः । हिरण्ययात् । परि । योनेः । निऽसद्य । हिरण्यऽदाः । ददति । अन्नम् । अस्मै ॥ १० ॥ २३ ॥ तत् । अस्य । अनीकम् । उत । चारु । नाम । अपीच्यम् । वर्धते । नप्तुः । अपां । यम् । इन्धते । युवतयः । सम् । इत्था । हिरण्यऽवर्णम् । घृतम् । अन्नम् । अस्य ॥ ११ ॥ अस्मै । बहूनाम् । अवऽमाय । सख्ये । यज्ञैः । विधेम । नमसा । हविःऽभिः । सम् । सानु । मार्ज्मि । दिधिषामि । बिल्मैः । दधामि । अन्नैः । परि । वन्दे । ऋक्ऽभिः ॥ १२ ॥ सः । ईम् । वृषा । अजनयत् । तासु । गर्भम् । सः । ईम् । शिशुः । धयति । तम् । रिहन्ति । सः । अपां । नपात् । अनभिम्लातऽवर्णः । अन्यस्यऽइव । इह । तन्वा । विवेष ॥ १३ ॥

अस्मिन्पदे परमे तस्थिवांसमध्वस्मभिर्विश्वहा दीदिवांसम् ।
आपो नप्त्रे घृतमन्नं वहन्तीः स्वयमत्कैः परि दीयन्ति यह्वीः ॥ १४ ॥
अयांसमग्ने सुक्षितिं जनायायांसमु मघवद्भ्यः सुवृक्तिम् ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥ १५ ॥ २४ ॥

॥ ३६ ॥ ऋषिः—गृत्समदः । देवता—इन्द्रः । छन्दः—जगती ॥

॥३६॥ तुभ्यं हिन्वानो वसिष्ट गा अपोऽधुक्षन्त्सीमविभिरद्रिभिर्नरः ।
पिबेन्द्र स्वाहा प्रहुतं वषट्कृतं होत्रादा सोमं प्रथमो य ईशिषे ॥ १ ॥
यज्ञैः सम्मिश्लाः पृषतीभिर्ऋष्टिभिर्यामञ्छुभ्रासो अञ्जिषु प्रिया उत ।
आसद्या बर्हिर्भरतस्य सूनवः पोत्रादा सोमं पिबत दिवो नरः ॥ २ ॥

अस्मिन् । पदे । परमे । तस्थिऽवांसं । अध्वस्मऽभिः । विश्वहा । दीदिऽवांसं । आपः । नप्त्रे । घृतं । अन्नं । वहंतीः । स्वयं । अत्कैः । परि । दीयंति । यह्वीः ॥ १४ ॥ अयांसं । अग्ने । सुऽक्षितिं । जनाय । अयांसं । ऊं इति । मघवत्ऽभ्यः । सुऽवृक्तिं । विश्वं । तत् । भद्रं । यत् । अवंति । देवाः । बृहत् । वदेम । विदथे । सुऽवीराः ॥ १५ ॥ २४ ॥

तुभ्यं । हिन्वानः । वसिष्ट । गाः । अपः । अधुक्षन् । सीं । अविऽभिः । अद्रिऽभिः । नरः । पिब । इंद्र । स्वाहा । प्रऽहुतं । वषट्ऽकृतं । होत्रात् । आ । सोमं । प्रथमः । यः । ईशिषे ॥ १ ॥ यज्ञैः । संऽमिश्लाः । पृषतीभिः । ऋष्टिऽभिः । यामन् । शुभ्रासः । अंजिषु । प्रियाः । उत । आऽसद्य । बर्हिः । भरतस्य । सूनवः । पोत्रात् । आ । सोमं । पिबत । दिवः । नरः ॥ २ ॥

अमेव नः सुहवा आ हि गन्तन नि बर्हिषि सदतना रणिष्टन ।
अथा मन्दस्व जुजुषाणो अन्धसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः ॥ ३ ॥
आ वक्षि देवाँ इह विप्र यक्षि चोशन्होतर्नि षदा योनिषु त्रिषु ।
प्रति वीहि प्रस्थितं सोम्यं मधु पिबाग्नीध्रात्तवं भागस्य तृप्णुहि ॥ ४ ॥
एष स्य ते तन्वो नृम्णवर्धनः सह ओजः प्रदिवि बाह्वोर्हितः ।
तुभ्यं सुतो मघवन्तुभ्यमाभृतस्त्वमस्य ब्राह्मणादा तृपत्पिब ॥ ५ ॥
जुषेथां यज्ञं बोधतं हवस्य मे सत्तो होतां निषदः पूर्व्या अनु ।
अच्छा राजाना नमं एत्यावृतं प्रशास्त्रादा पिबतं सोम्यं मधु ॥६॥२५॥७॥

अमाऽइव । नः । सुऽहवाः । आ । हि । गंतन । नि । बर्हिषि । सदतन । रणिष्टन ।
अथ । मंदस्व । जुजुषाणः । अंधसः । त्वष्टः । देवेभिः । जनिऽभिः । सुमत्ऽगणः ॥ ३ ॥
आ । वक्षि । देवान् । इह । विप्र । यक्षि । च । उशन् । होतः । नि । सद ।
योनिषु । त्रिषु । प्रति । वीहि । प्रऽस्थितं । सोम्यं । मधु । पिब । आशीःऽत्रात् । तव ।
भागस्य । तृप्णुहि ॥ ४ ॥ एषः । स्यः । ते । तन्वः । नृम्णऽवर्धनः । सहः । ओजः ।
प्रऽदिवि । बाह्वोः । हितः । तुभ्यं । सुतः । मघऽवन् । तुभ्यं । आऽभृतः । त्वं ।
अस्य । ब्राह्मणात् । आ । तृपत् । पिब ॥ ५ ॥ जुषेथां । यज्ञं । बोधतं । हवस्य ।
मे । सत्तः । होतां । निऽषदः । पूर्व्याः । अनु । अच्छ । राजाना । नमः । एति ।
आऽवृतं । प्रऽशास्त्रात् । आ । पिबतं । सोम्यं । मधु ॥ ६ ॥ २४ ॥ ७ ॥

॥ इति द्वितीयाष्टके सप्तमोऽध्यायः ॥ ७ ॥

॥ अथ द्वितीयाष्टकेऽष्टमोऽध्यायः ॥ ८ ॥

॥ ३७ ॥ ऋषिः—गृत्समदः । देवता—द्रविणोदः । छन्दः—जगती ॥

॥३७॥ मन्दस्व होत्रादनु जोषमन्धसोऽध्वर्यवः स पूर्णां वष्ट्यासिचम् ।
तस्मा एतं भरत तद्वशो ददिर्होत्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥ १ ॥
यमु पूर्वमहुवे तमिदं हुवे सेदु हव्यो ददिर्यो नाम पत्यते ।
अध्वर्युभिः प्रस्थितं सोम्यं मधु पोत्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥ २ ।
मेधन्तु ते वह्नयो येभिरीयसेऽरिषण्यन्वीळयस्वा वनस्पते ।
आयूया धृष्णो अभिगूर्या त्वं नेष्ट्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥ ३ ॥

॥ अथ द्वितीयाष्टकेऽष्टमोऽध्यायः ॥ ८ ॥

मंदस्व । होत्रात् । अनु । जोषं । अंधसः । अध्वर्यवः । सः । पूर्णां । वष्टि । आऽसिचं । तस्मै । एतं । भरत । तत्ऽवशः । ददिः । होत्रात् । सोमं । द्रविणःऽदः । पिब । ऋतुऽभिः ॥ १ ॥ यं । ऊं इति । पूर्वं । अहुवे । तं । इदं । हुवे । सः । इत् । ऊं इति । हव्यः । ददिः । यः । नामं । पत्यते । अध्वर्युऽभिः । प्रऽस्थितं । सोम्यं । मधु । पोत्रात् । सोमं । द्रविणःऽदः । पिब । ऋतुऽभिः ॥ २ ॥ मेधंतु । ते वह्नयः । येभिः । ईयसे । अरिषण्यन् । वीळयस्व । वनस्पते । आऽयूय । धृष्णो इति । अभिऽगूर्य । त्वं । नेष्ट्रात् । सोमं । द्रविणःऽदः । पिब । ऋतुऽभिः ॥ ३ ॥

अपांद्धोत्रादुत पोत्रादमत्तोत नेष्ट्रादजुषत प्रयो हितम् ।
तुरीयं पात्रममृक्तमर्मर्त्यं द्रविणोदाः पिबतु द्राविणोदसः ॥ ४ ॥
अर्वाञ्चमद्य यय्यं नृवाहणं रथं युञ्जाथामिह वां विमोचनम् ।
पृङ्क्तं हवींषि मधुना हि कं गतमथा सोमं पिबतं वाजिनीवसू ॥ ५ ॥
जोष्यग्ने समिधं जोषयाहुतिं जोषि ब्रह्म जन्यं जोषि सुष्टुतिम् ।
विश्वेभिर्विश्वाँ ऋतुना वसो महऽउशन्देवाँ उशतः पायया हविः ॥ ६ ॥ १ ॥

॥ ३८ ॥ ऋषिः-गृत्समदः । देवता-सविता । छन्दः-त्रिष्टुप् ॥

॥३८॥ उदु ष्य देवः सविता सवाय शश्वत्तमं तदपा वह्निरस्थात् ।
नूनं देवेभ्यो वि हि धाति रत्नमथाभजद्वीतिहोत्रं स्वस्तौ ॥ १ ॥

अपांत् । होत्रात् । उत । पोत्रात् । अमत्त । उत । नेष्ट्रात् । अजुषत । प्रयः । हितं । तुरीयं । पात्रं । अमृक्तं । अमर्त्यं । द्रविणःऽदाः । पिबतु । द्राविणःऽदसः ॥ ४ ॥ अर्वाचं । अद्य । यय्यं । नृऽवाहनं । रथं । युंजाथां । इह । वां । विऽमोचनं । पृंक्तं । हवींषि । मधुना । आ । हि । कं । गतं । अथ । सोमं । पिबतं । वाजिनीवसू इति वाजिनीऽवसू ॥ ५ ॥ जोषिं । अग्ने । संऽइधं । जोषिं । आऽहुतिं । जोषिं । ब्रह्म । जन्यं । जोषिं । सुऽस्तुतिं । विश्वेभिः । विश्वान् । ऋतुना । वसो इति । महः । उशन् । देवान् । उशतः । पायय । हविः ॥ ६ ॥ १ ॥

उत् । ऊं इति । स्यः । देवः । सविता । सवाय । शश्वत्ऽतमं । ततऽअपाः । वाह्निः । अस्थात् । नूनं । देवेभ्यः । वि । हि । धाति । रत्नं । अथ । आ । अभजत् । वीतिऽहोत्रं । स्वस्तौ ॥ १ ॥

विश्वस्य हि श्रुष्टये देव ऊर्ध्वः प्र बाहवा पृथुपाणिः सिसर्ति ।
आपश्चिदस्य व्रत आ निमृग्रा अयं चिद्वातो रमते परिज्मन् ॥ २ ॥
आशुभिश्चिद्वान्वि मुचाति नूनमरीरमदर्तमानं चिदेतोः ।
अह्यर्णां चिन्न्यया अविष्यामनु व्रतं सवितुर्मोक्यागात् ॥ ३ ॥
पुनः समव्यद्वितता वयन्ती मध्या कर्तोर्न्यधाच्छक्म धीरः ।
उत्संहायास्थाद्वयुनातूरदर्धररमतिः सविता देव आगात् ॥ ४ ॥
नानौकांसि दुर्यो विश्वमायुर्वि तिष्ठते प्रभवः शोको अग्नेः ।
ज्येष्ठं माता सूनवे भागमाधादन्वस्य केतमिषितं सवित्रा ॥ ५ ॥ २ ॥

विश्वस्य । हि । श्रुष्टये । देवः । ऊर्ध्वः । प्र । बाहवा । पृथुऽपाणिः । सिसर्ति ।
आपः । चित् । अस्य । व्रते । आ । निऽमृग्राः । अयं । चित् । वातः । रमते ।
परिऽज्मन् ॥ २ ॥ आशुऽभिः । चित् । यान् । वि । मुचाति । नूनं । अरीरमत् ।
अर्तमानं । चित् । एतोः । अह्यर्णां । चित् । नि । अयान् । अविष्यां । अनु । व्रतं ।
सवितुः । मोकीं । आ । अगात् ॥ ३ ॥ पुनरिति । सं । अव्यत् । विऽततं । वयंती ।
मध्या । कर्तोः । नि । अधात् । शक्म । धीरः । उत् । संऽहाय । अस्थात् । वि ।
ऋतून् । अदर्धः । अरमतिः । सविता । देवः । आ । अगात् ॥ ४ ॥ नाना ।
ओकांसि । दुर्यः । विश्वं । आयुः । वि । तिष्ठते । प्रऽभवः । शोकः । अग्नेः । ज्येष्ठं ।
माता । सूनवे । भागं । आ । अधात् । अनु । अस्य । केतं । इषितं । सवित्रा ॥ ५ ॥ २ ॥

समावर्वर्ति विष्ठितो जिगीषुर्विश्वेषां कामश्चरतामभूत् ।
शश्वाँ अपो विकृतं हित्व्यागादनु व्रतं सवितुर्दैव्यस्य ॥ ६ ॥
त्वया हितमप्यमप्सु भागं धन्वान्वा मृगयसो वि तस्थुः ।
वनानि विभ्यो नकिरस्य तानि व्रता देवस्य सवितुर्मिनन्ति ॥ ७ ॥
यात्राध्यं वरुणो योनिमप्यमनिंशितं निमिषि जभुराणः ।
विश्वो मार्ताण्डो व्रजमा पशुर्गात्स्थशो जन्मानि सविता व्याकः ॥ ८ ॥
न यस्येन्द्रो वरुणो न मित्रो व्रतमर्यमा न मिनन्ति रुद्रः ।
नारातयस्तमिदं स्वस्ति हुवे देवं सवितारं नमोभिः ॥ ९ ॥

सऽआवर्वर्ति । विऽस्थितः । जिगीषुः । विश्वेषां । कामः । चरतां । अमा । अभूत् । शश्वान् । अपः । विऽकृतं । हित्वी । आ । अगात् । अनु । व्रतं । सवितुः । दैव्यस्य ॥ ६ ॥ त्वया । हितं । अप्यं । अप्ऽसु । भागं । धन्व । अनु । आ । मृगयसः । वि । तस्थुः । वनानि । विऽभ्यः । नकिः । अस्य । तानि । व्रता । देवस्य । सवितुः । मिनंति ॥ ७ ॥ यात्ऽराध्यं । वरुणः । योनिं । अप्यं । अनिंऽशितं । निऽमिषि । जभुराणः । विश्वः । मार्तोडः । व्रजं । आ । पशुः । गात् । स्थऽशः । जन्मानि । सविता । वि । आ । अकरित्यकः ॥ ८ ॥ न । यस्य । इंद्रः । वरुणः । न । मित्रः । व्रतं । अर्यमा । न । मिनंति । रुद्रः । न । अरातयः । तं । इदं । स्वस्ति । हुवे । देवं । सवितारं । नमःऽभिः ॥ ९ ॥

भगं धियं वाजयन्तः पुरंन्धिं नराशंसो ग्नास्पतिर्नो अव्याः ।
आये वामस्य सङ्गथे रयीणां प्रिया देवस्य सवितुः स्याम ॥ १० ॥
अस्मभ्यं तद्दिवो अद्भ्यः पृथिव्यास्त्वया दत्तं काम्यं राध आ गात् ।
शं यत्स्तोतृभ्य आपये भवात्युरुशंसाय सवितर्जरित्रे ॥ ११ ॥ ३ ॥

॥ ३९ ॥ ऋषिः-गृत्समदः । देवता-अश्विनौ । छन्दः-त्रिष्टुप् ॥

॥३९॥ ग्रावाणेव तदिदर्थं जरेथे गृध्रेव वृक्षं निधिमन्तमच्छ ।
ब्रह्माणेव विदथं उक्थशासा दूतेव हव्या जन्या पुरुत्रा ॥ १ ॥
प्रातर्यावाणा रथ्येव वीराजेव यमा वरमा सचेथे ।
मेनेव तन्वा शुम्भमाने दम्पतीव क्रतुविदा जनेषु ॥ २ ॥

भगं । धियं । वाजयंतः । पुरंऽधिं । नराशंसः । ग्नाः । पतिः । नः । अव्याः । आऽअये ।
वामस्य । संऽगथे । रयीणां । प्रियाः । देवस्य । सवितुः । स्याम ॥ १० ॥ अस्मभ्यं ।
तत् । दिवः । अत्ऽभ्यः । पृथिव्याः । त्वया । दत्तं । काम्यं । राधः । आ । गात् ।
शं । यत् । स्तोतृऽभ्यः । आपये । भवाति । उरुऽशंसाय । सवितः । जरित्रे ॥ ११ ॥ ३ ॥

ग्रावाणाऽइव । तत् । इत् । अर्थं । जरेथे इति । गृध्राऽइव । वृक्षं । निधिऽमंतं ।
अच्छ । ब्रह्माणाऽइव । विदथं । उक्थऽशसा । दूताऽइव । हव्या । जन्या ।
पुरुऽत्रा ॥ १ ॥ प्रातःऽयावाना । रथ्याऽइव । वीरा । अजाऽइव । यमा । वरं । आ ।
सचेथे इति । मेनें इवेति मेनेंऽइव । तन्वा । शुंभमाने इति । दंपती इवेति दंपतीऽइव ।
क्रतुऽविदा । जनेषु ॥ २ ॥

शृङ्गेव नः प्रथमा गन्तमर्वाक् शफाविव जर्भुराणा तरोभिः ।
चक्रवाकेव प्रति वस्तोरुस्रावाश्वा यातं रथ्येव शक्रा ॥ ३ ॥
नावेव नः पारयतं युगेव नभ्येव न उपधीव प्रधीव ।
श्वानेव नो अरिषण्या तनूनां खृगलेव विस्रसः पातमस्मान् ॥ ४ ॥
वातेवाजुर्या नद्येव रीतिरक्षी इव चक्षुषा यातमर्वाक् ।
हस्ताविव तन्वे३शम्भविष्ठा पादेव नो नयतं वस्यो अच्छ ॥ ५ ॥ ४ ॥
ओष्ठाविव मध्वास्ने वदन्ता स्तनाविव पिप्यतं जीवसे नः ।
नासेव नस्तन्वो रक्षितारा कर्णाविव सुश्रुता भूतमस्मे ॥ ६ ॥

शृंगाऽइव । नः । प्रथमा । गंतं । अर्वाक् । शफौऽइव । जर्भुराणा । तरःऽभिः ।
चक्रवाकाऽइव । प्रतिं । वस्तोः । उस्रा । अर्वाचा । यातं । रथ्याऽइव । शक्रा ॥ ३ ॥
नावाऽइव । नः । पारयतं । युगाऽइव । नभ्याऽइव । नः । उपधी इवेत्युपधीऽइव ।
प्रधी इवेतिं प्रधीऽइव । श्वानाऽइव । नः । अरिषण्या । तनूनां । खृगलाऽइव । विऽस्रसः ।
पातं । अस्मान् ॥ ४ ॥ वाताऽइव । अजुर्या । नद्याऽइव । रीतिः । अक्षी इवेत्यक्षीऽइव ।
चक्षुषा । आ । यातं । अर्वाक् । हस्तौऽइव । तन्वें । शंऽभविष्ठा । पादाऽइव । नः ।
नयतं । वस्यः । अच्छ ॥ ५ ॥ ४ ॥ ओष्ठौऽइव । मधु । आस्ने । वदंता ।
स्तनौऽइव । पिप्यतं । जीवसें । नः । नासाऽइव । नः । तन्वः । रक्षितारा । कर्णौऽइव ।
सुऽश्रुता । भूतं । अस्मे इतिं ॥ ६ ॥

हस्तेव शक्तिमभि संदृदी नः क्षामेव नः समजतं रजांसि ।
इमा गिरो अश्विना युष्मयन्तीः क्ष्णोत्रेणेव स्वधितिं सं शिशीतम् ॥ ७ ॥
एतानि वामश्विना वर्धनानि ब्रह्म स्तोमं गृत्समदासो अक्रन् ।
तानि नरा जुजुषाणोप यातं बृहद्वदेम विदथे सुवीराः ॥ ८ ॥ ५ ॥

॥ ४० ॥ ऋषिः—गृत्समदः । देवता—सोमापूषणौ । छन्दः—जगती ॥

॥४०॥ सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः ।
जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिम् ॥ १ ॥
इमौ देवौ जायमानौ जुषन्तेमौ तमांसि गूहतामजुष्टा ।
आभ्यामिन्द्रः पक्वमामास्वन्तः सोमापूषभ्यां जनदुस्रियासु ॥ २ ॥

हस्तांऽइव । शक्तिं । अभि । संदृदी इति संऽदृदी । नः । क्षामंऽइव । नः । सं । अजतं । रजांसि । इमाः । गिरः । अश्विना । युष्मऽयंतीः । क्ष्णोत्रेणऽइव । स्वऽधितिं । सं । शिशीतं ॥ ७ ॥ एतानि । वां । अश्विना । वर्धनानि । ब्रह्म । स्तोमं । गृत्सऽमदासः । अक्रन् । तानि । नरा । जुजुषाणा । उप । यातं । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ८ ॥ ५ ॥

सोमापूषणा । जनना । रयीणां । जनना । दिवः । जनना । पृथिव्याः । जातौ । विश्वस्य । भुवनस्य । गोपौ । देवाः । अकृण्वन् । अमृतस्य । नाभिं ॥ १ ॥ इमौ । देवौ । जायमानौ । जुषंत । इमौ । तमांसि । गूहतां । अजुष्टा । आभ्यां । इंद्रः । पक्वं । आमासु । अंतरिति । सोमापूषऽभ्यां । जनत् । उस्रियासु ॥ २ ॥

सोमापूषणा रजसो विमानं सप्तचक्रं रथमविश्वमिन्वम् ।
विषूवृतं मनसा युज्यमानं तं जिन्वथो वृषणा पञ्चरश्मिम् ॥ ३ ॥
दिव्यः अन्यः सदनं चक्र उच्चा पृथिव्यामन्यो अध्यन्तरिक्षे ।
तावस्मभ्यं पुरुवारं पुरुक्षुं रायस्पोषं वि ष्यतां नाभिमस्मे ॥ ४ ॥
विश्वान्यन्यो भुवना जजान विश्वमन्यो अभिचक्षाण एति ।
सोमापूषणाववतं धियं मे युवाभ्यां विश्वाः पृतना जयेम ॥ ५ ॥
धियं पूषा जिन्वतु विश्वमिन्वो रयिं सोमो रयिपतिर्दधातु ।
अवतु देव्यदितिरनर्वा बृहद्वदेम विदथे सुवीराः ॥ ६ ॥ ६ ॥

सोमापूषणा । रजसः । विऽमानं । सप्तऽचक्रं । रथं । अविश्वऽमिन्वं । विषुऽवृतं । मनसा । युज्यमानं । तं । जिन्वथः । वृषणा । पंचऽरश्मिं ॥ ३ ॥ दिवि । अन्यः । सदनं । चक्रे । उच्चा । पृथिव्यां । अन्यः । अधि । अंतरिक्षे । तौ । अस्मभ्यं । पुरुऽवारं । पुरुऽक्षुं । रायः । पोषं । वि । स्यता । नाभिं । अस्मे इति ॥ ४ ॥ विश्वानि । अन्यः । भुवना । जजान । विश्वं । अन्यः । अभिऽचक्षाणः । एति । सोमापूषणौ । अवतं । धियं । मे । युवाभ्यां । विश्वाः । पृतनाः । जयेम ॥ ५ ॥ धियं । पूषा । जिन्वतु । विश्वंऽइन्वः । रयिं । सोमः । रयिऽपतिः । दधातु । अवतु । देवी । अदितिः । अनर्वा । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ६ ॥ ६ ॥

॥ ४१ ॥ ऋषिः-गृत्समदः । देवता-वायुः । छन्दः-गायत्री ॥

॥ ४१ ॥ वायो ये ते सहस्रिणो रथासस्तेभिरा गहि ।
नियुत्वान्त्सोमपीतये ॥ १ ॥

नियुत्वान्वायवा गह्ययं शुक्रो अयामि ते ।
गन्तासि सुन्वतो गृहम् ॥ २ ॥

शुक्रस्याद्य गवाशिर इन्द्रवायू नियुत्वतः ।
आ यातं पिबतं नरा ॥ ३ ॥

अयं वां मित्रावरुणा सुतः सोम ऋतावृधा ।
ममेदिह श्रुतं हवम् ॥ ४ ॥

राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे ।
सहस्रस्थूण आसाते ॥ ५ ॥ ७ ॥

वायो इति । ये । ते । सहस्रिणः । रथासः । तेभिः । आ । गहि । नियुत्वान् । सोमऽपीतये ॥ १ ॥ नियुत्वान् । वायो इति । आ । गहि । अयं । शुक्रः । अयामि । ते । गंता । असि । सुन्वतः । गृहं ॥ २ ॥ शुक्रस्य । अद्य । गोऽआशिरः । इंद्रवायू इति । नियुत्वंतः । आ । यातं । पिबतं । नरा ॥ ३ ॥ अयं । वां । मित्रावरुणा । सुतः । सोमः । ऋतऽवृधा । मम । इत् । इह । श्रुतं । हवं ॥ ४ ॥ राजानौ । अनभिऽद्रुहा । ध्रुवे । सदसि । उत्ऽतमे । सहस्रऽस्थूणे । आसाते इति ॥ ५ ॥ ७ ॥

ता सम्राजा घृतासुती आदित्या दानुनस्पती ।
सचेते अनवद्वरं ॥ ६ ॥

गोमद्वू षु नासत्याश्वावद्यातमश्विना ।
वर्ती रुद्रा नृपाय्यम् ॥ ७ ॥

न यत्परो नान्तर आदधर्षद्वृषण्वसू ।
दुःशंसो मर्त्यो रिपुः ॥ ८ ॥

ता न आ वोळ्हमश्विना रयिं पिशङ्गसन्दृशम् ।
धिष्ण्या वरिवोविदम् ॥ ९ ॥

इन्द्रो अङ्ग महद्भयमभी षदप चुच्यवत् ।
स हि स्थिरो विचर्षणिः ॥ १० ॥ ८ ॥

ता । संऽराजा । घृताऽसुती इति घृतऽआसुती । आदित्याः । दानुनः । पती इति । सचेते इति । अनवऽद्वरं ॥ ६ ॥ गोऽमत् । ऊं इति । सु । नासत्या । अश्वंऽवत् । यातं । अश्विना । वर्तिः । रुद्रा । नृऽपाय्यं ॥ ७ ॥ न । यत् । परः । न । अंतरः । आऽदधर्षत् । वृषण्वसू इति वृषण्ऽवसू । दुःऽशंसः । मर्त्यः । रिपुः ॥ ८ ॥ ता । नः । आ । वोळ्हं । अश्विना । रयिं । पिशंगंऽसंदृशं । धिष्ण्या । वरिवःऽविदं ॥ ९ ॥ इंद्रः । अंग । महत् । भयं । अभि । सत् । अप । चुच्यवत् । सः । हि । स्थिरः । विऽचर्षणिः ॥ १० ॥ ८ ॥

इन्द्रश्च मृळयाति नो न नः पश्चादघं नशत् ।
भद्रं भवाति नः पुरः ॥ ११ ॥
इन्द्र आशाभ्यस्परि सर्वाभ्यो अभयं करत् ।
जेता शत्रून्विचर्षणिः ॥ १२ ॥
विश्वे देवास आ गत शृणुता म इमं हवम् ।
एदं बर्हिर्नि षीदत ॥ १३ ॥
तीव्रो वो मधुमाँ अयं शुनहोत्रेषु मत्सरः ।
एतं पिबत काम्यम् ॥ १४ ॥
इन्द्रज्येष्ठा मरुद्गणा देवासः पूषरातयः ।
विश्वे मम श्रुता हवम् ॥ १५ ॥ ९ ॥
अम्बितमे नदीतमे देवितमे सरस्वति ।
अप्रशस्ता इव स्मसि प्रशस्तिमम्ब नस्कृधि ॥ १६ ॥

इंद्रः । च । मृळयाति । नः । न । नः । पश्चात् । अघं । नशत् । भद्रं । भवाति । नः । पुरः । ॥ ११ ॥ इंद्रः । आशाभ्यः । परि । सर्वाभ्यः । अभयं । करत् । जेता । शत्रून् । विऽचर्षणिः ॥ १२ ॥ विश्वे । देवासः । आ । गत । शृणुत । मे । इमं । हवं । आ । इदं । बर्हिः । नि । सीदत ॥ १३ ॥ तीव्रः । वः । मधुऽमान् । अयं । शुनऽहोत्रेषु । मत्सरः । एतं । पिबत । काम्यं ॥ १४ ॥ इंद्रऽज्येष्ठाः । मरुत्ऽगणाः । देवासः । पूषऽरातयः । विश्वे । मम । श्रुत । हवं ॥ १५ ॥ ९ ॥ अंबितमे । नदीऽतमे । देविऽतमे । सरस्वति । अप्रशस्ताःऽइव । स्मसि । प्रऽशस्तिं । अंब । नः । कृधि ॥ १६ ॥

त्वे विश्वा सरस्वति श्रितायूँषि देव्याम् ।
शुनहोत्रेषु मत्स्व प्रजां देवि दिदिड्ढि नः ॥ १७ ॥

इमा ब्रह्म सरस्वति जुषस्व वाजिनीवति ।
या ते मन्म गृत्समदा ऋतावरि प्रिया देवेषु जुह्वति ॥ १८ ॥

प्रेतां यज्ञस्य शम्भुवा युवामिदा वृणीमहे ।
अग्निं च हव्यवाहनम् ॥ १९ ॥

द्यावा नः पृथिवी इमं सिध्रमद्य दिविस्पृशम् ।
यज्ञं देवेषु यच्छताम् ॥ २० ॥

आ वामुपस्थमदुहा देवाः सीदन्तु यज्ञियाः ।
इहाद्य सोमपीतये ॥ २१ ॥ १० ॥

त्वे इति । विश्वा । सरस्वति । श्रिया । आयूँषि । देव्या । शुनऽहोत्रेषु । मत्स्व । प्रऽजा । देवि । दिदिड्ढि । नः ॥ १७ ॥ इमा । ब्रह्म । सरस्वति । जुषस्व । वाजिनीऽवति । या । ते । मन्म । गृत्सऽमदाः । ऋतऽवरि । प्रिया । देवेषु । जुह्वति ॥ १८ ॥ प्र । इतां । यज्ञस्य । शंऽभुवा । युवां । इत् । आ । वृणीमहे । अग्निं । च । हव्यऽवाहनं ॥ १९ ॥ द्यावा । नः । पृथिवी इति । इमं । सिध्रं । अद्य । दिविऽस्पृशं । यज्ञं । देवेषु । यच्छतां ॥ २० ॥ आ । वां । उपऽस्थं । अदुहा । देवाः । सीदंतु । यज्ञियाः । इह । अद्य । सोमऽपीतये ॥ २१ ॥ १० ॥

॥ ४२ ॥ ऋषिः-गृत्समदः । देवता-इन्द्रः । छन्दः-त्रिष्टुप् ॥

॥ ४२ ॥ कनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावम् ।
सुमङ्गलश्च शकुने भवासि मा त्वा का चिदभिभा विश्व्या विदत् ॥ १ ॥
मा त्वा श्येन उद्वधीन्मा सुपर्णो मा त्वा विददिषुमान्वीरो अस्ता ।
पित्र्यामनु प्रदिशं कनिक्रदत्सुमङ्गलो भद्रवादी वदेह ॥ २ ॥
अव क्रन्द दक्षिणतो गृहाणां सुमङ्गलो भद्रवादी शकुन्ते ।
मा नः स्तेन ईशत माघशंसो बृहद्वदेम विदथे सुवीराः ॥ ३ ॥ ११ ॥

कनिक्रदत् । जनुषं । प्रऽब्रुवाणः । इयर्ति । वाचं । अरिताऽइव । नावं ।
सुऽमंगलः । च । शकुने । भवासि । मा । त्वा । का । चित् । अभिऽभा । विश्व्या ।
विदत् ॥ १ ॥ मा । त्वा । श्येनः । उत् । वधीत् । मा । सुऽपर्णः । मा । त्वा ।
विदत् । इषुऽमान् । वीरः । अस्ता । पित्र्यां । अनु । प्रऽदिशं । कनिक्रदत् ।
सुऽमंगलः । भद्रऽवादी । वद । इह ॥ २ ॥ अव । क्रंद । दक्षिणतः । गृहाणां ।
सुऽमंगलः । भद्रऽवादी । शकुंते । मा । नः । स्तेनः । ईशत । मा । अघऽशंसः ।
बृहत् । वदेम । विदथे । सुऽवीराः ॥ ३ ॥ ११ ॥

॥ ४३ ॥ ऋषिः-गृत्समदः । देवता-इन्द्रः । छन्दः-जगती ॥

॥४३॥ प्रदक्षिणिदभि गृणन्ति कारवो वयो वदन्त ऋतुथा शकुन्तयः ।
उभे वाचौ वदति सामगा इव गायत्रं च त्रैष्टुभं चानु राजति ॥ १ ॥
उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि ।
वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा वद
विश्वतो नः शकुने पुण्यमा वद ॥ २ ॥
आवदंस्त्वं शकुने भद्रमा वद तूष्णीमासीनः सुमतिं चिकिद्धि नः ।
यदुत्पतन्वदसि कर्करिर्यथा बृहद्वदेम विदथे सुवीराः ॥ ३ ॥ १२ ॥ ४ ॥ २ ॥

प्रऽदक्षिणित् । अभि । गृणंति । कारवः । वयः । वदंतः । ऋतुऽथा । शकुंतयः । उभे इति । वाचौ । वदति । सामगाःऽइव । गायत्रं । च । त्रैष्टुभं । च । अनु । राजति ॥ १ ॥ उद्गाताऽइव । शकुने । साम । गायसि । ब्रह्मऽपुत्रःऽइव । सवनेषु । शंससि । वृषाऽइव । वाजी । शिशुऽमतीः । अपिऽइत्यै । सर्वतः । नः । शकुने । भद्रं । आ । वद । विश्वतः । नः । शकुने । पुण्यं । आ । वद ॥ २ ॥ आऽवदन् । त्वं । शकुने । भद्रं । आ । वद । तूष्णीं । आसीनः । सुऽमतिं । चिकिद्धि । नः । यत् । उत्ऽपतन् । वदसि । कर्करिः । यथा । बृहत् । वदेम । विदथे । सुऽवीराः ॥ ३ ॥ १२ ॥ ४ ॥ २ ॥

॥ इति चतुर्थोऽनुवाकः । द्वितीयं मंडलं समाप्तं ॥

॥ अथ तृतीयं मण्डलम् ॥

॥ प्रथमोऽनुवाकः ॥

॥ १ ॥ ऋषिः-विश्वामित्रः । देवता-अग्निः । छन्दः-त्रिष्टुप् ॥

॥ १ ॥ सोमस्य मा तवसं वक्ष्यग्ने वह्निं चकर्थ विदथे यजध्यै ।
देवाँ अच्छा दीध्यद्युञ्जे अद्रिं शमाये अग्ने तन्वं जुषस्व ॥ १ ॥
प्राञ्चं यज्ञं चकृम वर्धतां गीः समिद्भिरग्निं नमसा दुवस्यन् ।
दिवः शशासुर्विदथा कवीनां गृत्साय चित्तवसे गातुमीषुः ॥ २ ॥
मयो दधे मेधिरः पूतदक्षो दिवः सुबन्धुर्जनुषा पृथिव्याः ।
अविन्दन्नु दर्शतमप्स्वन्तर्देवासो अग्निमपसि स्वसॄणाम् ॥ ३ ॥

सोमस्य । मा । तवसं । वक्षि । अग्ने । वह्निं । चकर्थ । विदथे । यजध्यै ।
देवान् । अच्छ । दीध्यत् । युंजे । अद्रिं । शंऽआये । अग्ने । तन्वं । जुषस्व ॥ १ ॥
प्राचं । यज्ञं । चकृम । वर्धतां । गीः । समित्ऽभिः । अग्निं । नमसा । दुवस्यन् ।
दिवः । शशासुः । विदथा । कवीना । गृत्साय । चित् । तवसे । गातुं । ईषुः ॥ २ ॥
मयः । दधे । मेधिरः । पूतऽदक्षः । दिवः । सुऽबंधुः । जनुषा । पृथिव्याः ।
अविंदन् । ऊं इति । दर्शतं । अप्ऽसु । अंतः । देवासः । अग्निं । अपसि ।
स्वसॄणां ॥ ३ ॥

अवर्धयन्त्सुभगं सप्त यह्वीः श्वेतं जज्ञानमरुषं महित्वा ।
शिशुं न जातमभ्यारुरश्वा देवासो अग्निं जनिमन्वपुष्यन् ॥ ४ ॥
शुक्रेभिरङ्गै रजं आततन्वान् क्रतुं पुनानः कविभिः पवित्रैः ।
शोचिर्वसानः पर्यायुरपां श्रियो मिमीते बृहतीरनूनाः ॥ ५ ॥ १३ ॥
वव्राजा सीमनदतीरदब्धा दिवो यह्वीरवसाना अनग्नाः ।
सना अत्र युवतयः सयोनीरेकं गर्भं दधिरे सप्त वाणीः ॥ ६ ॥
स्तीर्णा अस्य संहतो विश्वरूपा घृतस्य योनौ स्रवथे मधूनाम् ।
अस्थुरत्र धेनवः पिन्वमाना मही दस्मस्य मातरा समीची ॥ ७ ॥
बभ्राणः सूनो सहसो व्यद्यौदधानः शुक्रा रभसा वपूंषि ।
श्रोतन्ति धारा मधुनो घृतस्य वृषा यत्र वावृधे काव्येन ॥ ८ ॥

अवर्धयन् । सुऽभगं । सप्त । यह्वीः । श्वेतं । जज्ञानं । अरुषं । महिऽत्वा । शिशुं । न । जातं । अभि । आरुः । अश्वाः । देवासः । अग्निं । जनिमन् । वपुष्यन् ॥ ४ ॥ शुक्रेभिः । अंगैः । रजः । आऽततन्वान् । क्रतुं । पुनानः । कविऽभिः । पवित्रैः । शोचिः । वसानः । परि । आयुः । अपा । श्रियः । मिमीते । बृहतीः । अनूनाः ॥ ५ ॥ १३ ॥ वव्राजं । सीं । अनदतीः । अदब्धाः । दिवः । यह्वीः । अवसानाः । अनग्नाः । सनाः । अत्र । युवतयः । सऽयोनीः । एकं । गर्भं । दधिरे । सप्त । वाणीः ॥ ६ ॥ स्तीर्णाः । अस्य । संऽहतः । विश्वऽरूपाः । घृतस्य । योनौ । स्रवथे । मधूनां । अस्थुः । अत्र । धेनवः । पिन्वमानाः । मही इति । दस्मस्य । मातरा । समीची इति सऽमीची ॥ ७ ॥ बभ्राणः । सूनो इति । सहसः । वि । अद्यौत् । दधानः । शुक्रा । रभसा । वपूंषि । श्रोतंति । धाराः । मधुनः । घृतस्य । वृषा । यत्र । ववृधे । काव्येन ॥ ८ ॥

पितुश्चिदूधर्जनुषा विवेद व्यस्य धारा असृजद्वि धेनाः ।
गुहा चरन्तं सखिभिः शिवेभिर्दिवो यह्वीभिर्न गुहा बभूव ॥ ९ ॥
पितुश्च गर्भं जनितुश्च बभ्रे पूर्वीरेकौ अधयत्पीप्यानाः ।
वृष्णे सपत्नी शुचये सबन्धू उभे अस्मै मनुष्येनि पाहि ॥ १० ॥ १४ ॥
उरौ महाँ अनिबाधे ववर्धापो अग्निं यशसः सं हि पूर्वीः ।
ऋतस्य योनावशयद्दमूना जामीनामग्निरपसि स्वसॄणाम् ॥ ११ ॥
अक्रो न बभ्रिः समिथे महीनां दिदृक्षेयः सूनवे भाऋजीकः ।
उदुस्रिया जनिता यो जजानापां गर्भो नृतमो यह्वो अग्निः ॥ १२ ॥
अपां गर्भं दर्शतमोषधीनां वना जजान सुभगा विरूपम् ।
देवासश्चिन्मनसा सं हि जग्मुः पनिष्टं जातं तवसं दुवस्यन् ॥ १३ ॥

पितुः । चित् । ऊधः । जनुषा । विवेद । वि । अस्य । धाराः । असृजत् । वि । धेनाः । गुहा । चरंतं । सखिऽभिः । शिवेभिः । दिवः । यह्वीभिः । न । गुहा । बभूव ॥ ९ ॥ पितुः । च । गर्भं । जनितुः । च । बभ्रे । पूर्वीः । एकः । अधयत् । पीप्यानाः । वृष्णे । सपत्नी इति सऽपत्नी । शुचये । सबंधू इति सऽबंधू । उभे इति । अस्मै । मनुष्ये३ इति । नि । पाहि ॥ १० ॥ १४ ॥ उरौ । महान् । अनिऽबाधे । ववर्ध । आपः । अग्निं । यशसः । सं । हि । पूर्वीः । ऋतस्य । योनौ । अशयत् । दमूनाः । जामीना । अग्निः । अपसि । स्वसॄणा ॥ ११ ॥ अक्रः । न । बभ्रिः । संऽइथे । महीनां । दिदृक्षेयः । सूनवे । भाःऽऋजीकः । उत् । उस्रियाः । जनिता । यः । जजान । अपां । गर्भः । नृऽतमः । यह्वः । अग्निः ॥ १२ ॥ अपां । गर्भं । दर्शतं । ओषधीनां । वना । जजान । सुऽभगा । विऽरूपं । देवासः । चित् । मनसा । सं । हि । जग्मुः । पनिष्टं । जातं । तवसं । दुवस्यन् ॥ १३ ॥

बृहन्त इद्भानवो भाऋंजीकमग्निं संचन्त विद्युतो न शुक्राः ।
गुहेव वृद्धं सदसि स्वे अन्तरपार ऊर्वे अमृतं दुहानाः ॥ १४ ॥
ईळे च त्वा यजमानो हविर्भिरीळे सख्यत्वं सुमतिं निकामः ।
देवैरवो मिमीहि सं जरित्रे रक्षा च नो दम्येभिरनीकैः ॥ १५ ॥ १५ ॥
उपक्षेतारस्तव सुप्रणीतेऽग्ने विश्वानि धन्या दधानाः ।
सुरेतसा श्रवसा तुञ्जमाना अभि ष्याम पृतनायूँरदेवान् ॥ १६ ॥
आ देवानामभवः केतुरग्ने मन्द्रो विश्वानि काव्यानि विद्वान् ।
प्रति मर्तां अवासयो दमूना अनु देवान्रथिरो यासि साधन् ॥ १७ ॥

बृहंतः । इत् । भानवः । भाःऽऋंजीकं । अग्निं । सचंत । विऽद्युतः । न । शुक्राः ।
गुहाऽइव । वृद्धं । सदंसि । स्वे । अंतः । अपारे । ऊर्वे । अमृतं । दुहानाः ॥ १४ ॥
ईळे । च । त्वा । यजमानः । हविःऽभिः । ईळे । सखिऽत्वं । सुऽमतिं । निऽकामः ।
देवैः । अवः । मिमीहि । सं । जरित्रे । रक्ष । च । नः । दम्येभिः । अनीकैः ॥ १५ ॥ १५ ॥
उपऽक्षेतारः । तव । सुऽप्रनीते । अग्ने । विश्वानि । धन्या । दधानाः । सुऽरेतसा ।
श्रवसा । तुंजमानाः । अभि । स्याम । पृतनाऽयून । अदेवान् ॥ १६ ॥ आ ।
देवानां । अभवः । केतुः । अग्ने । मंद्रः । विश्वानि । काव्यानि । विद्वान् । प्रति ।
मर्तान् । अवासयः । दमूनाः । अनु । देवान् । रथिरः । यासि । साधन् ॥ १७ ॥

नि दुरोणे अमृतो मर्त्यानां राजा ससाद विदथानि साधन् ।
घृतप्रतीक उर्विया व्यद्यौदग्निर्विश्वानि काव्यानि विद्वान् ॥ १८ ॥
आ नो गहि सख्येभिः शिवेभिर्महान्महीभिरूतिभिः सरण्यन् ।
अस्मे रयिं बहुलं सन्तरुत्रं सुवाचं भागं यशसं कृधी नः ॥ १९ ॥
एता ते अग्ने जनिमा सनानि प्र पूर्व्याय नूतनानि वोचं ।
महान्ति वृष्णे सवना कृतेमा जन्मञ्जन्मन् निहितो जातवेदाः ॥ २० ॥
जन्मञ्जन्मन् निहितो जातवेदा विश्वामित्रेभिरिध्यते अजस्रः ।
तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ॥ २१ ॥

नि । दुरोणे । अमृतः । मर्त्यानां । राजा । ससाद । विदथानि । साधन् ।
घृतऽप्रतीकः । उर्विया । वि । अद्यौत् । अग्निः । विश्वानि । काव्यानि । विद्वान् ॥१८॥
आ । नः । गहि । सख्येभिः । शिवेभिः । महान् । महीभिः । ऊतिऽभिः । सरण्यन् ।
अस्मे इति । रयिं । बहुलं । सन्ऽतरुत्रं । सुऽवाचं । भागं । यशसं । कृधि । नः ॥१९॥
एता । ते । अग्ने । जनिम । सनानि । प्र । पूर्व्याय । नूतनानि । वोचं । महांति ।
वृष्णे । सवना । कृता । इमा । जन्मन्ऽजन्मन् । निऽहितः । जातऽवेदाः ॥ २० ॥
जन्मन्ऽजन्मन् । निऽहितः । जातऽवेदाः । विश्वामित्रेभिः । इध्यते । अजस्रः । तस्य ।
वयं । सुऽमतौ । यज्ञियस्य । अपि । भद्रे । सौमनसे । स्याम ॥ २१ ॥

इमं यज्ञं सहसावन् त्वं नो देवत्रा धेहि सुक्रतो ररांणः ।
प्र यंसि होतर्बृहतीरिषो नोऽग्ने महि द्रविणसा यजस्व ॥ २२ ॥
इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ २३ ॥ १६ ॥

॥ २ ॥ ऋषिः-विश्वामित्रः । देवता-अग्निः । छन्दः-जगती ॥

॥ २ ॥ वैश्वानरायं धिषणामृताबृधे घृतं न पूतमग्नयें जनामसि ।
द्विता होतारं मनुषश्च वावृतो धिया रथं न कुलिशः सम्पृक्ति ॥ १ ॥
स रोचयज्जनुषा रोदसी उभे स मात्रोरभवत्पुत्र ईड्यः ।
हव्यवाळग्निरजरश्चनोहितो दूळभो विशामतिथिर्विभावसुः ॥ २ ॥

इमं । यज्ञं । सहसाऽवन् । त्वं । नः । देवत्रा । धेहि । सुक्रतो इति सुऽक्रतो । ररांणः । प्र । यंसि । होतः । बृहतीः । इषः । नः । अग्ने । महि । द्रविणं । आ । यजस्व ॥ २२ ॥ इळां । अग्ने । पुरुऽदंसं । सनिं । गोः । शश्वत्ऽतमं । हवमानाय । साध । स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥ २२ ॥ १६ ॥

वैश्वानरायं । धिषणां । ऋतऽबृधे । घृतं । न । पूतं । अग्नयें । जनामसि । द्विता । होतारं । मनुषः । च । वावृतः । धिया । रथं । न । कुलिशः । सं । ऋण्वति ॥ १ ॥ सः । रोचयत् । जनुषा । रोदसी इति । उभे इति । सः । मात्रोः । अभवत् । पुत्रः । ईड्यः । हव्यऽवाट् । अग्निः । अजरः । चनःऽहितः । दुःऽदभः । विशा । अतिथिः । विभाऽवसुः ॥ २ ॥

क्रत्वा दक्षस्य तरुषो विधर्मणि देवासो अग्निं जनयन्त चित्तिभिः ।
रुरुचानं भानुना ज्योतिषा महामत्यं न वाजं सनिष्यदुप ब्रुवे ॥ ३ ॥
आ मन्द्रस्य सनिष्यन्तो वरेण्यं वृणीमहे अह्रयं वाजमृग्मियम् ।
रातिं भृगूणामुशिजं कविक्रतुमग्निं राजन्तं दिव्येन शोचिषा ॥ ४ ॥
अग्निं सुम्नाय दधिरे पुरो जना वाजश्रवसमिह वृक्तबर्हिषः ।
यतस्रुचः सुरुचं विश्वदेव्यं रुद्रं यज्ञानां साधदिष्टिमपसाम् ॥ ५ ॥ १७ ॥
पावकशोचे तव हि क्षयं परि होतर्यज्ञेषु वृक्तबर्हिषो नरः ।
अग्ने दुवं इच्छमानास आप्यमुपासते द्रविणं धेहि तेभ्यः ॥ ६ ॥

क्रत्वा । दक्षस्य । तरुषः । विऽधर्मणि । देवासः । अग्निं । जनयन्त । चित्तिऽभिः ।
रुरुचानं । भानुना । ज्योतिषा । महां । अत्यं । न । वाजं । सनिष्यन् । उप ।
ब्रुवे ॥ ३ ॥ आ । मंद्रस्य । सनिष्यंतः । वरेण्यं । वृणीमहे । अह्रयं । वाजं ।
ऋग्मियं । रातिं । भृगूणां । उशिजं । कविऽक्रतुं । अग्निं । राजंतं । दिव्येन ।
शोचिषा ॥ ४ ॥ अग्निं । सुम्नाय । दधिरे । पुरः । जनाः । वाजऽश्रवसं । इह ।
वृक्तऽबर्हिषः । यतऽस्रुचः । सुऽरुचं । विश्वऽदेव्यं । रुद्रं । यज्ञानां । साधंऽदिष्टिं ।
अपसां ॥ ५ ॥ १७ ॥ पावकऽशोचे । तव । हि । क्षयं । परि । होतः । यज्ञेषु ।
वृक्तऽबर्हिषः । नरः । अग्ने । दुवः । इच्छमानासः । आप्यं । उप । आसते । द्रविणं ।
धेहि । तेभ्यः ॥ ६ ॥

आ रोदसी अपृणदा स्वर्महज्जातं यदेनमपसो अधारयन् ।
सो अध्वराय परि णीयते कविरत्यो न वाजसातये चनोहितः ॥ ७ ॥
नमस्यत हव्यदातिं स्वध्वरं दुवस्यत दम्यं जातवेदसम् ।
रथीऋतस्य बृहतो विचर्षणिरग्निर्देवानामभवत्पुरोहितः ॥ ८ ॥
तिस्रो यह्वस्य समिधः परिज्मनोऽग्नेरपुनन्नुशिजो अमर्त्यवः ।
तासामेकामदधुर्मर्त्ये भुजमु लोकमु द्वे उप जामिमीयतुः ॥ ९ ॥
विशां कविं विश्पतिं मानुषीरिषः सं सीमकृण्वन्त्स्वधितिं न तेजसे ।
स उद्वतो निवतो याति वेविषत्स गर्भमेषु भुवनेषु दीधरत् ॥ १० ॥ १८ ॥
स जिन्वते जठरेषु प्रजज्ञिवान्वृषा चित्रेषु नानदन्न सिंहः ।
वैश्वानरः पृथुपाजा अमर्त्यो वसु रत्ना दयमानो वि दाशुषे ॥ ११ ॥

आ । रोदसी इति । अपृणत् । आ । स्वः । महत् । जातं । यत् । एनं । अपसः । अधारयन् । सः । अध्वराय । परि । नीयते । कविः । अत्यः । न । वाजऽसातये । चनःऽहितः ॥ ७ ॥ नमस्यत । हव्यऽदातिं । सुऽअध्वरं । दुवस्यत । दम्यं । जातऽवेदसं । रथीः । ऋतस्य । बृहतः । विऽचर्षणिः । अग्निः । देवानां । अभवत् । पुरःऽहितः ॥ ८ ॥ तिस्रः । यह्वस्य । संऽइधः । परिऽज्मनः । अग्नेः । अपुनन् । उशिजः । अमृत्यवः । तासां । एकां । अदधुः । मर्त्ये । भुजं । ऊं इति । लोकं । ऊं इति । द्वे इति । उप । जामिं । ईयतुः ॥ ९ ॥ विशा । कविं । विश्पतिं । मानुषीः । इषः । सं । सीं । अकृण्वन् । स्वऽधितिं । न । तेजसे । सः । उत्ऽवतः । निऽवतः । याति । वेविषत् । सः । गर्भं । एषु । भुवनेषु । दीधरत् ॥ १० ॥ १८ ॥ सः । जिन्वते । जठरेषु । प्रऽजज्ञिवान् । वृषा । चित्रेषु । नानदत् । न । सिंहः । वैश्वानरः । पृथुऽपाजाः । अमर्त्यः । वसु । रत्ना । दयमानः । वि । दाशुषे ॥ ११ ॥

वैश्वानरः प्रत्नथा नाकमारुहद्दिवस्पृष्ठं भन्दमानः सुमन्मभिः ।
स पूर्ववज्जनयञ्जन्तवे धनं समानमज्मं पर्येति जागृविः ॥ १२ ॥
ऋतावानं यज्ञियं विप्रमुक्थ्यमा यं दधे मातरिश्वा दिवि क्षयम् ।
तं चित्रयामं हरिकेशमीमहे सुदीतिमग्निं सुविताय नव्यसे ॥ १३ ॥
शुचिं न यामन्निषिरं स्वर्दृशं केतुं दिवो रोचनस्थामुषर्बुधम् ।
अग्निं मूर्धानं दिवो अप्रतिष्कुतं तमीमहे नमसा वाजिनं बृहत् ॥ १४ ॥
मन्द्रं होतारं शुचिमद्वयाविनं दमूनससमुक्थ्यं विश्वचर्षणिम् ।
रथं न चित्रं वपुषाय दर्शतं मनुर्हितं सदमिद्राय ईमहे ॥ १५ ॥ १९ ॥

वैश्वानरः । प्रत्नऽथा । नाकं । आ । अरुहत् । दिवः । पृष्ठं । भंदमानः । सुमन्मंऽभिः ।
सः । पूर्वऽवत् । जनयन् । जंतवे । धनं । समानं । अज्मं । परिं । एति ।
जागृविः ॥ १२ ॥ ऋतऽवांनं । यज्ञियं । विप्रं । उक्थ्यं । आ । यं । दधे ।
मातरिश्वा । दिवि । क्षयं । तं । चित्रऽयामं । हरिंऽकेशं । ईमहे । सुऽदीतिं । अग्निं ।
सुविताय । नव्यसे ॥ १३ ॥ शुचिं । न । यामन् । इषिरं । स्वःऽदृशं । केतुं । दिवः ।
रोचनऽस्थां । उषःऽबुधं । अग्निं । मूर्धानं । दिवः । अप्रतिऽस्कुतं । तं । ईमहे ।
नमसा । वाजिनं । बृहत् ॥ १४ ॥ मंद्रं । होतारं । शुचिं । अद्वयाविनं । दमूनसं ।
उक्थ्यं । विश्वऽचर्षणिं । रथं । न । चित्रं । वपुषाय । दर्शतं । मनुःऽहितं । सदं ।
इत् । रायः । ईमहे ॥ १५ ॥ १९ ॥

॥ ३ ॥ ऋषिः—विश्वामित्रः । देवता—अग्निः । छन्दः—जगती ॥

॥ ३ ॥ वैश्वानरायं पृथुपाजसे विपो रत्ना विधन्त धरुणेषु गातवे ।
अग्निर्हि देवाँ अमृतो दुवस्यत्यथा धर्माणि सनता न दूदुषत् ॥ १ ॥
अन्तर्दूतो रोदसी दस्म ईयते होता निषत्तो मनुषः पुरोहितः ।
क्षयं बृहन्तं परि भूषति द्युभिर्देवेभिरग्निरिषितो धियावसुः ॥ २ ॥
केतुं यज्ञानां विदथस्य साधनं विप्रासो अग्निं महयन्त चित्तिभिः ।
अपांसि यस्मिन्नधि सन्दधुर्गिरस्तस्मिन्त्सुम्नानि यजमान आ चके ॥ ३ ॥
पिता यज्ञानामसुरो विपश्चितां विमानमग्निर्वयुनं च वाघतां ।
आ विवेश रोदसी भूरिवर्पसा पुरुप्रियो भन्दते धामभिः कविः ॥ ४ ॥
चन्द्रमग्निं चन्द्ररथं हरिव्रतं वैश्वानरमप्सुषदं स्वर्विदम् ।
विगाहं तूर्णिं तविषीभिरावृतं भूर्णिं देवासं इह सुश्रियं दधुः ॥ ५ ॥ २० ॥

वैश्वानरायं । पृथुऽपाजसे । विपः । रत्ना । विधंत । धरुणेषु । गातवे । अग्निः । हि । देवान् । अमृतः । दुवस्यति । अथ । धर्माणि । सनता । न । दूदुषत् ॥ १ ॥ अंतः । दूतः । रोदसी इति । दस्मः । ईयते । होता । निऽसत्तः । मनुषः । पुरःऽहितः । क्षयं । बृहंतं । परि । भूषति । द्युऽभिः । देवेभिः । अग्निः । इषितः । धियाऽवसुः ॥ २ ॥ केतुं । यज्ञानां । विदथस्य । साधनं । विप्रासः । अग्निं । महयंत । चित्तिऽभिः । अपांसि । यस्मिन् । अधि । संऽदधुः । गिरः । तस्मिन् । सुम्नानि । यजमानः । आ । चके ॥ ३ ॥ पिता । यज्ञानां । असुरः । विपःऽचितां । विऽमानं । अग्निः । वयुनं । च । वाघतां । आ । विवेश । रोदसी इति । भूरिऽवर्पसा । पुरुऽप्रियः । भंदते । धामऽभिः । कविः ॥ ४ ॥ चंद्रं । अग्निं । चंद्रऽरथं । हरिऽव्रतं । वैश्वानरं । अप्सुऽसदं । स्वःऽविदं । विऽगाहं । तूर्णिं । तविषीभिः । आऽवृतं । भूर्णिं । देवासः । इह । सुऽश्रियं । दधुः ॥ ५ ॥ २० ॥

अग्निर्देवेभिर्मनुषश्च जन्तुभिस्तन्वानो यज्ञं पुरुपेशसं धिया ।
रथीरन्तरीयते साधदिष्टिभिर्जीरो दमूना अभिशस्तिचातनः ॥ ६ ॥
अग्ने जरस्व स्वपत्य आयुन्यूर्जा पिन्वस्व समिषो दिदीहि नः ।
वयांसि जिन्व बृहतश्च जागृव उशिग्देवानामसि सुक्रतुर्विपाम् ॥ ७ ॥
विश्पतिं यह्वमतिथिं नरः सदा यन्तारं धीनामुशिजं च वावृताम् ।
अध्वराणां चेतनं जातवेदसं प्र शंसन्ति नमसा जूतिभिर्वृधे ॥ ८ ॥
विभावा देवः सुरणः परि क्षितीरग्निर्बभूव शवसा सुमद्रथः ।
तस्य व्रतानि भूरिपोषिणो वयमुप भूषेम दम आ सुवृक्तिभिः ॥ ९ ॥
वैश्वानर तव धामान्या चके येभिः स्वर्विदभवो विचक्षण ।
जात आपृणो भुवनानि रोदसी अग्ने ता विश्वा परिभूरसि त्मना ॥ १० ॥

अग्निः । देवेभिः । मनुषः । च । जंतुऽभिः । तन्वानः । यज्ञं । पुरुऽपेशसं । धिया ।
रथीः । अंतः । ईयते । साधदिष्टिऽभिः । जीरः । दमूनाः । अभिशस्तिऽचातनः ॥६॥
अग्ने । जरस्व । सुऽअपत्ये । आयुनि । ऊर्जा । पिन्वस्व । सं । इषः । दिदीहि ।
नः । वयांसि । जिन्व । बृहतः । च । जागृवे । उशिक् । देवानां । असि । सुऽक्रतुः ।
विपां ॥ ७ ॥ विश्पतिं । यह्वं । अतिथिं । नरः । सदा । यंतारं । धीना । उशिजं ।
च । वावृतां । अध्वराणां । चेतनं । जातऽवेदसं । प्र । शंसंति । नमसा । जूतिऽभिः ।
वृधे ॥ ८ ॥ विभाऽवा । देवः । सुऽरणः । परि । क्षितीः । अग्निः । बभूव । शवसा ।
सुमत्ऽरथः । तस्य । व्रतानि । भूरिऽपोषिणः । वयं । उप । भूषेम । दमे । आ ।
सुवृक्तिऽभिः ॥ ९ ॥ वैश्वानर । तव । धामानि । आ । चके । येभिः । स्वःऽवित् ।
अभवः । विऽवक्षण । जातः । आ । अपृणः । भुवनानि । रोदसी इति । अग्ने । ता ।
विश्वा । परिऽभूः । असि । त्मना ॥ १० ॥

वैश्वानरस्य दंसनाभ्यो बृहदरिणादेकः स्वपस्यया कविः ।
उभा पितरा महयन्नजायताग्निर्द्यावापृथिवी भूरिरेतसा ॥ ११ ॥ २१ ॥

॥ ४ ॥ ऋषिः-विश्वामित्रः । देवता-आग्नियः । छन्दः-त्रिष्टुप् ॥

॥ ४ ॥ समित्समित्सुमना बोध्यस्मे शुचाशुचा सुमतिं रासि वस्वः ।
आ देव देवान्यजथाय वक्षि सखा सखीन्त्सुमना यक्ष्यग्ने ॥ १ ॥
यं देवासस्त्रिरहन्नायजन्ते दिवेदिवे वरुणो मित्रो अग्निः ।
सेमं यज्ञं मधुमन्तं कृधी नस्तनूनपाद्घृतयोनिं विधन्तम् ॥ २ ॥
प्र दीधितिर्विश्ववारा जिगाति होतारमिळः प्रथमं यजध्यै ।
अच्छा नमोभिर्वृषभं वन्दध्यै स देवान्यक्षदिषितो यजीयान् ॥ ३ ॥
ऊर्ध्वो वां गातुरध्वरे अकार्यूर्ध्वा शोचींषि प्रस्थिता रजांसि ।
दिवो वा नाभा न्यसादि होता स्तृणीमहि देवव्यचा वि बर्हिः ॥ ४ ॥

वैश्वानरस्य । दंसनाभ्यः । बृहत् । अरिणात् । एकः । सुऽअपस्यया । कविः । उभा । पितरा । महयन् । अजायत । अग्निः । द्यावापृथिवी इति । भूरिऽरेतसा ॥ ११॥२१ ॥

समित्ऽसमित् । सुऽमनाः । बोधि । अस्मे इति । शुचाऽशुचा । सुऽमतिं । रासि । वस्वः । आ । देव । देवान् । यजथाय । वक्षि । सखा । सखीन् । सुऽमनाः । यक्षि । अग्ने ॥ १ ॥ यं । देवासः । त्रिः । अहन् । आऽयजन्ते । दिवेऽदिवे । वरुणः । मित्रः । अग्निः । सः । इमं । यज्ञं । मधुऽमंतं । कृधि । नः । तनूऽनपात् । घृतऽयोनिं । विधंतं ॥ २ ॥ प्र । दीधितिः । विश्वऽवारा । जिगाति । होतारं । इळः । प्रथमं । यजध्यै । अच्छ । नमःऽभिः । वृषभं । वंदध्यै । सः । देवान् । यक्षत् । इषितः । यजीयान् ॥ ३ ॥ ऊर्ध्वः । वां । गातुः । अध्वरे । अकारि । ऊर्ध्वा । शोचींषि । प्रऽस्थिता । रजांसि । दिवः । वा । नाभा । नि । असादि । होता । स्तृणीमहि । देवऽव्यचाः । वि । बर्हिः ॥ ४ ॥

सप्त होत्राणि मनसा वृणाना इन्वंतो विश्वं प्रति यन्नृतेन ।
नृपेशंसो विदथेषु प्र जाता अभीमं यज्ञं वि चरन्त पूर्वीः ॥ ५ ॥ २२ ॥
आ भन्दमाने उषसा उपाके उत स्मयेते तन्वा३विरूपे ।
यथा नो मित्रो वरुणो जुजोषदिन्द्रो मरुत्वाँ उत वा महोभिः ॥ ६ ॥
दैव्या होतारा प्रथमा न्यृञ्जे सप्त पृक्षासः स्वधया मदन्ति ।
ऋतं शंसन्त ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः ॥ ७ ॥
आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः ।
सरस्वती सारस्वतेभिरर्वाक् तिस्रो देवीर्बर्हिरेदं सदन्तु ॥ ८ ॥
तन्नस्तुरीपमध पोषयित्नु देवं त्वष्टारं रराणः स्यस्व ।
यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥ ९ ॥

सप्त । होत्राणि । मनसा । वृणानाः । इन्वंतः । विश्वं । प्रति । यन् । ऋतेन । नृऽपेशंसः । विदथेषु । प्र । जाताः । अभि । इमं । यज्ञं । वि । चरंत । पूर्वीः ॥ ५ ॥ ॥ २२ ॥ आ । भंदमाने इति । उषसौ । उपाके इति । उत । स्मयेते इति । तन्वा । विरूपे इति विऽरूपे । यथा । नः । मित्रः । वरुणः । जुजोषत् । इंद्रः । मरुत्वान् । उत । वा । महःऽभिः ॥ ६ ॥ दैव्या । होतारा । प्रथमा । नि । ऋंजे । सप्त । पृक्षासः । स्वधया । मदंति । ऋतं । शंसंतः । ऋतं । इत् । ते । आहुः । अनु । व्रतं । व्रतऽपाः । दीध्यानाः ॥ ७ ॥ आ । भारती । भारतीभिः । सऽजोषाः । इळा । देवैः । मनुष्येभिः । अग्निः । सरस्वती । सारस्वेतेभिः । अर्वाक् । तिस्रः । देवीः । बर्हिः । आ । इदं । सदंतु ॥ ८ ॥ तत् । नः । तुरीपं । अध । पोषयित्नु । देवं । त्वष्टः । वि । रराणः । स्यस्वेति स्यस्व । यतः । वीरः । कर्मण्यः । सुऽदक्षः । युक्तऽग्रावा । जायते । देवऽकामः ॥ ९ ॥

वनस्पतेऽव सृजोप देवानग्निर्हविः शमिता सूदयाति ।
सेदु होता सत्यतरो यजाति यथा देवानां जनिमानि वेद ॥ १० ॥
आ याह्यग्ने समिधानो अर्वाङिन्द्रेण देवैः सरथं तुरेभिः ।
बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयन्ताम् ॥११॥२३॥

॥ ५ ॥ ऋषिः-विश्वामित्रः । देवता-अग्निः । छन्दः-त्रिष्टुप् ॥

॥ ५ ॥ प्रत्यग्निरुषसश्चेकितानोऽबोधि विप्रः पदवीः कवीनाम् ।
पृथुपाजा देवयद्भिः समिद्धोऽप द्वारा तमसो वह्निरावः ॥ १ ॥
प्रेद्धग्निर्वावृधे स्तोमेभिर्गीर्भिः स्तोतॄणां नमस्य उक्थैः ।
पूर्वीरृतस्य सन्दृशश्चकानः सं दूतो अद्यौदुषसो विरोके ॥ २ ॥
अधायग्निर्मानुषीषु विक्ष्वृपां गर्भो मित्र ऋतेन साधन् ।
आ हर्यतो यजतः सान्वस्थादभूदु विप्रो हव्यो मतीनाम् ॥ ३ ॥

वनस्पते । अव । सृज । उप । देवान् । अग्निः । हविः । शमिता । सूदयाति । सः । इत् । ऊं इति । होता । सत्यऽतरः । यजाति । यथा । देवानां । जनिमानि । वेद ॥१०॥ आ । याहि । अग्ने । संऽइधानः । अर्वाङ् । इंद्रेण । देवैः । सुऽरथं । तुरेभिः । बर्हिः । नः । आस्ताम् । अदितिः । सुऽपुत्रा । स्वाहा । देवाः । अमृताः । मादयंतां ॥ ११ ॥ २३ ॥

प्रति । अग्निः । उषसः । चेकितानः । अबोधि । विप्रः । पदऽवीः । कवीनां । पृथुऽपाजाः । देवयत्ऽभिः । संऽइद्धः । अप । द्वारा । तमसः । वह्निः । आवरित्यावः ॥ १ ॥ प्र । इत् । ऊं इति । अग्निः । वावृधे । स्तोमेभिः । गीःऽभिः । स्तोतॄणां । नमस्यः । उक्थैः । पूर्वीः । ऋतस्य । संऽदृशः । चकानः । सं । दूतः । अद्यौत् । उषसः । विऽरोके ॥ २ ॥ अधायि । अग्निः । मानुषीषु । विक्षु । अपां । गर्भः । मित्रः । ऋतेन । साधन् । आ । हर्यतः । यजतः । सानु । अस्थात् । अभूत् । ऊं इति । विप्रः । हव्यः । मतीनां ॥ ३ ॥

मित्रो अग्निर्भवति यत्समिद्धो मित्रो होता वरुणो जातवेदाः ।
मित्रो अध्वर्युरिषिरो दमूना मित्रः सिन्धूनामुत पर्वतानाम् ॥ ४ ॥
पाति प्रियं रिपो अग्रं पदं वेः पाति यह्वश्चरणं सूर्यस्य ।
पाति नाभा ससप्तशीर्षाणमग्निः पाति देवानामुपमादमृष्वः ॥ ५ ॥ २४ ॥
ऋभुश्चक्र ईड्यं चारु नाम विश्वानि देवो वयुनानि विद्वान् ।
ससस्य चर्म घृतवत्पदं वेस्तदिद्ग्नी रक्षत्यप्रयुच्छन् ॥ ६ ॥
आ योनिमग्निर्घृतवन्तमस्थात्पृथुप्रगाणमुशन्तमुशानः ।
दीद्यानः शुचिर्ऋष्वः पावकः पुनः पुनर्मातरा नव्यसी कः ॥ ७ ॥
सद्यो जात ओषधीभिर्ववक्षे यदी वर्धन्ति प्रस्वो घृतेन ।
आपं इव प्रवता शुम्भमाना उरुष्यदग्निः पित्रोरुपस्थे ॥ ८ ॥

मित्रः । अग्निः । भवति । यत् । संऽइद्धः । मित्रः । होता । वरुणः । जातऽवेदाः ।
मित्रः । अध्वर्युः । इषिरः । दमूनाः । मित्रः । सिंधूनां । उत । पर्वतानां ॥ ४ ॥
पाति । प्रियं । रिपः । अग्रं । पदं । वेः । पाति । यह्वः । चरणं । सूर्यस्य । पाति ।
नाभा । सप्तऽशीर्षाणं । अग्निः । पाति । देवानां । उपऽमादं । ऋष्वः ॥ ५ ॥ २४ ॥
ऋभुः । चक्रे । ईड्यं । चारु । नाम । विश्वानि । देवः । वयुनानि । विद्वान् । ससस्य ।
चर्म । घृतऽवत् । पदं । वेः । तत् । इत् । अग्निः । रक्षति । अप्रऽयुच्छन् ॥ ६ ॥
आ । योनिं । अग्निः । घृतऽवंतं । अस्थात् । पृथुऽप्रगानं । उशंतं । उशानः ।
दीद्यानः । शुचिः । ऋष्वः । पावकः । पुनःऽपुनः । मातरा । नव्यसी इति ।
करिति कः ॥ ७ ॥ सद्यः । जातः । ओषधीभिः । ववक्षे । यदी । वर्धंति । प्रऽस्वः ।
घृतेन । आपःऽइव । प्रऽवता । शुंभमानाः । उरुष्यत् । अग्निः । पित्रोः । उपऽस्थे ॥ ८ ॥

उदु॑ ष्टुतः स॒मिधा॑ य॒ह्वो अ॑श्रैद्घृ॒ष्वीं॑दि॒वो अधि॒ नाभा॑ पृथि॒व्याः ।
मि॒त्रो अ॒ग्निरीड्यो॑ मातरि॒श्वा दू॒तो व॑क्षद्यजथा॑य दे॒वान् ॥ ९ ॥
उद॑स्तम्भीत्स॒मिधा॒ नाक॑मृ॒ष्वोऽग्निर्भ॑वद्वसु॒त्तमो रो॑च॒नाना॑म् ।
यदी॑ भृगु॒भ्यः परि॑ मातरि॒श्वा गु॒हा सन्तं॑ ह॒व्यवा॑हं स॒मीधे ॥ १० ॥
इळा॑मग्ने पुरुद॒ꣳसं स॒निं गोः श॑श्वत्त॒मं ह॑व॒मानाय॑ साध ।
स्यान्नः॑ सू॒नुस्तन॑यो वि॒जावाग्ने॒ सा ते॑ सुम॒तिर्भू॑त्वस्मे ॥ ११ ॥ २५ ॥

॥ ६ ॥ ऋषिः—विश्वामित्रः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥ ६ ॥ प्र कार॑वो मनना वच्यमा॑ना दे॒वद्रीचीं॑ नयत देवयन्तः॑ ।
दक्षि॑णावाड्वा॒जिनी॒ प्राच्ये॑ति ह॒विर्भर॑न्त्यग्नये॒ घृता॑चीं ॥ १ ॥
आ रोद॑सी अपृणा जाय॑मान उ॒त प्र रि॑क्था॒ अध॒ नु प्र॑यज्यो ।
दि॒वश्चि॑दग्ने महि॒ना पृ॑थि॒व्या व॒च्यन्ता॑ ते॒ वह्न॑यः स॒प्तजि॑ह्वाः ॥ २ ॥

उत् । ऊं॒ इति॑ । स्तुतः । स॒ंऽइधा॑ । यह्वः । अ॒श्रै॒त् । घ॒र्मन् । दि॒वः । अधि॑ । नाभा॑ । पृ॒थि॒व्याः । मि॒त्रः । अ॒ग्निः । ईड्यः॑ । मा॒त॒रि॒श्वा । आ । दू॒तः । व॒क्ष॒त् । य॒ज॒थाय॑ । दे॒वान् ॥ ९ ॥ उत् । अ॒स्त॒भी॒त् । स॒ंऽइधा॑ । नाक॑म् । ऋ॒ष्वः । अ॒ग्निः । भ॒व॒त् । उ॒शत्ऽत॑मः । रो॒च॒नाना॑म् । यदि॑ । भृ॒गु॒ऽभ्यः॑ । परि॑ । मा॒त॒रि॒श्वा॑ । गु॒हा । सन्त॑म् । ह॒व्य॒ऽवाह॑म् । स॒ंऽईधे॑ ॥ १० ॥ इळा॑म् । अ॒ग्ने॒ । पु॒रु॒ऽद॒ꣳसस॑म् । स॒नि॑म् । गोः । श॒श्व॒त्ऽत॒मम् । ह॒व॒मानाय॑ । साध॑ । स्यात् । नः॒ । सू॒नुः । त॒नय॑ः । वि॒जाऽवा॑ । अग्ने॑ । सा । ते॒ । सु॒ऽम॒तिः । भू॒तु॒ । अ॒स्मे इति॑ ॥ ११ ॥ २५ ॥

प्र । कार॑वः । मनना । वच्यमा॑नाः । दे॒वद्रीची॑म् । नयत । देवऽयं॑तः । दक्षि॑णाऽवाट् । वा॒जिनी॑ । प्राची॑म् । एति॑ । ह॒विः । भर॑न्ती । अ॒ग्नये॑ । घृता॑चीम् ॥ १ ॥ आ । रोद॑सी॒ इति॑ । अ॒पृ॒णाः॒ । जाय॑मानः । उ॒त । प्र । रि॒क्थाः॒ । अध॑ । नु । प्र॒य॒ज्यो॒ इति॑ प्रऽयज्यो । दि॒वः । चि॒त् । अ॒ग्ने॒ । म॒हि॒ना । पृ॒थि॒व्याः । व॒च्यंता॑म् । ते॒ । वह्न॑यः । स॒प्तऽजि॑ह्वाः ॥ २ ॥

द्यौश्च त्वा पृथिवी यज्ञियासो नि होतारं सादयन्ते दमाय ।
यदी विशो मानुषीर्देवयन्तीः प्रयस्वतीरीळते शुक्रमर्चिः ॥ ३ ॥
महान्त्सधस्थे ध्रुव आ निषत्तोऽन्तर्द्यावा माहिने हर्यमाणः ।
आस्क्रे सपत्नी अजरे अमृक्ते सबर्दुघे उरुगायस्य धेनू ॥ ४ ॥
व्रता ते अग्ने महतो महानि तव क्रत्वा रोदसी आ ततन्थ ।
त्वं दूतो अभवो जायमानस्त्वं नेता वृषभ चर्षणीनाम् ॥ ५ ॥ २६ ॥
ऋतस्य वा केशिना योग्याभिर्घृतस्नुवा रोहिता धुरि धिष्व ।
अथा वह देवान्देव विश्वान्त्स्वध्वरा कृणुहि जातवेदः ॥ ६ ॥
दिवश्चिदा ते रुचयन्त रोका उषो विभातीरनु भासि पूर्वीः ।
अपो यदग्न उशधग्वनेषु होतर्मन्द्रस्य पनयन्त देवाः ॥ ७ ॥

द्यौः । च । त्वा । पृथिवी । यज्ञियासः । नि । होतारं । सादयंते । दमाय । यदि । विशः । मानुषीः । देवऽयंतीः । प्रयस्वतीः । ईळते । शुक्रं । अर्चिः ॥ ३ ॥ महान् । सधऽस्थे । ध्रुवः । आ । निऽसत्तः । अंतः । द्यावा । माहिने इति । हर्यमाणः । आस्क्रे इति । सपत्नी इति सऽपत्नी । अजरे इति । अमृक्ते इति । सबर्दुघे इति सबःऽदुघे । उरुऽगायस्य । धेनू इति ॥ ४ ॥ व्रता । ते । अग्ने । महतः । महानि । तव । क्रत्वा । रोदसी इति । आ । ततंथ । त्वं । दूतः । अभवः । जायमानः । त्वं । नेता । वृषभ । चर्षणीनां ॥ ५ ॥ २६ ॥ ऋतस्य । वा । केशिना । योग्याभिः । घृतऽस्नुवा । रोहिता । धुरि । धिष्व । अथ । आ । वह । देवान् । देव । विश्वान् । सुऽअध्वरा । कृणुहि । जातऽवेदः ॥ ६ ॥ दिवः । चित् । आ । ते । रुचयंत । रोकाः । उषः । विऽभातीः । अनु । भासि । पूर्वीः । अपः । यत् । अग्ने । उशधक् । वनेषु । होतुः । मंद्रस्य । पनयंत । देवाः ॥ ७ ॥

उरौ वा ये अन्तरिक्षे मदन्ति दिवो वा ये रोचने सन्ति देवाः ।
ऊमा वा ये सुहवासो यजत्रा आयेमिरे रथ्यो अग्ने अश्वाः ॥ ८ ॥
एभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः ।
पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमा वह मादयस्व ॥ ९ ॥
स होता यस्य रोदसी चिदुर्वी यज्ञंयज्ञमभि वृधे गृणीतः ।
प्राची अध्वरेव तस्थतुः सुमेके ऋतावरी ऋतजातस्य सत्ये ॥ १० ॥
इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ११ ॥ २७ ॥ ८ ॥ २ ॥

उरौ । वा । ये । अंतरिक्षे । मदंति । दिवः । वा । ये । रोचने । संति । देवाः । ऊमाः । वा । ये । सुऽहवासः । यजंत्राः । आऽयेमिरे । रथ्यः । अग्ने । अश्वाः ॥ ८ ॥ आ । एभिः । अग्ने । सऽरथं । याहि । अर्वाङ् । नानाऽरथं । वा । विऽभवः । हि । अश्वाः । पत्नीऽवतः । त्रिंशतं । त्रीन् । च । देवान् । अनुऽस्वधं । आ । वह । मादयस्व ॥ ९ ॥ सः । होता । यस्य । रोदसी इति । चित् । उर्वी इति । यज्ञंऽयज्ञं । अभि । वृधे । गृणीतः । प्राची इति । अध्वराऽइव । तस्थतुः । सुमेके इति सुऽमेके । ऋतवरी इत्यृतऽवरी । ऋतऽजातस्य । सत्ये इति ॥ १० ॥ इळां । अग्ने । पुरुऽदंसं । सनिं । गोः । शश्वत्ऽतमं । हवमानाय । साध । स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥ ११ ॥ २७ ॥ ८ ॥ २ ॥

॥ इति द्वितीयाष्टकेऽष्टमोऽध्यायः ॥ ८ ॥

तृतीयोऽष्टकः [प्रथमोऽध्यायः]

॥ ऋग्वेदः ॥

तृतीयं मण्डलम् [प्रथमोऽनुवाकः]

॥ ७ ॥ ऋषिः-विश्वामित्रः । देवता-अग्निः । छन्दः-त्रिष्टुप् ॥

॥ हरिः ॐ ॥

॥ ७ ॥ प्र य आरुः शितिपृष्ठस्य धासेरा मातरा विविशुः सप्त वाणीः ।
परिक्षिता पितरा सं चरेते प्र सस्राते दीर्घमायुः प्रयक्षे ॥ १ ॥
दिवक्षसो धेनवो वृष्णो अश्वा देवीरा तस्थौ मधुमद्वहन्तीः ।
ऋतस्य त्वा सदसि क्षेमयन्तं पर्येका चरति वर्तनिं गौः ॥ २ ॥
आ सीमरोहत्सुयमा भवन्तीः पतिश्चिकित्वान्रयिविद्रयीणाम् ।
प्र नीलपृष्ठो अतसस्य धासेस्ता अवासयत्पुरुधप्रतीकः ॥ ३ ॥

प्र । ये । आरुः । शितिऽपृष्ठस्य । धासेः । आ । मातरा । विविशुः । सप्त । वाणीः । परिऽक्षिता । पितरा । सं । चरेते इति । प्र । सस्राते इति । दीर्घ । आयुः । प्रऽयक्षे ॥ १ ॥ दिवक्षसः । धेनवः । वृष्णः । अश्वाः । देवीः । आ । तस्थौ । मधुऽमत् । वहंतीः । ऋतस्य । त्वा । सदसि । क्षेमऽयंतं । परि । एका । चरति । वर्तनिं । गौः ॥ २ ॥ आ । सीं । अरोहत् । सुऽयमाः । भवंतीः । पतिः । चिकित्वान् । रयिऽवित् । रयीणां । प्र । नीलऽपृष्ठः । अतसस्य । धासेः । ताः । अवासयत् । पुरुधऽप्रतीकः ॥ ३ ॥

महि त्वाष्ट्रमूर्जयन्तीरजुर्यं स्तभूयमानं वहतो वहन्ति ।
व्यङ्गेभिर्दिद्युतानः सधस्थ एकोमिव रोदसी आ विवेश ॥ ४ ॥
जानन्ति वृष्णो अरुषस्य शेवमुत ब्रध्नस्य शासने रणन्ति ।
दिवोरुचः सुरुचो रोचमाना इळा येषां गण्या माहिना गीः ॥ ५ ॥ १ ॥
उतो पितृभ्यां प्रविदानु घोषं महो महद्भ्यामनयन्त शूषम् ।
उक्षा ह यत्र परि धानमक्तोरनु स्वं धाम जरितुर्ववक्ष ॥ ६ ॥
अध्वर्युभिः पञ्चभिः सप्त विप्राः प्रियं रक्षन्ते निहितं पदं वेः ।
प्राञ्चो मदन्त्युक्षणो अजुर्या देवा देवानामनु हि व्रता गुः ॥ ७ ॥

महि । त्वाष्ट्रं । ऊर्जयंतीः । अजुर्यं । स्तभूयमानं । वहतः । वहंति । वि । अंगेभिः । दिद्युतानः । सधऽस्थे । एकोऽइव । रोदसी इति । आ । विवेश ॥ ४ ॥ जानंति । वृष्णः । अरुषस्य । शेवं । उत । ब्रध्नस्य । शासने । रणंति । दिवःऽरुचः । सुऽरुचः । रोचमानाः । इळा । येषां । गण्या । माहिना । गीः ॥ ५ ॥ १ ॥ उतो इति । पितृऽभ्यां । प्रऽविदा । अनु । घोषं । महः । महत्ऽभ्यां । अनयंत । शूषं । उक्षा । ह । यत्र । परि । धानं । अक्तोः । अनु । स्वं । धाम । जरितुः । ववक्ष ॥ ६ ॥ अध्वर्युऽभिः । पंचऽभिः । सप्त । विप्राः । प्रियं । रक्षंते । निऽहितं । पदं । वेरिति वेः । प्राचः । मदंति । उक्षणः । अजुर्याः । देवाः । देवानां । अनु । हि । व्रता । गुरिति गुः ॥ ७ ॥

दैव्या होतारा प्रथमा न्यृञ्जे सप्त पृक्षासः स्वधया मदन्ति ।
ऋतं शंसन्त ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः ॥ ८ ॥
वृषायन्ते महे अत्याय पूर्वीर्वृष्णे चित्राय रश्मयः सुयामाः ।
देवं होतर्मन्द्रतररिक्वित्वान्महो देवान्रोदसी एह वक्षि ॥ ९ ॥
पृक्षप्रयजो द्रविणः सुवाचः सुकेतव उषसो रेवदूषुः ।
उतो चिदग्ने महिना पृथिव्याः कृतं चिदेनः सं महे दशस्य ॥ १० ॥
इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ११ ॥ २ ॥

दैव्या । होतारा । प्रथमा । नि । ऋंजे । सप्त । पृक्षासः । स्वधया । मदंति । ऋतं । शंसंतः । ऋतं । इत् । ते । आहुः । अनु । व्रतं । व्रतऽपाः । दीध्यानाः ॥ ८ ॥ वृषऽयंते । महे । अत्याय । पूर्वीः । वृष्णे । चित्राय । रश्मयः । सुऽयामाः । देव । होतः । मंद्रऽतरः । विकित्वान् । महः । देवान् । रोदसी इति । आ । इह । वक्षि ॥ ९ ॥ पृक्षऽप्रयजः । द्रविणः । सुऽवाचः । सुऽकेतवः । उषसः । रेवत् । ऊषुः । उतो इति । चित् । अग्ने । महिना । पृथिव्याः । कृतं । चित् । एनः । सं । महे । दशस्य ॥ १० ॥ इळां । अग्ने । पुरुऽदंसं । सनिं । गोः । शश्वत्ऽतमं । हवमानाय । साध । स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥ ११ ॥ २ ॥

॥ ८ ॥ ऋषिः-विश्वामित्रः । देवता-विश्वेदेवाः । छन्दः-त्रिष्टुप् ॥

॥ ८ ॥ अञ्जन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैव्येन ।
यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थे ॥ १ ॥
समिद्धस्य श्रयमाणः पुरस्ताद्ब्रह्म वन्वानो अजरं सुवीरम् ।
आरे अस्मदमतिं बाधमान उच्छ्रयस्व महते सौभगाय ॥ २ ॥
उच्छ्रयस्व वनस्पते वर्ष्मन्पृथिव्या अधि ।
सुमितीयमानो वर्चो धा यज्ञवाहसे ॥ ३ ॥
युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः ।
तं धीरासः कवय उन्नयन्ति स्वाध्योऽ३मनसा देवयन्तः ॥ ४ ॥

अञ्जंति । त्वां । अध्वरे । देवऽयंतः । वनस्पते । मधुना । दैव्येन । यत् । ऊर्ध्वः । तिष्ठाः । द्रविणा । इह । धत्तात् । यत् । वा । क्षयः । मातुः । अस्याः । उपऽस्थे ॥ १ ॥ संऽइद्धस्य । श्रयमाणः । पुरस्तात् । ब्रह्म । वन्वानः । अजरं । सुऽवीरं । आरे । अस्मत् । अमतिं । बाधमानः । उत् । श्रयस्व । महते । सौभगाय ॥ २ ॥ उत् । श्रयस्व । वनस्पते । वर्ष्मन् । पृथिव्याः । अधि । सुऽमितीयमानः । वर्चः । धाः । यज्ञऽवाहसे ॥ ३ ॥ युवा । सुऽवासाः । परिऽवीतः । आ । अगात् । सः । ऊं इति । श्रेयान् । भवति । जायमानः । तं । धीरासः । कवयः । उत् । नयंति । सुऽआध्यः । मनसा । देवऽयंतः ॥ ४ ॥

जातो जायते सुदिनत्वे अह्नां समर्य आ विदथे वर्धमानः ।
पुनन्ति धीरा अपसो मनीषा देवया विप्र उदियर्ति वाचम् ॥ ५ ॥ ३ ॥
यान्वो नरो देवयन्तो निमिम्युर्वनस्पते स्वधितिर्वा ततक्ष ।
ते देवासः स्वरवस्तस्थिवांसः प्रजावदस्मे दिधिषन्तु रत्नम् ॥ ६ ॥
ये वृक्णासो अधि क्षमि निमितासो यतस्रुचः ।
ते नो व्यन्तु वार्यं देवत्रा क्षेत्रसाधसः ॥ ७ ॥
आदित्या रुद्रा वसवः सुनीथा द्यावाक्षामा पृथिवी अन्तरिक्षम् ।
सजोषसो यज्ञमवन्तु देवा ऊर्ध्वं कृण्वन्त्वध्वरस्य केतुम् ॥ ८ ॥
हंसा इव श्रेणिशो यतानाः शुक्रा वसानाः स्वरवो न आगुः ।
उन्नीयमानाः कविभिः पुरस्ताद्देवा देवानामपि यन्ति पाथः ॥ ९ ॥

जातः । जायते । सुदिनऽत्वे । अह्नां । सऽमर्ये । आ । विदथे । वर्धमानः । पुनंति ।
धीराः । अपसः । मनीषा । देवऽयाः । विप्रः । उत् । इयर्ति । वाचं ॥ ५ ॥ ३ ॥
यान् । वः । नरः । देवऽयंतः । निऽमिम्युः । वनस्पते । स्वऽधितिः । वा । ततक्ष ।
ते । देवासः । स्वरवः । तस्थिऽवांसः । प्रजाऽवत् । अस्मे इति । दिधिषंतु ।
रत्नं ॥ ६ ॥ ये । वृक्णासः । अधि । क्षमि । निऽमितासः । यतऽस्रुचः । ते । नः ।
व्यंतु । वार्यं । देवऽत्रा । क्षेत्रऽसाधसः ॥ ७ ॥ आदित्याः । रुद्राः । वसवः ।
सुऽनीथाः । द्यावाक्षामा । पृथिवी । अंतरिक्षं । सऽजोषसः । यज्ञं । अवंतु । देवाः ।
ऊर्ध्वं । कृण्वंतु । अध्वरस्य । केतुं ॥ ८ ॥ हंसाःऽइव । श्रेणिऽशः । यतानाः ।
शुक्राः । वसानाः । स्वरवः । नः । आ । अगुः । उत्ऽनीयमानाः । कविऽभिः ।
पुरस्तात् । देवाः । देवानां । अपि । यंति । पाथः ॥ ९ ॥

शृङ्गाणीवेच्छृङ्गिणां सं ददृश्रे चषालवन्तः स्वरवः पृथिव्याम् ।
वाघद्भिर्वा विहवे श्रोषमाणा अस्माँ अवन्तु पृतनाज्येषु ॥ १० ॥
वनस्पते शतवल्शो वि रोह सहस्रवल्शा वि वयं रुहेम ।
यं त्वामयं स्वधितिस्तेजमानः प्रणिनाय महते सौभगाय ॥ ११ ॥ ४ ॥

॥ ९ ॥ ऋषिः—विश्वामित्रः । देवता—अग्निः । छन्दः—बृहती ॥

॥ ९ ॥ सखायस्त्वा ववृमहे देवं मर्तासं ऊतये ।
अपां नपातं सुभगं सुदीदितिं सुप्रतूर्तिमनेहसम् ॥ १ ॥
कायमानो वना त्वं यन्मातॄरजगन्नपः ।
न तत्ते अग्ने प्रमृषे निवर्तनं यदूरे सन्निहाभवः ॥ २ ॥

शृंगाणिऽइव । इत् । शृंगिणां । सं । ददृश्रे । चषालऽवंतः । स्वरवः । पृथिव्यां । वाघत्ऽभिः । वा । विऽहवे । श्रोषमाणाः । अस्मान् । अवंतु । पृतनाज्येषु ॥ १० ॥ वनस्पते । शतऽवल्शः । वि । रोह । सहस्रऽवल्शाः । वि । वयं । रुहेम । यं । त्वां । अयं । स्वऽधितिः । तेजमानः । प्रऽनिनाय । महते । सौभगाय ॥ ११ ॥ ४ ॥

सखायः । त्वा । ववृमहे । देवं । मर्तासः । ऊतये । अपा । नपातं । सुऽभगं । सुऽदीदितिं । सुऽप्रतूर्तिं । अनेहसं ॥ १ ॥ कायमानः । वना । त्वं । यत् । मातॄः । अजगन् । अपः । न । तत् । ते । अग्ने । प्रऽमृषे । निऽवर्तनं । यत् । दूरे । सन् । इह । अभवः ॥ २ ॥

अतिं तृष्टं ववक्षिथाथैव सुमना असि ।
प्रप्रान्ये यन्ति पर्यन्य आसते येषां सख्ये आसि श्रितः ॥ ३ ॥
ईयिवांसमति स्रिधः शश्वतीरति सश्चतः ।
अन्वींमविन्दन्निचिरासो अद्रुहोऽप्सु सिंहमिव श्रितम् ॥ ४ ॥
सस्रुवांसमिव त्मनाग्निमित्था तिरोहितम् ।
एनं नयन्मातरिश्वा परावतो देवेभ्यो मथितं परिं ॥ ५ ॥ ५ ॥
तं त्वा मतीं अगृभ्णत देवेभ्यो हव्यवाहन ।
विश्वान्यद्यज्ञाँ अभिपासि मानुष तव क्रत्वा यविष्ठ्य ॥ ६ ॥
तद्भद्रं तव दंसना पाकाय चिच्छदयति ।
त्वां यदग्ने पशवः समासते समिन्धमपिशर्वरे ॥ ७ ॥
आ जुहोता स्वध्वरं शीरं पावकशोचिषम् ।
आशुं दूतमजिरं प्रत्नमीड्यं श्रुष्टी देवं सपर्यत ॥ ८ ॥

अतिं । तृष्टं । ववक्षिथ । अथ । एव । सुऽमनाः । असि । प्रऽप्र । अन्ये । यंति । परिं । अन्ये । आसते । येषां । सख्ये । असि । श्रितः ॥ ३ ॥ ईयिऽवांसं । अतिं । स्रिधः । शश्वतीः । अतिं । सश्चतः । अनु । ईं । अविंदन् । निऽचिरासः । अद्रुहः । अप्ऽसु । सिंहंऽइव । श्रितं ॥ ४ ॥ सस्रुवांसंऽइव । त्मना । अग्निं । इत्था । तिरःऽहितं । आ । एनं । नयत् । मातरिश्वा । पराऽवतः । देवेभ्यः । मथितं । परिं ॥ ५ ॥ ५ ॥ तं । त्वा । मतीः । अगृभ्णत । देवेभ्यः । हव्यऽवाहन । विश्वान् । यत् । यज्ञान् । अभिऽपासि । मानुष । तव । क्रत्वा । यविष्ठ्य ॥ ६ ॥ तत् । भद्रं । तव । दंसना । पाकाय । चित् । छदयति । त्वां । यत् । अग्ने । पशवः । संऽआसते । संऽइद्धं । अपिऽशर्वरे ॥ ७ ॥ आ । जुहोत । सुऽअध्वरं । शीरं । पावकऽशोचिषं । आशुं । दूतं । अजिरं । प्रत्नं । ईड्यं । श्रुष्टी । देवं । सपर्यत ॥ ८ ॥

त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् ।
औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयन्त ॥ ९ ॥ ६ ॥

॥ १० ॥ ऋषिः-विश्वामित्रः । देवता-अग्निः । छन्दः-गायत्री ॥

॥ १० ॥ त्वामग्ने मनीषिणः सम्राजं चर्षणीनाम् ।
देवं मर्तास इन्धते समध्वरे ॥ १ ॥
त्वां यज्ञेष्वृत्विजमग्ने होतारमीळते ।
गोपा ऋतस्य दीदिहि स्वे दमे ॥ २ ॥
स घा यस्ते ददाशति समिधा जातवेदसे ।
सो अग्ने धत्ते सुवीर्यं स पुष्यति ॥ ३ ॥
स केतुरध्वराणामग्निर्देवेभिरा गमत् ।
अञ्जानः सप्त होतृभिर्हविष्मते ॥ ४ ॥

त्रीणि । शता । त्री । सहस्राणि । अग्निं । त्रिंशत् । च । देवाः । नव । च । असपर्यन् । औक्षन् । घृतैः । अस्तृणन् । बर्हिः । अस्मै । आत् । इत् । होतारं । नि । असादयंत ॥ ९ ॥ ६ ॥

त्वां । अग्ने । मनीषिणः । सम्ऽराजं । चर्षणीनां । देवं । मर्तासः । इंधते । सं । अध्वरे ॥ १ ॥ त्वां । यज्ञेषु । ऋत्विजं । अग्ने । होतारं । ईळते । गोपाः । ऋतस्य । दीदिहि । स्वे । दमे ॥ २ ॥ सः । घ । यः । ते । ददाशति । सम्ऽइधा । जातऽवेदसे । सः । अग्ने । धत्ते । सुऽवीर्यं । सः । पुष्यति ॥ ३ ॥ सः । केतुः । अध्वराणां । अग्निः । देवेभिः । आ । गमत् । अंजानः । सप्त । होतृऽभिः । हविष्मते ॥ ४ ॥

प्र होत्रे पूर्व्यं वचोऽग्नये भरता बृहत् ।
विपां ज्योतींषि बिभ्रते न वेधसे ॥ ५ ॥ ७ ॥

अग्निं वर्धन्तु नो गिरो यतो जायत उक्थ्यः ।
महे वाजाय द्रविणाय दर्शतः ॥ ६ ॥

अग्ने यजिष्ठो अध्वरे देवान्देवयते यज ।
होता मन्द्रो वि राजस्यति स्रिधः ॥ ७ ॥

स नः पावक दीदिहि द्युमदस्मे सुवीर्यम् ।
भवा स्तोतृभ्यो अन्तमः स्वस्तये ॥ ८ ॥

तं त्वा विप्रा विपन्यवो जागृवांसः समिन्धते ।
हव्यवाहममर्त्यं सहोवृधम् ॥ ९ ॥ ८ ॥

॥ ११ ॥ ऋषिः—विश्वामित्रः । देवता—अग्निः । छन्दः—गायत्री ॥

॥ ?? ॥ अग्निर्होता पुरोहितोऽध्वरस्य विचर्षणिः ।
स वेद यज्ञमानुषक् ॥ १ ॥

प्र । होत्रे । पूर्व्यं । वचः । अग्नये । भरत । बृहत् । विपा । ज्योतींषि । बिभ्रते । न । वेधसे ॥ ५ ॥ ७ ॥ अग्निं । वर्धंतु । नः । गिरः । यतः । जायते । उक्थ्यः । महे । वाजाय । द्रविणाय । दर्शतः ॥ ६ ॥ अग्ने । यजिष्ठः । अध्वरे । देवान् । देवऽयते । यज । होता । मंद्रः । वि । राजसि । अति । स्रिधः ॥ ७ ॥ सः । नः । पावक । दीदिहि । द्युऽमत् । अस्मे इति । सुऽवीर्यं । भव । स्तोतृऽभ्यः । अंतमः । स्वस्तये ॥ ८ ॥ तं । त्वा । विप्राः । विपन्यवः । जागृऽवांसः । सं । इंधते । हव्यऽवाहं । अमर्त्यं । सहःऽवृधं ॥ ९ ॥ ८ ॥

अग्निः । होता । पुरःऽहितः । अध्वरस्य । विऽचर्षणिः । सः । वेद । यज्ञं । आनुषक् ॥ १ ॥

स हव्यवाळमर्त्य उशिग्दूतश्चनोहितः ।
अग्निर्धिया समृण्वति ॥ २ ॥

अग्निर्धिया स चेतति केतुर्यज्ञस्य पूर्व्यः ।
अर्थं ह्यस्य तरणि ॥ ३ ॥

अग्निं सूनुं सनश्रुतं सहसो जातवेदसम् ।
वह्निं देवा अकृण्वत ॥ ४ ॥

अदाभ्यः पुरएता विशामग्निर्मानुषीणाम्
तूर्णी रथः सदा नवः ॥ ५ ॥ ९ ॥

सहान्विश्वा अभियुजः क्रतुर्देवानाममृक्तः ।
अग्निस्तुविश्रवस्तमः ॥ ६ ॥

अभि प्रयांसि वाहसा दाश्वाँ अश्नोति मर्त्यः ।
क्षयं पावकशोचिषः ॥ ७ ॥

परि विश्वानि सुधिताग्नेरश्याम मन्मभिः ।
विप्रासो जातवेदसः ॥ ८ ॥

सः । हव्यऽवाट् । अमर्त्यः । उशिक् । दूतः । चनःऽहितः । अग्निः । धिया । सं । ऋण्वति ॥ २ ॥ अग्निः । धिया । सः । चेतति । केतुः । यज्ञस्य । पूर्व्यः । अर्थं । हि । अस्य । तरणि ॥ ३ ॥ अग्निं । सूनुं । सनऽश्रुतं । सहसः । जातऽवेदसं । वह्निं । देवाः । अकृण्वत ॥ ४ ॥ अदाभ्यः । पुरःऽएता । विशा । अग्निः । मानुषीणा । तूर्णिः । रथः । सदा । नवः ॥ ५ ॥ ९ ॥ सहान् । विश्वाः । अभिऽयुजः । क्रतुः । देवानां । अमृक्तः । अग्निः । तुविश्रवःऽतमः ॥ ६ ॥ अभि । प्रयांसि । वाहसा । दाश्वान् । अश्नोति । मर्त्यः । क्षयं । पावकऽशोचिषः ॥ ७ ॥ परि । विश्वानि । सुऽधिता । अग्नेः । अश्याम । मन्मऽभिः । विप्रासः । जातऽवेदसः ॥ ८ ॥

अग्ने विश्वानि वार्या वाजेषु सनिषामहे ।
त्वे देवास एरिरे ॥ ९ ॥ १० ॥

॥ १२ ॥ ऋषिः-विश्वामित्रः । देवता-इन्द्राग्नी । छन्दः-गायत्री ॥

॥ १२ ॥ इन्द्राग्नी आ गतं सुतं गीर्भिर्नभो वरेण्यम् ।
अस्य पातं धियेषिता ॥ १ ॥

इन्द्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः ।
अया पातमिमं सुतम् ॥ २ ॥

इन्द्रमग्निं कविच्छदा यज्ञस्य जूत्या वृणे ।
ता सोमस्येह तृम्पताम् ॥ ३ ॥

तोशा वृत्रहणा हुवे सजित्वानापराजिता ।
इन्द्राग्नी वाजसातमा ॥ ४ ॥

प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः ।
इन्द्राग्नी इष आ वृणे ॥ ५ ॥ ११ ॥

अग्ने । विश्वानि । वार्या । वाजेषु । सनिषामहे । त्वे इति । देवासः । आ । ईरिरे ॥ ९ ॥ १० ॥

इंद्राग्नी इति । आ । गतं । सुतं । गीःऽभिः । नभः । वरेण्यं । अस्य । पातं । धिया । इषिता ॥ १ ॥ इंद्राग्नी इति । जरितुः । सचा । यज्ञः । जिगाति । चेतनः । अया । पातं । इमं । सुतं ॥ २ ॥ इंद्रं । अग्निं । कविऽछदा । यज्ञस्य । जूत्या । वृणे । ता । सोमस्य । इह । तृंपतां ॥ ३ ॥ तोशा । वृत्रऽहना । हुवे । सऽजित्वाना । अपराऽजिता । इंद्राग्नी इति । वाजऽसातमा ॥ ४ ॥ प्र । वा । अर्चंति । उक्थिनः । नीथऽविदः । जरितारः । इंद्राग्नी इति । इषः । आ । वृणे ॥ ५ ॥ ११ ॥

इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम् ।
साकमेकेन कर्मणा ॥ ६ ॥

इन्द्राग्नी अपसस्पर्युप प्र यन्ति धीतयः ।
ऋतस्य पथ्या३अनु ॥ ७ ॥

इन्द्राग्नी तविषाणि वां सधस्थानि प्रयांसि च ।
युवोरप्तूर्यं हितम् ॥ ८ ॥

इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः ।
तद्वां चेति प्र वीर्यम् ॥ ९ ॥ १२ ॥ १ ॥

॥ द्वितीयोऽनुवाकः ॥ २ ॥

॥ १३ ॥ ऋषिः—ऋषभः । देवता—अग्निः । छन्दः—अनुष्टुप् ॥

॥ १३ ॥ प्र वो देवायाग्नये बर्हिष्ठमर्चास्मै ।
गमद्देवेभिरा स नो यजिष्ठो बर्हिरा सदत् ॥ १ ॥

इन्द्राग्नी इति । नवतिं । पुरः । दासऽपत्नीः । अधूनुतं । साकं । एकेन । कर्मणा ॥ ६ ॥
इन्द्राग्नी इति । अपसः । परि । उप । प्र । यन्ति । धीतयः । ऋतस्य । पथ्याः । अनु ॥ ७ ॥ इन्द्राग्नी इति । तविषाणि । वा । सधऽस्थानि । प्रयांसि । च । युवोः । अप्ऽतूर्यं । हितं ॥ ८ ॥ इन्द्राग्नी इति । रोचना । दिवः । परि । वाजेषु । भूषथः । तत् । वा । चेति । प्र । वीर्यं ॥ ९ ॥ १२ ॥

प्र । वः । देवाय । अग्नये । बर्हिष्ठं । अर्च । अस्मै । गमत् । देवेभिः । आ । सः । नः । यजिष्ठः । बर्हिः । आ । सदत् ॥ १ ॥

ऋतावा यस्य रोदसी दक्षं सचन्त ऊतयः ।
हविष्मन्तस्तमीळते तं सनिष्यन्तोऽवसे ॥ २ ॥
स यन्ता विप्र एषां स यज्ञानामथा हि षः ।
अग्निं तं वो दुवस्यत दाता यो वनिता मघम् ॥ ३ ॥
स नः शर्माणि वीतयेऽग्निर्यच्छतु शन्तमा ।
यतो नः प्रुष्णवद्वसु दिवि क्षितिभ्यो अप्स्वा ॥ ४ ॥
दीदिवांसमपूर्व्यं वस्वीभिरस्य धीतिभिः ।
ऋकाणो अग्निमिन्धते होतारं विश्पतिं विशाम् ॥ ५ ॥
उत नो ब्रह्मन्नविष उक्थेषु देवहूतमः ।
शं नः शोचा मरुद्वृधोऽग्ने सहस्रसातमः ॥ ६ ॥
नू नो रास्व सहस्रवत्तोकवत्पुष्टिमद्वसु ।
द्युमदग्ने सुवीर्यं वर्षिष्ठमनुपक्षितम् ॥ ७ ॥ १३ ॥

ऋतऽवा । यस्य । रोदसी इति । दक्षं । सचन्ते । ऊतयः । हविष्मंतः । तं । ईळते । तं । सनिष्यंतः । अवसे ॥ २ ॥ सः । यंता । विप्रः । एषां । सः । यज्ञानां । अथ । हि । सः । अग्निं । तं । वः । दुवस्यत । दाता । यः । वनिता । मघं ॥ ३ ॥ सः । नः । शर्माणि । वीतये । अग्निः । यच्छतु । शंऽतमा । यतः । नः । प्रुष्णवत् । वसु । दिवि । क्षितिऽभ्यः । अप्ऽसु । आ ॥ ४ ॥ दीदिऽवांसं । अपूर्व्यं । वस्वीभिः । अस्य । धीतिऽभिः । ऋकाणः । अग्निं । इंधते । होतारं । विश्पतिं । विशां ॥ ५ ॥ उत । नः । ब्रह्मन् । अविषः । उक्थेषु । देवऽहूतमः । शं । नः । शोच । मरुत्ऽवृधः । अग्ने । सहस्रऽसातमः ॥ ६ ॥ नु । नः । रास्व । सहस्रऽवत् । तोकऽवत् । पुष्टिऽमत् । वसु । द्युऽमत् । अग्ने । सुऽवीर्यं । वर्षिष्ठं । अनुपऽक्षितं ॥ ७ ॥ १३ ॥

॥ १४ ॥ ऋषिः-ऋषभः । देवता-अग्निः । छन्दः-त्रिष्टुप् ॥

॥ १४ ॥ आ होता मन्द्रो विदथान्यस्थात्सत्यो यज्वा कवितमः स वेधाः ।
विद्युद्रथः सहसस्पुत्रो अग्निः शोचिष्केशः पृथिव्यां पाजो अश्रेत् ॥ १ ॥
अयामि ते नमउक्तिं जुषस्व ऋतावस्तुभ्यं चेतते सहस्वः ।
विद्वाँ आ वक्षि विदुषो नि षत्सि मध्य आ बर्हिरूतये यजत्र ॥ २ ॥
द्रवतां त उषसो वाजयन्ती अग्ने वातस्य पथ्याभिरच्छ ।
यत्सीमञ्जन्ति पूर्व्यं हविर्भिरा बन्धुरेव तस्थतुर्दुरोणे ॥ ३ ॥
मित्रश्च तुभ्यं वरुणः सहस्वोऽग्ने विश्वे मरुतः सुम्नमर्चन् ।
यच्छोचिषा सहसस्पुत्र तिष्ठा अभि क्षितीः प्रथयन्त्सूर्यो नॄन् ॥ ४ ॥

आ । होता । मंद्रः । विदथानि । अस्थात् । सत्यः । यज्वा । कविऽतमः । सः । वेधाः । विद्युत्ऽरथः । सहसः । पुत्रः । अग्निः । शोचिःऽकेशः । पृथिव्या । पाजः । अश्रेत् ॥ १ ॥ अयामि । ते । नमःऽउक्तिं । जुषस्व । ऋतऽवः । तुभ्यं । चेतते । सहस्वः । विद्वान् । आ । वक्षि । विदुषः । नि । सत्सि । मध्ये । आ । बर्हिः । ऊतये । यजत्र ॥ २ ॥ द्रवतां । ते । उषसः । वाजयंती इति । अग्ने । वातस्य । पथ्याभिः । अच्छ । यत् । सीं । अंजंति । पूर्व्यं । हविःऽभिः । आ । बंधुरांऽइव । तस्थतुः । दुरोणे ॥ ३ ॥ मित्रः । च । तुभ्यं । वरुणः । सहस्वः । अग्ने । विश्वे । मरुतः । सुम्नं । अर्चन् । यत् । शोचिषा । सहसः । पुत्र । तिष्ठाः । अभि । क्षितीः । प्रथयन् । सूर्यः । नॄन् ॥ ४ ॥

वयं ते अद्य ररिमा हि कामंमुत्तानहस्ता नमसोपसद्य ।
यजिष्ठेन मनसा यक्षि देवानस्रेधता मन्मना विप्रो अग्ने ॥ ५ ॥
त्वद्धि पुत्र सहसो वि पूर्वीर्देवस्य यन्त्यूतयो वि वाजाः ।
त्वं देहि सहस्रिणं रयिं नोऽद्रोघेण वचसा सत्यमग्ने ॥ ६ ॥
तुभ्यं दक्ष कविक्रतो यानीमा देव मर्तासो अध्वरे अकर्म ।
त्वं विश्वस्य सुरथस्य बोधि सर्वं तदग्ने अमृत स्वदेह ॥ ७ ॥ १४ ॥

॥ १५ ॥ ऋषिः—उत्कीलः । देवता—अग्निः । छन्दः—त्रिष्टुप् ॥

॥ १५ ॥ वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः ।
सुशर्मणो बृहतः शर्मणि स्यामग्नेरहं सुहवस्य प्रणीतौ ॥ १ ॥

वयं । ते । अद्य । ररिम । हि । कामं । उत्तानऽहस्ताः । नमसा । उपऽसद्य ।
यजिष्ठेन । मनसा । यक्षि । देवान् । अस्रेधता । मन्मना । विप्रः । अग्ने ॥ ५ ॥
त्वत् । हि । पुत्र । सहसः । वि । पूर्वीः । देवस्य । यंतिं । ऊतयः । वि । वाजाः ।
त्वं । देहि । सहस्रिणं । रयिं । नः । अद्रोघेण । वचसा । सत्यं । अग्ने ॥ ६ ॥
तुभ्यं । दक्ष । कविक्रतो इतिं कविऽक्रतो । यानिं । इमा । देव । मर्तासः । अध्वरे ।
अकर्म । त्वं । विश्वस्य । सुऽरथस्य । बोधि । सर्वं । तत् । अग्ने । अमृत । स्वद ।
इह ॥ ७ ॥ १४ ॥

वि । पाजसा । पृथुना । शोशुचानः । बाधस्व । द्विषः । रक्षसः । अमीवाः ।
सुऽशर्मणः । बृहतः । शर्मणि । स्यां । अग्नेः । अहं । सुऽहवस्य । प्रऽनीतौ ॥ १ ॥

त्वं नो अस्या उषसो व्युष्टौ त्वं सूर उदिते बोधि गोपाः ।
जन्मेव नित्यं तनयं जुषस्व स्तोमं मे अग्ने तन्वा सुजात ॥ २ ॥
त्वं नृचक्षा वृषभानु पूर्वीः कृष्णास्वग्ने अरुषो वि भाहि ।
वसो नेषि च पर्षि चात्यंहः कृधी नो राय उशिजो यविष्ठ ॥ ३ ॥
अषाळ्हो अग्ने वृषभो दिदीहि पुरो विश्वाः सौभगा सञ्जिगीवान् ।
यज्ञस्य नेता प्रथमस्य पायोर्जातवेदो बृहतः सुप्रणीते ॥ ४ ॥
अच्छिद्रा शर्म जरितः पुरूणि देवाँ अच्छा दीयानः सुमेधाः ।
रथो न सस्निरभि वक्षि वाजमग्ने त्वं रोदसी नः सुमेके ॥ ५ ॥

त्वं । नः । अस्याः । उषसः । विऽउष्टौ । त्वं । सूरे । उत्ऽइते । बोधि । गोपाः ।
जन्मऽइव । नित्यं । तनयं । जुषस्व । स्तोमं । मे । अग्ने । तन्वा । सुजात ॥ २ ॥
त्वं । नृऽचक्षाः । वृषभ । अनु । पूर्वीः । कृष्णासु । अग्ने । अरुषः । वि । भाहि ।
वसो इति । नेषि । च । पर्षि । च । अति । अंहः । कृधि । नः । राये । उशिजः ।
यविष्ठ ॥ ३ ॥ अषाळ्हः । अग्ने । वृषभः । दिदीहि । पुरः । विश्वाः । सौभगा ।
सम्ऽजिगीवान् । यज्ञस्य । नेता । प्रथमस्य । पायोः । जातऽवेदः । बृहतः । सुऽप्र-
णीते ॥ ४ ॥ अच्छिद्रा । शर्म । जरितरिति । पुरूणि । देवान् । अच्छ । दीयानः ।
सुऽमेधाः । रथः । न । सस्निः । अभि । वक्षि । वाजं । अग्ने । त्वं । रोदसी इति ।
नः । सुमेके इति सुऽमेके ॥ ५ ॥

प्र पीपय वृषभ जिन्व वाजानग्ने त्वं रोदसी नः सुदोघे ।
देवेभिर्देव सुरुचा रुचानो मा नो मर्तस्य दुर्मतिः परि ष्टात् ॥ ६ ॥
इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ७ ॥ १५ ॥

॥ १६ ॥ ऋषिः—उत्कीलः । देवता—अग्निः । छन्दः—बृहती ॥

॥ १६ ॥ अयमग्निः सुवीर्यस्येशे महः सौभगस्य ।
राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथानाम् ॥ १ ॥
इमं नरो मरुतः सश्चता वृधं यस्मिन्रायः शेवृधासः ।
अभि ये सन्ति पृतनासु दूढ्यो विश्वाहा शत्रुमादभुः ॥ २ ॥
स त्वं नो रायः शिशीहि मीढ्वो अग्ने सुवीर्यस्य ।
तुविद्युम्न वर्षिष्ठस्य प्रजावतोऽनमीवस्य शुष्मिणः ॥ ३ ॥

प्र । पीपय । वृषभ । जिन्व । वाजान् । अग्ने । त्वं । रोदसी इति । नः । सुदोघे इति सुऽदोघे । देवेभिः । देव । सुऽरुचा । रुचानः । मा । नः । मर्तस्य । दुःऽमतिः । परि । स्थात् ॥ ६ ॥ इळां । अग्ने । पुरुऽदंसं । सनिं । गोः । शश्वत्ऽतमं । हवमानाय । साध । स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥ ७ ॥ १५ ॥

अयं । अग्निः । सुऽवीर्यस्य । ईशे । महः । सौभगस्य । रायः । ईशे । सुऽअपत्यस्य । गोऽमतः । ईशे । वृत्रऽहथानां ॥ १ ॥ इमं । नरः । मरुतः । सश्चत । वृधं । यस्मिन् । रायः । शेऽवृधासः । अभि । ये । संति । पृतनासु । दुःऽध्यः । विश्वाहा । शत्रुं । आऽदभुः ॥ २ ॥ सः । त्वं । नः । रायः । शिशीहि । मीढ्वः । अग्ने । सुऽवीर्यस्य । तुविऽद्युम्न । वर्षिष्ठस्य । प्रजाऽवतः । अनमीवस्य । शुष्मिणः ॥ ३ ॥

चक्रिर्यो विश्वा भुवनाभि सासहिश्चक्रिर्देवेष्वा दुवः ।
आ देवेषु यतत आ सुवीर्य आ शंस उत नृणाम् ॥ ४ ॥
मा नो अग्नेऽमतये मावीरतायै रीरधः ।
मागोतायै सहसस्पुत्र मा निदेऽप द्वेषांस्या कृधि ॥ ५ ॥
शग्धि वाजस्य सुभग प्रजावतोऽग्ने बृहतो अध्वरे ।
सं राया भूयसा सृज मयोभुना तुविद्युम्न यशस्वता ॥ ६ ॥ १६ ॥

॥ १७ ॥ ऋषिः-कतः । देवता-अग्निः । छन्दः-त्रिष्टुप् ॥

॥ १७ ॥ समिध्यमानः प्रथमानु धर्मा समक्तुभिरज्यते विश्ववारः ।
शोचिष्केशो घृतनिर्णिक्पावकः सुयज्ञो अग्निर्यजथाय देवान् ॥ १ ॥
यथायजो होत्रमग्ने पृथिव्या यथा दिवो जातवेदश्चिकित्वान् ।
एवानेन हविषा यक्षि देवान्मनुष्वद्यज्ञं प्र तिरेममद्य ॥ २ ॥

चक्रिः । यः । विश्वा । भुवना । अभि । ससहिः । चक्रिः । देवेषु । आ । दुवः । आ । देवेषु । यतते । आ । सुऽवीर्ये । आ । शंसे । उत । नृणां ॥ ४ ॥ मा । नः । अग्ने । अमतये । मा । अवीरतायै । रीरधः । मा । अगोतायै । सहसः । पुत्र । मा । निदे । अप । द्वेषांसि । आ । कृधि ॥ ५ ॥ शग्धि । वाजस्य । सुऽभग । प्रजाऽवतः । अग्ने । बृहतः । अध्वरे । सं । राया । भूयसा । सृज । मयःऽभुना । तुविऽद्युम्न । यशस्वता ॥ ६ ॥ १६ ॥

संऽइध्यमानः । प्रथमा । अनु । धर्मा । सं । अक्तुऽभिः । अज्यते । विश्वऽवारः । शोचिःऽकेशः । घृतऽनिर्निक् । पावकः । सुऽयज्ञः । अग्निः । यजथाय । देवान् ॥ १ ॥ यथा । अयजः । होत्रं । अग्ने । पृथिव्याः । यथा । दिवः । जातऽवेदः । चिकित्वान् । एव । अनेन । हविषा । यक्षि । देवान् । मनुष्वत् । यज्ञं । प्र । तिर । इमं । अद्य ॥२॥

त्रीण्यायूँषि तवं जातवेदस्तिस्र आजानीरुषसस्ते अग्ने ।
ताभिर्देवानामवो यक्षि विद्वानथा भव यजमानाय शं योः ॥ ३ ॥
अग्निं सुदीतिं सुदृशं गृणन्तो नमस्यामस्त्वेड्यं जातवेदः ।
त्वां दूतमरतिं हव्यवाहं देवा अकृण्वन्नमृतस्य नाभिम् ॥ ४ ॥
यस्त्वद्धोता पूर्वो अग्ने यजीयान्द्विता च सत्ता स्वधया च शम्भुः ।
तस्यानु धर्म प्र यजा चिकित्वोऽथा नो धा अध्वरं देववीतौ ॥ ५ ॥ १७ ॥

॥ १८ ॥ ऋषिः-कतः । देवता-अग्निः । छन्दः-त्रिष्टुप् ॥

॥ १८ ॥ भवा नो अग्ने सुमना उपेतौ सखेव सख्ये पितरेव साधुः ।
पुरुद्रुहो हि क्षितयो जनानां प्रति प्रतीचीर्दहतादरातीः ॥ १ ॥
तपो ष्वग्ने अन्तराँ अमित्राँ तपा शंसमररुषः परस्य ।
तपो वसो चिकितानो अचित्तान्वि ते तिष्ठन्तामजरा अयासः ॥ २ ॥

त्रीणि । आयूँषि । तव । जातऽवेदः । तिस्रः । आऽजानीः । उषसः । ते । अग्ने ।
ताभिः । देवानां । अवः । यक्षि । विद्वान् । अथ । भव । यजमानाय । शं । योः ॥ ३ ॥
अग्निं । सुऽदीतिं । सुऽदृशं । गृणंतः । नमस्यामः । त्वा । ईड्यं । जातऽवेदः । त्वां ।
दूतं । अरतिं । हव्यऽवाहं । देवाः । अकृण्वन् । अमृतस्य । नाभिं ॥ ४ ॥ यः ।
त्वत् । होता । पूर्वः । अग्ने । यजीयान् । द्विता । च । सत्ता । स्वधया । च । शंऽभुः ।
तस्य । अनु । धर्म । प्र । यज । चिकित्वः । अथ । नः । धाः । अध्वरं ।
देवऽवीतौ ॥ ५ ॥ १७ ॥

भव । नः । अग्ने । सुऽमनाः । उपऽइतौ । सखाऽइव । सख्ये । पितराऽइव ।
साधुः । पुरुऽद्रुहः । हि । क्षितयः । जनानां । प्रति । प्रतीचीः । दहतात् ।
अरातीः ॥ १ ॥ तपो इति । सु । अग्ने । अंतरान् । अमित्रान् । तप । शंसं ।
अररुषः । परस्य । तपो इति । वसो इति । चिकितानः । अचित्तान् । वि । ते ।
तिष्ठंता । अजराः । अयासः ॥ २ ॥

इध्मेनाग्न इच्छमानो घृतेन जुहोमि हव्यं तरसे बलाय ।
यावदीशे ब्रह्मणा वन्दमान इमां धियं शतसेयाय देवीम् ॥ ३ ॥
उच्छोचिषा सहसस्पुत्र स्तुतो बृहद्वयः शशमानेषु धेहि ।
रेवदग्ने विश्वामित्रेषु शं योर्मर्मृज्मा ते तन्वं१भूरि कृत्वः ॥ ४ ॥
कृधि रत्नं सुसनितर्धनानां स वेदग्ने भवसि यत्समिद्धः ।
स्तोतुर्दुरोणे सुभगस्य रेवत्सूनृता करस्ना दधिषे वपूंषि ॥ ५ ॥ १८ ॥

॥ १९ ॥ ऋषिः—कुशिकपुत्रो गाथीः । देवता—अग्निः । छन्दः—त्रिष्टुप् ॥

॥ १९ ॥ अग्निं होतारं प्र वृणे मियेधे गृत्सं कविं विश्वविदममूरम् ।
स नो यक्षद्देवताता यजीयान्राये वाजाय वनते मघानि ॥ १ ॥
प्र ते अग्ने हविष्मतीमियर्म्यच्छा सुद्युम्नां रातिनीं घृताचीम् ।
प्रदक्षिणिद्देवतातिमुराणः सं रातिभिर्वसुभिर्यज्ञमश्रेत् ॥ २ ॥

इध्मेन । अग्ने । इच्छमानः । घृतेन । जुहोमि । हव्यं । तरसे । बलाय । यावत् । ईशे । ब्रह्मणा । वंदमानः । इमां । धियं । शतऽसेयाय । देवीं ॥ ३ ॥ उत् । शोचिषा । सहसः । पुत्र । स्तुतः । बृहत् । वयः । शशमानेषु । धेहि । रेवत् । अग्ने । विश्वामित्रेषु । शं । योः । मर्मृज्म । ते । तन्वं । भूरि । कृत्वः ॥ ४ ॥ कृधि । रत्नं । सुऽसनितः । धनानां । सः । घ । इत् । अग्ने । भवसि । यत् । संऽइद्धः । स्तोतुः । दुरोणे । सुऽभगस्य । रेवत् । सूनृता । करस्ना । दधिषे । वपूंषि ॥ ५ ॥ १८ ॥

अग्निं । होतारं । प्र । वृणे । मियेधे । गृत्सं । कविं । विश्वऽविदं । अमूरं । सः । नः । यक्षत् । देवऽतांता । यजीयान् । राये । वाजाय । वनते । मघानि ॥ १ ॥ प्र । ते । अग्ने । हविष्मतीं । इयर्मि । अच्छ । सुऽद्युम्नां । रातिनीं । घृताचीं । प्रऽदक्षिणित् । देवऽतातिं । उराणः । सं । रातिऽभिः । वसुऽभिः । यज्ञं । अश्रेत् ॥ २ ॥

स तेजीयसा मनसा त्वोत उत शिक्ष स्वपत्यस्य शिक्षोः ।
अग्ने रायो नृतमस्य प्रभूतौ भूयाम ते सुष्टुतयश्च वस्वः ॥ ३ ॥
भूरीणि हि त्वे दधिरे अनीकाग्ने देवस्य यज्यवो जनासः ।
स आ वह देवताति यविष्ठ शर्धो यद्ध दिव्यं यजासि ॥ ४ ॥
यत्त्वा होतारमनजन्मियेधे निषादयन्तो यजथाय देवाः ।
स त्वं नो अग्नेऽवितेह बोध्यधि श्रवांसि धेहि नस्तनूषु ॥ ५ ॥ १९ ॥

॥ २० ॥ ऋषिः—गाथीः । देवता—विश्वेदेवाः । छन्दः—त्रिष्टुप् ॥

॥ २० ॥ अग्निरुषसमश्विना दधिक्रां व्युष्टिषु हवते वह्निरुक्थैः ।
सुज्योतिषो नः शृण्वन्तु देवाः सजोषसो अध्वरं वावशानाः ॥ १ ॥
अग्ने त्री ते वाजिना त्री षधस्था तिस्रस्ते जिह्वा ऋतजात पूर्वीः ।
तिस्र उ ते तन्वो देववातास्ताभिर्नः पाहि गिरो अप्रयुच्छन् ॥ २ ॥

सः । तेजीयसा । मनसा । त्वाऽऊतः । उत । शिक्ष । सुऽअपत्यस्य । शिक्षोः । अग्ने । रायः । नृऽतमस्य । प्रऽभूतौ । भूयाम । ते । सुऽस्तुतयः । च । वस्वः ॥ ३ ॥ भूरीणि । हि । त्वे इति । दधिरे । अनीका । अग्ने । देवस्य । यज्यवः । जनासः । सः । आ । वह । देवऽतातिं । यविष्ठ । शर्धः । यत् । अद्य । दिव्यं । यजासि ॥ ४ ॥ यत् । त्वा । होतारं । अनजन् । मियेधे । निऽसादयंतः । यजथाय । देवाः । सः । त्वं । नः । अग्ने । अविता । इह । बोधि । अधि । श्रवांसि । धेहि । नः । तनूषु ॥५॥१९॥

अग्निं । उषसं । अश्विना । दधिऽक्रां । विऽउष्टिषु । हवते । वह्निः । उक्थैः । सुऽज्योतिषः । नः । शृण्वंतु । देवाः । सऽजोषसः । अध्वरं । वावशानाः ॥ १ ॥ अग्ने । त्री । ते । वाजिना । त्री । सधऽस्था । तिस्रः । ते । जिह्वाः । ऋतऽजात । पूर्वीः । तिस्रः । ऊं इति । ते । तन्वः । देवऽवाताः । ताभिः । नः । पाहि । गिरः । अप्रयुच्छन् ॥ २ ॥

अग्ने भूरीणि तव जातवेदो देव स्वधावोऽमृतस्य नाम ।
याश्च माया मायिनां विश्वमिन्व त्वे पूर्वीः संदधुः पृष्टबन्धो ॥ ३ ॥
अग्निर्नेता भग इव क्षितीनां दैवीनां देव ऋतुपा ऋतावा ।
स वृत्रहा सनयो विश्ववेदाः पर्षद्विश्वाति दुरिता गृणन्तम् ॥ ४ ॥
दधिक्रामग्निमुषसं च देवीं बृहस्पतिं सवितारं च देवम् ।
अश्विना मित्रावरुणा भगं च वसूनुद्राँ आदित्याँ इह हुवे ॥ ५ ॥ २० ॥

॥ २१ ॥ ऋषिः—कौशिको गाथीः । देवता—अग्निः । छन्दः—त्रिष्टुप् ॥

॥ २१ ॥ इमं नो यज्ञममृतेषु धेहीमा हव्या जातवेदो जुषस्व ।
स्तोकानामग्ने मेदसो घृतस्य होतः प्राशान प्रथमो निषद्य ॥ १ ॥
घृतवन्तः पावक ते स्तोकाः श्वोतन्ति मेदसः ।
स्वधर्मन्देववीतये श्रेष्ठं नो धेहि वार्यम् ॥ २ ॥

अग्ने । भूरीणि । तव । जातऽवेदः । देव । स्वधाऽवः । अमृतस्य । नाम । याः । च । मायाः । मायिनाम् । विश्वंऽइन्व । त्वे इति । पूर्वीः । संऽदधुः । पृष्टबंधो इति पृष्टऽबंधो ॥ ३ ॥ अग्निः । नेता । भगःऽइव । क्षितीनाम् । दैवीनाम् । देवः । ऋतुऽपाः । ऋतऽवा । सः । वृत्रऽहा । सनयः । विश्वऽवेदाः । पर्षत् । विश्वा । अति । दुःऽइता । गृणंतम् ॥ ४ ॥ दधिऽक्राम् । अग्निम् । उषसम् । च । देवीम् । बृहस्पतिम् । सवितारम् । च । देवम् । अश्विना । मित्रावरुणा । भगम् । च । वसून् । रुद्रान् । आदित्यान् । इह । हुवे ॥ ५ ॥ २० ॥

इमम् । नः । यज्ञम् । अमृतेषु । धेहि । इमा । हव्या । जातऽवेदः । जुषस्व । स्तोकानाम् । अग्ने । मेदसः । घृतस्य । होतरिति । प्र । अशान । प्रथमः । निऽसद्य ॥ १ ॥ घृतऽवंतः । पावक । ते । स्तोकाः । श्वोतंति । मेदसः । स्वऽधर्मन् । देवऽवीतये । श्रेष्ठम् । नः । धेहि । वार्यम् ॥ २ ॥

तुभ्यं स्तोका घृतश्चुतोऽग्ने विप्राय सन्त्य ।
ऋषिः श्रेष्ठः समिध्यसे यज्ञस्य प्राविता भव ॥ ३ ॥
तुभ्यं श्चोतन्त्यध्रिगो शचीवः स्तोकासो अग्ने मेदसो घृतस्य ।
कविशस्तो बृहता भानुना आगा हव्या जुषस्व मेधिर ॥ ४ ॥
ओजिष्ठं ते मध्यतो मेद उद्भृतं प्र ते वयं ददामहे ।
श्चोतन्ति ते वसो स्तोका अधि त्वचि प्रति तान्देवशो विहि ॥ ५ ॥ २१ ॥

॥ २२ ॥ ऋषिः—गाथीः । देवता—अग्निः । छन्दः—त्रिष्टुप् ॥

॥ २२ ॥ अयं सो अग्निर्यस्मिन्त्सोममिन्द्रः सुतं दधे जठरे वावशानः ।
सहस्रिणं वाजमत्यं न सप्तिं ससवान्त्सन्त्स्तूयसे जातवेदः ॥ १ ॥
अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र ।
येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः ॥ २ ॥

तुभ्यं । स्तोकाः । घृतऽश्चुतः । अग्ने । विप्राय । सन्त्य । ऋषिः । श्रेष्ठः । सं । इध्यसे । यज्ञस्य । प्रऽअविता । भव ॥ ३ ॥ तुभ्यं । श्चोतंति । अध्रिगो इत्यध्रिऽगो । शचीऽवः । स्तोकासः । अग्ने । मेदसः । घृतस्य । कविऽशस्तः । बृहता । भानुना । आ । अगाः । हव्या । जुषस्व । मेधिर ॥ ४ ॥ ओजिष्ठं । ते । मध्यतः । मेदः । उत्ऽभृतं । प्र । ते । वयं । ददामहे । श्चोतंति । ते । वसोऽइति । स्तोकाः । अधि । त्वचि । प्रति । तान् । देवऽशः । विहि ॥ ५ ॥ २१ ॥

अयं । सः । अग्निः । यस्मिन् । सोमं । इंद्रः । सुतं । दधे । जठरे । वावशानः । सहस्रिणं । वाजं । अत्यं । न । सप्तिं । ससऽवान् । सन् । स्तूयसे । जातऽवेदः ॥ १ ॥ अग्ने । यत् । ते । दिवि । वर्चः । पृथिव्यां । यत् । ओषधीषु । अप्ऽसु । आ । यजत्र । येन । अंतरिक्षं । उरु । आऽततंथ । त्वेषः । सः । भानुः । अर्णवः । नृऽचक्षाः ॥ २ ॥

अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवाँ ऊचिषे धिष्ण्या ये ।
या रोचने परस्तात्सूर्यस्य याश्चावस्तादुपतिष्ठन्त आपः ॥ ३ ॥
पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः ।
जुषन्तां यज्ञमद्रुहोऽनमीवा इषो महीः ॥ ४ ॥
इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ५ ॥ २२ ॥

॥ २३ ॥ ॥ ऋषिः-देवश्रवः । देवता-अग्निः । छन्दः-त्रिष्टुप् ॥

॥ २३ ॥ निर्मथितः सुधित आ सधस्थे युवा कविरध्वरस्य प्रणेता ।
जूर्यत्स्वग्निरजरो वनेष्वत्रा दधे अमृतं जातवेदाः ॥ १ ॥
अमन्थिष्टां भारता रेवदग्निं देवश्रवा देववातः सुदक्षम् ।
अग्ने वि पश्य बृहताभि रायेषां नो नेता भवतादनु द्यून् ॥ २ ॥

अग्ने । दिवः । अर्णं । अच्छं । जिगासि । अच्छं । देवान् । ऊचिषे । धिष्ण्याः ।
ये । याः । रोचने । परस्तात् । सूर्यस्य । याः । च । अवस्तात् । उपऽतिष्ठंते ।
आपः ॥ ३ ॥ पुरीष्यासः । अग्नयः । प्रवणेभिः । सऽजोषसः । जुषंतां । यज्ञं ।
अद्रुहः । अनमीवाः । इषः । महीः ॥ ४ ॥ इळां । अग्ने । पुरुऽदंसं । सनिं । गोः ।
शश्वत्ऽतमं । हवमानाय । साध । स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने ।
सा । ते ।सुऽमतिः । भूतु । अस्मे इति ॥ ५ ॥ २२ ॥

निःऽमथितः । सुऽधितः । आ । सधऽस्थे । युवा । कविः । अध्वरस्य ।
प्रऽनेता । जूर्यत्ऽसु । अग्निः । अजरः । वनेषु । अत्र । दधे । अमृतं ।
जातऽवेदाः ॥ १ ॥ अमंथिष्टां । भारता । रेवत् । अग्निं । देवऽश्रवाः । देवऽवातः ।
सुऽदक्षं । अग्ने । वि । पश्य । बृहता । अभि । राया । इषां । नः । नेता । भवतात् ।
अनु । द्यून् ॥ २ ॥

दश क्षिपः पूर्व्यं सीमजीजनन्त्सुजातं मातृषु प्रियम् ।
अग्निं स्तुहि दैववातं देवश्रवो यो जनानामसद्वशी ॥ ३ ॥
नि त्वा दधे वर आ पृथिव्या इळायास्पदे सुदिनत्वे अह्नाम् ।
दृषद्वत्यां मानुष आपयायां सरस्वत्यां रेवदग्ने दिदीहि ॥ ४ ॥
इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ५ ॥ २३ ॥

॥ २४ ॥ ऋषिः-विश्वामित्रः । देवता-अग्निः । छन्दः-गायत्री ॥

॥ २४ ॥ अग्ने सहस्व पृतना अभिमातीरपास्य ।
दुष्टरस्तरन्नरातीर्वर्चो धा यज्ञवाहसे ॥ १ ॥
अग्ने इळा समिध्यसे वीतिहोत्रो अमर्त्यः । जुषस्व सू नो अध्वरम् ॥ २ ॥
अग्ने द्युम्नेन जागृवे सहसः सूनवाहुत । एदं बर्हिः सदो मम ॥ ३ ॥
अग्ने विश्वेभिरग्निभिर्देवेभिर्महया गिरः । यज्ञेषु ये ऊ चायवः ॥ ४ ॥
अग्ने दा दाशुषे रयिं वीरवन्तं परीणसं । शिशीहि नः सूनुमतः ॥५॥२४॥

दश । क्षिपः । पूर्व्यं । सीं । अजीजनन् । सुऽजातं । मातृषु । प्रियं । अग्निं । स्तुहि । दैवऽवातं । देवऽश्रवः । यः । जनानां । असत् । वशी ॥ ३ ॥ नि । त्वा । दधे । वरे । आ । पृथिव्याः । इळायाः । पदे । सुदिनऽत्वे । अह्नां । दृषद्वत्यां । मानुषे । आपयायां । सरस्वत्यां । रेवत् । अग्ने । दिदीहि ॥ ४ ॥ इळां । अग्ने । पुरुऽदंसं । सनिं । गोः । शश्वत्ऽतमं । हवमानाय । साध । स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥ ५ ॥ २३ ॥

अग्ने । सहस्व । पृतनाः । अभिऽमातीः । अप । अस्य । दुस्तरः । तरन् । अरातीः । वर्चः । धाः । यज्ञऽवाहसे ॥ १ ॥ अग्ने । इळा । सं । इध्यसे । वीतिऽहोत्रः । अमर्त्यः । जुषस्व । सु । नः । अध्वरं ॥ २ ॥ अग्ने । द्युम्नेन । जागृवे । सहसः । सूनो इति । आऽहुत । आ । इदं । बर्हिः । सदः । मम ॥ ३ ॥ अग्ने । विश्वेभिः । अग्निऽभिः । देवेभिः । महय । गिरः । यज्ञेषु । ये । ऊं इति । चायवः ॥ ४ ॥ अग्ने । दाः । दाशुषे । रयिं । वीरऽवंतं । परीणसं । शिशीहि । नः । सूनुऽमतः ॥ ५ ॥ २४ ॥

॥ २५ ॥ ऋषिः—विश्वामित्रः । देवता—अग्निः । छन्दः—विराट् ॥

॥ २५ ॥ अग्ने दिवः सूनुरसि प्रचेतास्तना पृथिव्या उत विश्ववेदाः ।
ऋधग्देवाँ इह यजा चिकित्वः ॥ १ ॥
अग्निः सनोति वीर्याणि विद्वान्त्सनोति वाजममृताय भूषन् ।
स नो देवाँ एह वह पुरुक्षो ॥ २ ॥
अग्निर्द्यावापृथिवी विश्वजन्ये आ भाति देवी अमृते अमूरः ।
क्षयन्वाजैः पुरुश्चन्द्रो नमोभिः ॥ ३ ॥
अग्न इन्द्रश्च दाशुषो दुरोणे सुतावतो यज्ञमिहोप यातम् ।
अमर्धन्ता सोमपेयाय देवा ॥ ४ ॥
अग्ने अपां समिध्यसे दुरोणे नित्यः सूनो सहसो जातवेदः ।
सधस्थानि महयमान ऊती ॥ ५ ॥ २५ ॥

॥ २६ ॥ ऋषिः—विश्वामित्रः । देवता—वैश्वानरः । छन्दः—त्रिष्टुप् ॥

॥ २६ ॥ वैश्वानरं मनसाग्निं निचाय्या हविष्मन्तो अनुषत्यं स्वर्विदम् ।
सुदानुं देवं रथिरं वसूयवो गीर्भी रण्वं कुशिकासो हवामहे ॥ १ ॥

अग्ने । दिवः । सूनुः । असि । प्रऽचेताः । तना । पृथिव्याः । उत । विश्वऽवेदाः । ऋधक् । देवान् । इह । यज । चिकित्वः ॥ १ ॥ अग्निः । सनोति । वीर्याणि । विद्वान् । सनोति । वाजं । अमृताय । भूषन् । सः । नः । देवान् । आ । इह । वह । पुरुक्षो इति पुरुऽक्षो ॥ २ ॥ अग्निः । द्यावापृथिवी इति । विश्वजन्ये इति विश्वऽजन्ये । आ । भाति । देवी इति । अमृते इति । अमूरः । क्षयन् । वाजैः । पुरुऽचंद्रः । नमःऽभिः ॥ ३ ॥ अग्ने । इंद्रः । च । दाशुषः । दुरोणे । सुतऽवंतः । यज्ञं । इह । उप । यातं । अमर्धता । सोमऽपेयाय । देवा ॥ ४ ॥ अग्ने । अपां । सं । इध्यसे । दुरोणे । नित्यः । सूनो इति । सहसः । जातऽवेदः । सधऽस्थानि । महयमानः । ऊती ॥ ५ ॥ २५ ॥

वैश्वानरं । मनसा । अग्निं । निऽचाय्य । हविष्मंतः । अनुऽसत्यं । स्वःऽविदं । सुऽदानुं । देवं । रथिरं । वसुऽयवः । गीःऽभिः । रण्वं । कुशिकासः । हवामहे ॥ १ ॥

तं शुभ्रमग्निमवसे हवामहे वैश्वानरं मातरिश्वानमुक्थ्यम् ।
बृहस्पतिं मनुषो देवतातये विप्रं श्रोतारमतिथिं रघुष्यदम् ॥ २ ॥
अश्वो न क्रन्दञ्जनिभिः समिध्यते वैश्वानरः कुशिकेभिर्युगेयुगे ।
स नो अग्निः सुवीर्यं स्वश्व्यं दधातु रत्नममृतेषु जागृविः ॥ ३ ॥
प्र यन्तु वाजास्तविषीभिरग्नयः शुभे सम्मिश्लाः पृषतीरयुक्षत ।
बृहदुक्षो मरुतो विश्ववेदसः प्र वेपयन्ति पर्वताँ अदाभ्याः ॥ ४ ॥
अग्निश्रियो मरुतो विश्वकृष्टय आ त्वेषमुग्रमवसे ईमहे वयम् ।
ते स्वानिनो रुद्रिया वर्षनिर्णिजः सिंहा न हेषक्रतवः सुदानवः ॥ ५ ॥ २६ ॥
व्रातंव्रातं गणंगणं सुशस्तिभिरग्नेर्भामं मरुतामोजं ईमहे ।
पृषदश्वासो अनवभ्रराधसो गन्तारो यज्ञं विदथेषु धीराः ॥ ६ ॥
अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् ।
अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि नाम ॥ ७ ॥

तं । शुभ्रं । अग्निं । अवसे । हवामहे । वैश्वानरं । मातरिश्वानं । उक्थ्यं । बृहस्पतिं । मनुषः । देवऽतातये । विप्रं । श्रोतारं । अतिथिं । रघुऽस्यदं ॥ २ ॥ अश्वः । न । क्रंदन् । जनिऽभिः । सं । इध्यते । वैश्वानरः । कुशिकेभिः । युगेऽयुगे । सः । नः । अग्निः । सुऽवीर्यं । सुऽअश्व्यं । दधातु । रत्नं । अमृतेषु । जागृविः ॥ ३ ॥ प्र । यंतु । वाजाः । तविषीभिः । अग्नयः । शुभे । संऽमिश्लाः । पृषतीः । अयुक्षत । बृहत्ऽउक्षः । मरुतः । विश्वऽवेदसः । प्र । वेपयंति । पर्वतान् । अदाभ्याः ॥ ४ ॥ अग्निऽश्रियः । मरुतः । विश्वऽकृष्टयः । आ । त्वेषं । उग्रं । अवसे । ईमहे । वयं । ते । स्वानिनः । रुद्रियाः । वर्षऽनिर्णिजः । सिंहाः । न । हेषऽक्रतवः । सुऽदानवः ॥ ५ ॥ २६ ॥ व्रातंऽव्रातं । गणंऽगणं । सुशस्तिऽभिः । अग्नेः । भामं । मरुतां । ओजः । ईमहे । पृषत्ऽअश्वासः । अनवभ्रऽराधसः । गंतारः । यज्ञं । विदथेषु । धीराः ॥ ६ ॥ अग्निः । अस्मि । जन्मना । जातऽवेदाः । घृतं । मे । चक्षुः । अमृतं । मे । आसन् । अर्कः । त्रिऽधातुः । रजसः । विऽमानः । अजस्रः । घर्मः । हविः । अस्मि । नाम ॥ ७ ॥

त्रिभिः पवित्रैरपुपोड्यर्कं हृदा मतिं ज्योतिरनु प्रजानन् ।
वसिष्ठं रक्षमकृत स्वधाभिरादिद्यावापृथिवी पर्यपश्यत् ॥ ८ ॥
शतधारमुत्समक्षीयमाणं विपश्चितं पितरं वक्त्वानाम् ।
मेळिं मदन्तं पित्रोरुपस्थे तं रोदसी पिपृतं सत्यवाचम् ॥ ९ ॥ २७ ॥

॥ २७ ॥ ऋषिः—विश्वामित्रः । देवता—अग्निः । छन्दः—गायत्री ॥

॥२७॥ प्र वो वाजा अभिद्यवो हविष्मन्तो घृताच्या ।
देवाञ्जिगाति सुम्नयुः ॥ १ ॥
ईळे अग्निं विपश्चितं गिरा यज्ञस्य साधनम् । श्रुष्टीवानं धितावानम् ॥ २ ॥
अग्ने शकेम ते वयं यमं देवस्य वाजिनः । अति द्वेषांसि तरेम ॥ ३ ॥
समिध्यमानो अध्वरेऽग्निः पावक ईड्यः । शोचिष्केशस्तमीमहे ॥ ४ ॥
पृथुपाजा अमर्त्यो घृतनिर्भिक्त्वाहुतः । अग्निर्यज्ञस्य हव्यवाट् ॥ ५ ॥ २८ ॥
तं सबाधो यतस्रुच इत्था धिया यज्ञवन्तः । आ चक्रुरग्निमूतये ॥ ६ ॥

त्रिऽभिः । पवित्रैः । अपुपोत् । हि । अर्कं । हृदा । मतिं । ज्योतिः । अनु । प्रऽजानन् । वसिष्ठं । रक्षं । अकृत । स्वधाभिः । आत् । इत् । द्यावापृथिवी इति । परि । अपश्यत् ॥ ८ ॥ शतऽधारं । उत्सं । अक्षीयमाणं । विपःऽचितं । पितरं । वक्त्वानां । मेळिं । मदन्तं । पित्रोः । उपऽस्थे । तं । रोदसी इति । पिपृतं । सत्यऽवाचं ॥ ९ ॥ २७ ॥

प्र । वः । वाजाः । अभिऽद्यवः । हविष्मन्तः । घृताच्या । देवान् । जिगाति । सुम्नयुः ॥ १ ॥ ईळे । अग्निं । विपःऽचितं । गिरा । यज्ञस्य । साधनं । श्रुष्टीऽवानं । धितऽवानं ॥ २ ॥ अग्ने । शकेम । ते । वयं । यमं । देवस्य । वाजिनः । अति । द्वेषांसि । तरेम ॥ ३ ॥ संऽइध्यमानः । अध्वरे । अग्निः । पावकः । ईड्यः । शोचिःऽकेशः । तं । ईमहे ॥ ४ ॥ पृथुऽपाजाः । अमर्त्यः । घृतऽनिर्निक् । सुऽआहुतः । अग्निः । यज्ञस्य । हव्यऽवाट् ॥ ५ ॥ २८ ॥ तं । सऽबाधः । यतऽस्रुचः । इत्था । धिया । यज्ञऽवंतः । आ । चक्रुः । अग्निं । ऊतये ॥ ६ ॥

होता देवो अमर्त्यः पुरस्तादेति मायया । विदथानि प्रचोदयन् ॥ ७ ॥
वाजी वाजेषु धीयतेऽध्वरेषु प्र णीयते । विप्रो यज्ञस्य साधनः ॥ ८ ॥
धिया चक्रे वरेण्यो भूतानां गर्भमा दधे । दक्षस्य पितरं तना ॥ ९ ॥
नि त्वा दधे वरेण्यं दक्षस्येळा सहस्कृत । अग्ने सुदीतिमुशिजम् ॥१०॥२९॥
अग्निं यन्तुरमसुरमृतस्य योगे वनुषः । विप्रा वाजैः समिन्धते ॥ ११ ॥
ऊर्जो नपातमध्वरे दीदिवांसमुप द्यवि । अग्निमीळे कविक्रतुम् ॥ १२ ॥
ईळेन्यो नमस्यस्तिरस्तमांसि दर्शतः । समग्निरिध्यते वृषा ॥ १३ ॥
वृषो अग्निः समिध्यतेऽश्वो न देववाहनः । तं हविष्मन्त ईळते ॥ १४ ॥
वृषणं त्वा वयं वृषन्वृषणः समिधीमहि । अग्ने दीद्यतं बृहत् ॥ १५ ॥ ३० ॥

॥ २८ ॥ ऋषिः—विश्वामित्रः । देवता—अग्निः । छन्दः—त्रिष्टुप् ॥

॥ २८ ॥ अग्ने जुषस्व नो हविः पुरोळाशं जातवेदः ।
प्रातःसावे धियावसो ॥ १ ॥
पुरोळा अग्ने पचतस्तुभ्यं वा घा परिष्कृतः । तं जुषस्व यविष्ठ्य ॥ २ ॥

होता । देव । अमर्त्यः । पुरस्तात् । एति । मायया । विदथानि । प्रऽचोदयन् ॥ ७ ॥
वाजी । वाजेषु । धीयते । अध्वरेषु । प्र । नीयते । विप्रः । यज्ञस्य । साधनः ॥ ८ ॥
धिया । चक्रे । वरेण्यः । भूतानां । गर्भं । आ । दधे । दक्षस्य । पितरं । तना ॥ ९ ॥
नि । त्वा । दधे । वरेण्यं । दक्षस्य । इळा । सहःऽकृत । अग्ने । सुऽदीतिं । उशिजं ॥ १० ॥ २९ ॥ अग्निं । यंतुरं । असुरं । ऋतस्य । योगे । वनुषः । विप्राः । वाजैः । सं । इंधते ॥ ११ ॥ ऊर्जः । नपातं । अध्वरे । दीदिऽवांसं । उप । द्यवि । अग्निं । ईळे । कविऽक्रतुं ॥ १२ ॥ ईळेन्यः । नमस्यः । तिरः । तमांसि । दर्शतः । सं । अग्निः । इध्यते । वृषा ॥ १३ ॥ वृषो इति । अग्निः । सं । इध्यते । अश्वः । न । देवऽवाहनः । तं । हविष्मंतः । ईळते ॥ १४ ॥ वृषणं । त्वा । वयं । वृषन् । वृषणः । सं । इधीमहि । अग्ने । दीद्यतं । बृहत् ॥ १५ ॥ ३० ॥

अग्ने । जुषस्व । नः । हविः । पुरोळाशं । जातऽवेदः । प्रातःऽसावे । धियावसो इति धियाऽवसो ॥ १ ॥ पुरोळाः । अग्ने । पचतः । तुभ्यं । वा । घ । परिऽकृतः । तं । जुषस्व । यविष्ठ्य ॥ २ ॥

अग्ने वीहि पुरोळाशमाहुतं तिरोअह्नयम् । सहसः सूनुरस्यध्वरे हितः ॥३॥
माध्यंदिने सवने जातवेदः पुरोळाशमिह कवे जुषस्व ।
अग्ने यज्ञस्य तव भागधेयं न प्र मिनन्ति विदथेषु धीराः ॥ ४ ॥
अग्ने तृतीये सवने हि कानिषः पुरोळाशं सहसः सूनवाहुतम् ।
अथा देवेष्वध्वरं विपन्यया धा रत्नवन्तममृतेषु जागृविम् ॥ ५ ॥
अग्ने बृधान आहुतिं पुरोळाशं जातवेदः । जुषस्व तिरोअह्नयम् ॥ ६ ॥ ३१ ॥

॥ २९ ॥ ऋषिः-विश्वामित्रः । देवता-अग्निः । छन्दः-त्रिष्टुप् ॥

॥ २९ ॥ अस्तीदमधिमन्थनमस्ति प्रजननं कृतम् ।
एतां विश्पत्नीमा भराग्निं मन्थाम पूर्वथा ॥ १ ॥
अरण्योर्निहितो जातवेदा गर्भ इव सुधितो गर्भिणीषु ।
दिवेदिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः ॥ २ ॥
उत्तानायामव भरा चिकित्वान्त्सद्यः प्रवीता वृषणं जजान ।
अरुषस्तूपो रुशदस्य पाज इळायास्पुत्रो वयुनेऽजनिष्ट ॥ ३ ॥

अग्ने । वीहि । पुरोळाशं । आऽहुतं । तिरःऽअह्नयं । सहसः । सूनुः । असि । अध्वरे । हितः ॥ ३ ॥ माध्यंदिने । सवने । जातऽवेदः । पुरोळाशं । इह । कवे । जुषस्व । अग्ने । यज्ञस्य । तव । भागऽधेयं । न । प्र । मिनंति । विदथेषु । धीराः ॥ ४ ॥ अग्ने । तृतीये । सवने । हि । कानिषः । पुरोळाशं । सहसः । सूनो इति । आऽहुतं । अथ । देवेषु । अध्वरं । विपन्यया । धाः । रत्नऽवंतं । अमृतेषु । जागृविं ॥ ५ ॥ अग्ने । बृधानः । आऽहुतिं । पुरोळाशं । जातऽवेदः । जुषस्व । तिरःऽअह्नयं ॥ ६ ॥ ३१ ॥

अस्ति । इदं । अधिऽमंथनं । अस्ति । प्रऽजननं । कृतं । एतां । विश्पत्नीं । आ । भर । अग्निं । मंथाम । पूर्वऽथा ॥ १ ॥ अरण्योः । निऽहितः । जातऽवेदाः । गर्भःऽइव । सुऽधितः । गर्भिणीषु । दिवेऽदिवे । ईड्यः । जागृवत्ऽभिः । हविष्मत्ऽभिः । मनुष्येभिः । अग्निः ॥ २ ॥ उत्तानायां । अव । भर । चिकित्वान् । सद्यः । प्रऽवीता । वृषणं । जजान । अरुषऽस्तूपः । रुशत् । अस्य । पाजः । इळायाः । पुत्रः । वयुने । अजनिष्ट ॥ ३ ॥

इळायास्त्वा पदे वयं नाभा पृथिव्या अधि ।
जातवेदो नि धीमह्यग्ने हव्याय वोळ्हवे ॥ ४ ॥
मन्थता नरः कविमद्वयन्तं प्रचेतसममृतं सुप्रतीकम् ।
यज्ञस्य केतुं प्रथमं पुरस्तादग्निं नरो जनयता सुशेवम् ॥ ५ ॥ ३२ ॥
यदी मन्थंति बाहुभिर्वि रोचतेऽश्वो न वाज्यरुषो वनेष्वा ।
चित्रो न यामन्नश्विनोरनिवृतः परि वृणक्त्यश्मनस्तृणा दहन् ॥ ६ ॥
जातो अग्नी रोचते चेकितानो वाजी विप्रः कविशस्तः सुदानुः ।
यं देवास ईड्यं विश्वविदं हव्यवाहमदधुरध्वरेषु ॥ ७ ॥
सीद होतः स उ लोके चिकित्वान्त्सादया यज्ञं सुकृतस्य योनौ ।
देवावीर्देवान्हविषा यजास्यग्ने बृहद्यजमाने वयो धाः ॥ ८ ॥
कृणोतं धूमं वृषणं सखायोऽस्रेधन्त इतन वाजमच्छ ।
अयमग्निः पृतनाषाट् सुवीरो येन देवासो असहन्त दस्यून् ॥ ९ ॥
अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः ।
तं जानन्नग्न आ सीदाथा नो वर्धया गिरः ॥ १० ॥ ३३ ॥

इळायाः । त्वा । पदे । वयं । नाभा । पृथिव्याः । अधि । जातऽवेदः । नि । धीमहि । अग्ने । हव्याय । वोळ्हवे ॥ ४ ॥ मंथत । नरः । कविं । अद्वयंतं । प्रऽचेतसं । अमृतं । सुऽप्रतीकं । यज्ञस्य । केतुं । प्रथमं । पुरस्तात् । अग्निं । नरः । जनयत । सुऽशेवं ॥ ५ ॥ ३२ ॥ यदि । मंथंति । बाहुऽभिः । वि । रोचते । अश्वः । न । वाजी । अरुषः । वनेषु । आ । चित्रः । न । यामन् । अश्विनोः । अनिऽवृतः । परि । वृणक्ति । अश्मनः । तृणा । दहन् ॥ ६ ॥ जातः । अग्निः । रोचते । चेकितानः । वाजी । विप्रः । कविऽशस्तः । सुऽदानुः । यं । देवासः । ईड्यं । विश्वऽविदं । हव्यऽवाहं । अदधुः । अध्वरेषु ॥ ७ ॥ सीद । होतरिति । स्वे । ऊं इति । लोके । चिकित्वान् । सादय । यज्ञं । सुऽकृतस्य । योनौ । देवऽअवीः । देवान् । हविषा । यजासि । अग्ने । बृहत् । यजमाने । वयः । धाः ॥ ८ ॥ कृणोत । धूमं । वृषणं । सखायः । अस्रेधंतः । इतन । वाजं । अच्छ । अयं । अग्निः । पृतनाषाट् । सुऽवीरः । येन । देवासः । असहंत । दस्यून् ॥ ९ ॥ अयं । ते । योनिः । ऋत्वियः । यतः । जातः । अरोचथाः । तं । जानन् । अग्ने । आ । सीद । अथ । नः । वर्धय । गिरः ॥ १० ॥ ३३ ॥

तनूनपादुच्यते गर्भ आसुरो नराशंसो भवति यद्विजायते ।
मातरिश्वा यदमिमीत मातरि वातस्य सर्गो अभवत्सरीमणि ॥ ११ ॥
सुनिर्मथा निर्मथितः सुनिधा निहितः कविः ।
अग्ने स्वध्वरा कृणु देवान्देवयते यज ॥ १२ ॥
अजीजनन्नमृतं मर्त्यासोऽस्त्रेमाणं तरणिं वीळुजम्भम् ।
दश स्वसारो अग्रुवः समीचीः पुमांसं जातमभि सं रभन्ते ॥ १३ ॥
प्र सप्तहोता सनकादरोचत मातुरुपस्थे यदशोचदूर्धनि ।
न नि मिषति सुरणो दिवेदिवे यदसुरस्य जठरादजायत ॥ १४ ॥
अमित्रायुधो मरुतामिव प्रयाः प्रथमजा ब्रह्मणो विश्वमिद्विदुः ।
द्युम्नवद्ब्रह्म कुशिकास ऐरिरे एकैको दमे अग्निं समीधिरे ॥ १५ ॥
यदद्य त्वा प्रयति यज्ञे अस्मिन्होतश्चिकित्वोऽवृणीमहीह ।
ध्रुवमया ध्रुवसुताशमिष्ठाः प्रजानन्विद्वाँ उप याहि सोमम् ॥१६॥३४॥१॥२॥

तनूऽनपात् । उच्यते । गर्भः । आसुरः । नराशंसः । भवति । यत् । विऽजायते ।
मातरिश्वा । यत् । अमिमीत । मातरि । वातस्य । सर्गः । अभवत् । सरीमणि ॥ १ ॥
सुनिःऽमथा । निःऽमथितः । सुऽनिधा । निऽहितः । कविः । अग्ने । सुऽअध्वरा ।
कृणु । देवान् । देवऽयते । यज ॥ १२ ॥ अजीजनन् । अमृतं । मर्त्यासः । अस्त्रेमाणं ।
तरणिं । वीळुऽजंभं । दश । स्वसारः । अग्रुवः । संऽईचीः । पुमांसं । जातं । अभि ।
सं । रभंते ॥ १३ ॥ प्र । सप्तऽहोता । सनकात् । अरोचत । मातुः । उपऽस्थे । यत् ।
अशोचत् । ऊर्धनि । न । नि । मिषति । सुऽरणः । दिवेऽदिवे । यत् । असुरस्य ।
जठरात् । अजायत ॥ १४ ॥ अमित्रऽयुधः । मरुतांऽइव । प्रऽयाः । प्रथमऽजाः ।
ब्रह्मणः । विश्वं । इत् । विदुः । द्युम्नऽवत् । ब्रह्म । कुशिकासः । आ । ईरिरे ।
एकःऽएकः । दमे । अग्निं । सं । ईधिरे ॥ १५ ॥ यत् । अद्य । त्वा । प्रऽयति ।
यज्ञे । अस्मिन् । होतरितं । चिकित्वः । अवृणीमहि । इह । ध्रुवं । अयाः । ध्रुवं ।
उत । अशमिष्ठाः । प्रऽजानन । विद्वान् । उप । याहि । सोमं ॥ १६ ॥ ३४ ॥ १ ॥ २ ॥

॥ इति तृतीयाष्टके प्रथमोऽध्यायः ॥ १ ॥

॥ अथ तृतीयाष्टके द्वितीयोऽध्यायः ॥ २ ॥

॥ तृतीयोऽनुवाकः ॥ ३ ॥

॥ ३० ॥ ऋषिः—विश्वामित्रः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥ ३० ॥ इच्छन्ति त्वा सोम्यासः सखायः सुन्वन्ति सोमं दधति प्रयांसि ।
तितिक्षन्ते अभिशस्तिं जनानामिन्द्र त्वदा कश्चन हि प्रकेतः ॥ १ ॥
न ते दूरे परमा चिद्रजांस्या तु प्र याहि हरिवो हरिभ्याम् ।
स्थिराय वृष्णे सवना कृतेमा युक्ता ग्रावाणः समिधाने अग्नौ ॥ २ ॥
इन्द्रः सुशिप्रो मघवा तरुत्रो महाव्रातस्तुविकूर्मिर्ऋघावान् ।
यदुग्रो धा बाधितो मर्त्येषु कृत्या ते वृषभ वीर्याणि ॥ ३ ॥

॥ अथ तृतीयाष्टके द्वितीयोऽध्यायः ॥ २ ॥

इच्छंति । त्वा । सोम्यासः । सखायः । सुन्वंति । सोमं । दधंति । प्रयांसि । तितिक्षंते । अभिऽशस्तिं । जनानां । इंद्र । त्वत् । आ । कः । चन । हि । प्रऽकेतः ॥ १ ॥ न । ते । दूरे । परमा । चित् । रजांसि । आ । तु । प्र । याहि । हरिऽवः । हरिऽभ्यां । स्थिराय । वृष्णे । सवना । कृता । इमा । युक्ताः । ग्रावाणः । संऽइधाने । अग्नौ ॥ २ ॥ इंद्रः । सुऽशिप्रः । मघऽवा । तरुत्रः । महाऽव्रातः । तुविऽकूर्मिः । ऋघावान् । यत् । उग्रः । धाः । बाधितः । मर्त्येषु । कृ । त्या । ते । वृषभ । वीर्याणि ॥ ३ ॥

त्वं हि ष्मा च्यावयन्नच्युतान्येको वृत्रा चरसि जिघ्नमानः ।
तव द्यावापृथिवी पर्वतासोऽनु व्रताय निमितेव तस्थुः ॥ ४ ॥
उताभये पुरुहूत श्रवोभिरेको दृळ्हमवदो वृत्रहा सन् ।
इमे चिदिन्द्र रोदसी अपारे यत्संजग्मा मघवन्काशिरित्ते ॥ ५ ॥ १ ॥
प्र सु त इन्द्र प्रवता हरिभ्यां प्र ते वज्रः प्रमृणन्नेतु शत्रून् ।
जहि प्रतीचो अनूचः पराचो विश्वं सत्यं कृणुहि विष्टमस्तु ॥ ६ ॥
यस्मै धायुरदधा मर्त्याय भक्तं चिद्वक्षते गेह्यं सः ।
भद्रा त इन्द्र सुमतिर्घृताची सहस्रदाना पुरुहूत रातिः ॥ ७ ॥

त्वं । हि । स्म । च्यवयन् । अच्युतानि । एकः । वृत्रा । चरसि । जिघ्नमानः । तव ।
द्यावापृथिवी इति । पर्वतासः । अनु । व्रताय । निमिताऽइव । तस्थुः ॥ ४ ॥ उत ।
अभये । पुरुऽहूत । श्रवःऽभिः । एकः । दृळ्हं । अवदः । वृत्रऽहा । सन् । इमे इति । चित् ।
इंद्र । रोदसी इति । अपारे इति । यत् । संऽजग्मा । मघऽवन् । काशिः । इत् । ते ॥५॥१॥
प्र । सु । ते । इंद्र । प्रऽवता । हरिऽभ्यां । प्र । ते । वज्रः । प्रऽमृणन् । एतु । शत्रून् ।
जहि । प्रतीचः । अनूचः । पराचः । विश्वं । सत्यं । कृणुहि । विष्टं । अस्तु ॥ ६ ॥
यस्मै । धायुः । अदधाः । मर्त्याय । अभक्तं । चित् । भजते । गेह्यं । सः । भद्रा । ते ।
इंद्र । सुऽमतिः । घृताची । सहस्रऽदाना । पुरुऽहूत । रातिः ॥ ७ ॥

सहदानुं पुरुहूत क्षियन्तमहस्तमिन्द्र सं पिणक्कुणारुम् ।
अभि वृत्रं वर्धमानं पियारुमपादमिन्द्र तवसा जघन्थ ॥ ८ ॥
नि सामनामिषिरामिन्द्र भूमिं महीमपारां सदने ससत्थ ।
अस्तभ्नाद्यां वृषभो अन्तरिक्षमर्षन्त्वापस्त्वयेह प्रसूताः ॥ ९ ॥
अलातृणो वल इन्द्र व्रजो गोः पुरा हन्तोर्भयमानो व्यार ।
सुगान्पथो अकृणोन्निरजे गाः प्रावन्वाणीः पुरुहूतं धमन्तीः ॥ १० ॥ २ ॥
एको द्वे वसुमती समीची इन्द्र आ पप्रौ पृथिवीमुत द्याम् ।
उतान्तरिक्षादभि नः समीक इषो रथीः सयुजः शूर वाजान् ॥ ११ ॥

सहऽदानुं । पुरुऽहूत । क्षियंतं । अहस्तं । इंद्र । सं । पिणक् । कुणारुं । अभि । वृत्रं । वर्धमानं । पियारुं । अपादं । इंद्र । तवसा । जघंथ ॥ ८ ॥ नि । सामनां । इषिरां । इंद्र । भूमिं । महीं । अपारां । सदने । ससत्थ । अस्तभ्नात् । द्यां । वृषभः । अंतरिक्षं । अर्षंतु । आपः । त्वया । इह । प्रऽसूताः ॥ ९ ॥ अलातृणः । वलः । इंद्र । व्रजः । गोः । पुरा । हंतोः । भयमानः । वि । आर । सुऽगान् । पथः । अकृणोत् । निःऽअजे । गाः । प्र । आवन् । वाणीः । पुरुऽहूतं । धमंतीः ॥ १० ॥ २ ॥ एकः । द्वे इति । वसुमती इति वसुऽमती । समीची इति संऽईची । इंद्रः । आ । पप्रौ । पृथिवीं । उत । द्यां । उत । अंतरिक्षात् । अभि । नः । संऽईके । इषः । रथीः । सऽयुजः । शूर । वाजान् ॥ ११ ॥

दिशः सूर्यो न मिनाति प्रदिष्टा दिवेदिवे हर्यश्वप्रसूताः ।
सं यदानळध्वनः आदिदश्वैर्विमोचनं कृणुते तत्वस्य ॥ १२ ॥
दिदृक्षन्त उषसो यामन्नक्तोर्विवस्वत्या महि चित्रमनीकम् ।
विश्वे जानन्ति महिना यदागादिन्द्रस्य कर्म सुकृता पुरूणि ॥ १३ ॥
महि ज्योतिर्निहितं वक्षणास्वामा पक्वं चरति बिभ्रती गौः ।
विश्वं स्वाध्र सम्भृतमुस्रियायां यत्सीमिन्द्रो अदधाद्भोजनाय ॥ १४ ॥
इन्द्र दह्यं यामकोशा अभूवन्यज्ञाय शिक्ष गृणते सखिभ्यः ।
दुर्मायवो दुरेवा मर्त्यासो निषङ्गिणो रिपवो हन्त्वासः ॥ १५ ॥ ३ ॥

दिशः । सूर्यः । न । मिनाति । प्रऽदिष्टाः । दिवेऽदिवे । हर्यश्वऽप्रसूताः । सं । यत् । आनट् । अध्वनः । आत् । इत् । अश्वैः । विऽमोचनं । कृणुते । तत् । तु । अस्य ॥ १२ ॥ दिदृक्षंते । उषसः । यामन् । अक्तोः । विवस्वत्याः । महि । चित्रं । अनीकं । विश्वे । जानंति । महिना । यत् । आ । अगात् । इंद्रस्य । कर्म । सुऽकृता । पुरूणि ॥ १३ ॥ महि । ज्योतिः । निऽहितं । वक्षणासु । आमा । पक्वं । चरति । बिभ्रती । गौः । विश्वं । स्वाध्र । संऽभृतं । उस्रियायां । यत् । सीं । इंद्रः । अदधात् । भोजनाय ॥ ४ ॥ इंद्र । दह्यं । यामऽकोशाः । अभूवन् । यज्ञाय । शिक्ष । गृणते । सखिऽभ्यः । दुःऽमायवः । दुःऽएवाः । मर्त्यासः । निऽषंगिणः । रिपवः । हंत्वासः ॥ १५ ॥ ३ ॥

सं घोषः शृण्वेऽवमैरमित्रैर्जहि न्येष्वशनिं तपिष्ठाम् ।
वृश्चेमधस्ताद्वि रुजा सहस्व जहि रक्षो मघवन्रन्धयस्व ॥ १६ ॥
उद्बृह रक्षः सहमूलमिन्द्र वृश्चा मध्यं प्रत्यग्रं शृणीहि ।
आ कीवतः सललूकं चकर्थ ब्रह्मद्विषे तपुषिं हेतिमस्य ॥ १७ ॥
स्वस्तये वाजिभिश्च प्रणेतः सं यन्महीरिषः आसत्सि पूर्वीः ।
रायो वन्तारो बृहतः स्यामास्मे अस्तु भग इन्द्र प्रजावान् ॥ १८ ॥
आ नो भर भगमिन्द्र द्युमन्तं नि ते देष्णस्य धीमहि प्रकेके ।
ऊर्व इव पप्रथे कामो अस्मे तमा पृण वसुपते वसूनाम् ॥ १९ ॥

सं । घोषः । शृण्वे । अवमैः । अमित्रैः । जहि । नि । एषु । अशनिं । तपिष्ठां । वृश्च । ईं । अवस्तात् । वि । रुज । सहस्व । जहि । रक्षः । मघऽवन् । रंधयस्व ॥ १६ ॥ उत् । बृह । रक्षः । सहऽमूलं । इंद्र । वृश्च । मध्यं । प्रति । अग्रं । शृणीहि । आ । कीवंतः । सललूकं । चकर्थ । ब्रह्मऽद्विषे । तपुषिं । हेतिं । अस्य ॥ १७ ॥ स्वस्तये । वाजिऽभिः । च । प्रनेतरिति प्रऽनेतः । सं । यत् । महीः । इषः । आऽसत्सि । पूर्वीः । रायः । वंतारः । बृहतः । स्याम । अस्मे इति । अस्तु । भगः । इंद्र । प्रजाऽवान् ॥ १८ ॥ आ । नः । भर । भगं । इंद्र । द्युऽमंतं । नि । ते । देष्णस्य । धीमहि । प्रऽरेके । ऊर्वःऽइव । पप्रथे । कामः । अस्मे इति । तं । आ । पृण । वसुऽपते । वसूनां ॥ १९ ॥

इमं कामं मन्दया गोभिरश्वैश्चन्द्रवता राधसा पप्रथश्च ।
स्वर्यवो मतिभिस्तुभ्यं विप्रा इन्द्राय वाहः कुशिकासो अक्रन् ॥ २० ॥
आ नो गोत्रा दर्दृहि गोपते गाः समस्मभ्यं सनयो यन्तु वाजाः ।
दिवक्षा असि वृषभ सत्यशुष्मोऽस्मभ्यं सु मघवन्बोधि गोदाः ॥ २१ ॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि सञ्जितं धनानाम् ॥ २२ ॥ ४ ॥

॥ ३१ ॥ ऋषिः—विश्वामित्रः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥ ३१ ॥ शासद्वह्निर्दुहितुर्नप्त्यं गाद्विद्वाँ ऋतस्य दीधितिं सपर्यन् ।
पिता यत्र दुहितुः सेकमृञ्जन्त्सं शग्म्येन मनसा दधन्वे ॥ १ ॥

इमं । कामं । मंदय । गोभिः । अश्वैः । चंद्रऽवता । राधसा । पप्रथः । च । स्वःऽयवः । मतिऽभिः । तुभ्यं । विप्राः । इंद्राय । वाहः । कुशिकासः । अक्रन् ॥ २० ॥ आ । नः । गोत्रा । दर्दृहि । गोऽपते । गाः । सं । अस्मभ्यं । सनयः । यंतु । वाजाः । दिवक्षाः । असि । वृषभ । सत्यऽशुष्मः । अस्मभ्यं । सु । मघऽवन् । बोधि । गोऽदाः ॥ २१ ॥ शुनं । हुवेम । मघऽवानं । इंद्रं । अस्मिन् । भरे । नृऽतमं । वाजऽसातौ । शृण्वंतं । उग्रं । ऊतये । समत्ऽसु । घ्नंतं । वृत्राणि । संऽजितं । धनानां ॥ २२ ॥ ४ ॥

शासत् । वह्निः । दुहितुः । नप्त्यं । गात् । विद्वान् । ऋतस्य । दीधितिं । सपर्यन् । पिता । यत्र । दुहितुः । सेकं । कृंजन् । सं । शग्म्येन । मनसा । दधन्वे ॥१॥

न जामये तान्वो रिक्थमारैक्चकार गर्भं सनितुर्निधानम् ।
यदीं मातरो जनयन्त वह्निमन्यः कर्ता सुकृतोरन्य ऋन्धन् ॥ २ ॥
अग्निर्जज्ञे जुह्वा३रेजमानो महस्पुत्राँ अरुषस्य प्रयक्षे ।
महान्गर्भो मह्या जातमेषां मही प्रवृद्धर्यश्वस्य यज्ञैः ॥ ३ ॥
अभि जैत्रीरसचन्त स्पृधानं महि ज्योतिस्तमसो निरजानन् ।
तं जानतीः प्रत्युदायन्नुषासः पतिर्गवामभवदेक इन्द्रः ॥ ४ ॥
वीळौ सतीरभि धीरा अतृन्दन्प्राचाहिन्वन्मनसा सप्त विप्राः ।
विश्वामविन्दन्पथ्यामृतस्य प्रजानन्नित्ता नमसा विवेश ॥ ५ ॥ ५ ॥
विदद्यदीं सरमा रुग्णमद्रेर्महि पाथः पूर्व्यं सध्र्यक्कः ।
अग्रं नयत्सुपद्यक्षराणामच्छा रवं प्रथमा जानती गात् ॥ ६ ॥

न । जामये । तान्वः । रिक्थं । अरैक् । चकार । गर्भं । सनितुः । निऽधानं । यदिं ।
मातरः । जनयंत । वह्निं । अन्यः । कर्ता । सुऽकृतोः । अन्यः । ऋंधन् ॥ २ ॥
अग्निः । जज्ञे । जुह्वा । रेजमानः । महः । पुत्रान् । अरुषस्य । प्रऽयक्षे । महान् ।
गर्भः । महि । आ । जातं । एषां । मही । प्रऽवृत् । हरिंऽअश्वस्य । यज्ञैः ॥ ३ ॥
अभि । जैत्रीः । असचंत । स्पृधानं । महि । ज्योतिः । तमसः । निः । अजानन् ।
तं । जानतीः । प्रति । उत् । आयन् । उषसः । पतिः । गवां । अभवत् । एकः ।
इंद्रः ॥ ४ ॥ वीळौ । सतीः । अभि । धीराः । अतृंदन् । प्राचा । अहिन्वन् ।
मनसा । सप्त । विप्राः । विश्वां । अविंदन् । पथ्यां । ऋतस्य । प्रऽजानन् । इत् ।
ता । नमसा । आ । विवेश ॥ ५ ॥ ५ ॥ विदत् । यदिं । सरमा । रुग्णं । अद्रेः ।
महि । पाथः । पूर्व्यं । सध्र्यक् । करितिं कः । अग्रं । नयत् । सुऽपदीं । अक्षराणां ।
अच्छ । रवं । प्रथमा । जानती । गात् ॥ ६ ॥

अगंच्छदु विप्रतमः सखीयन्नसूंदयत्सुकृते गर्भमद्रिः ।
ससान मर्यो युवभिर्मखस्यन्नथाभवदङ्गिराः सद्यो अर्चन् ॥ ७ ॥
सतःसंतः प्रतिमानं पुरोभूर्विश्वा वेद जनिमा हन्ति शुष्णम् ।
प्र णो दिवः पदवीर्गव्युरर्चन्त्सखा सखींरमुञ्चन्निरवद्यात् ॥ ८ ॥
नि गव्यता मनसा सेदुरर्कैः कृण्वानासो अमृतत्वाय गातुम् ।
इदं चिन्नु सदनं भूर्येषां येन मासाँ असिषासन्नृतेन ॥ ९ ॥
सम्पश्यमाना अमदन्नभि स्वं पयः प्रजस्य रेतसो दुघानाः ।
वि रोदसी अतपद्घोष एषां जाते निःष्टामदधुर्गोषु वीरान् ॥ १० ॥ ६ ॥
स जातेभिर्वृत्रहा सेदु हव्यैरुदुस्रियां असृजदिन्द्रो अर्कैः ।
उरूच्यस्मै घृतवद्भरन्ती मधु स्वाद्म दुदुहे जेन्या गौः ॥ ११ ॥

अगंच्छत् । ऊं इति । विप्रतमः । सखिऽयन् । असूंदयत् । सुऽकृते । गर्भं । अद्रिः ।
ससानं । मर्यः । युवऽभिः । मखस्यन् । अथ । अभवत् । अंगिराः । सद्यः ।
अर्चन् ॥ ७ ॥ सतःऽसंतः । प्रतिऽमानं । पुरःऽभूः । विश्वा । वेद । जनिम । हंति ।
शुष्णं । प्र । नः । दिवः । पदऽवीः । गव्युः । अर्चन् । सखा । सखीन् । अमुंचत् ।
निः । अवद्यात् ॥ ८ ॥ नि । गव्यता । मनसा । सेदुः । अर्कैः । कृण्वानासः ।
अमृतऽत्वाय । गातुं । इदं । चित् । नु । सदनं । भूरि । एषां । येन । मासान् ।
आसिसासन् । ऋतेन ॥ ९ ॥ संऽपश्यमानाः । अमदन् । अभि । स्वं । पयः ।
प्रजस्य । रेतसः । दुघानाः । वि । रोदसी इति । अतपत् । घोषः । एषां । जाते ।
निःऽस्थां । अदधुः । गोषु । वीरान् ॥ १० ॥ ६ ॥ सः । जातेभिः । वृत्रऽहा । सः ।
इत् । ऊं इति । हव्यैः । उत । उस्रियाः । असृजत । इंद्रः । अर्कैः । उरूची । अस्मै ।
घृतऽवत् । भरंती । मधु । स्वाद्म । दुदुहे । जेन्या । गौः ॥ ११ ॥

पित्रे चिच्चकृः सदनं समस्मै महि त्विषीमत्सुकृतो वि हि ख्यन् ।
विष्कभ्नन्तः स्कम्भनेना जनित्री आसीना ऊर्ध्वं रभसं वि मिन्वन् ॥ १२ ॥
मही यदि धिषणा शिश्नथे धात्सद्योवृधं विभ्वं रोदस्योः ।
गिरो यस्मिन्ननवद्याः संमीचीर्विश्वा इन्द्राय तविषीरनुत्ताः ॥ १३ ॥
मघा ते सख्यं वव्रिम शक्तीरा वृत्रघ्ने नियुतो यन्ति पूर्वीः ।
महि स्तोत्रमव आगन्म सूरेरस्माकं सु मघवन्बोधि गोपाः ॥ १४ ॥
महि क्षेत्रं पुरु श्चन्द्रं विविद्वानादित्सखिभ्यश्चरथं समैरत् ।
इन्द्रो नृभिरजनद्दीद्यानः साकं सूर्यमुषसं गातुमग्निम् ॥ १५ ॥ ७ ॥
अपश्चिदेष विभ्वोदमूनाः प्र सध्रीचीरसृजद्विष्वगिन्द्राः ।
मध्वः पुनानाः कविभिः पवित्रैर्युभिर्हिन्वन्त्यक्तुभिर्धनुत्रीः ॥ १६ ॥

पित्रे । चित् । चक्रुः । सदनं । सं । अस्मै । महि । त्विषिऽमत् । सुऽकृतः । वि । हि । ख्यन् । विऽस्कभ्नंतः । स्कंभनेन । जनित्री इति । आसीनाः । ऊर्ध्वं । रभसं । वि । मिन्वन् ॥ १२ ॥ मही । यदि । धिषणा । शिश्नथे । धात् । सद्यःऽवृधं । विऽभ्वं । रोदस्योः । गिरः । यस्मिन् । अनवद्याः । संऽईचीः । विश्वाः । इंद्राय । तविषीः । अनुत्ताः ॥ १३ ॥ मघा । ते । सख्यं । वव्रिम । शक्तीः । आ । वृत्रऽघ्ने । निऽयुतः । यंति । पूर्वीः । महि । स्तोत्रं । अवः । आ । अगन्म । सूरेः । अस्माकं । सु । मघऽवन् । बोधि । गोपाः ॥ १४ ॥ महि । क्षेत्रं । पुरु । चंद्रं । विविद्वान् । आत् । इत् । सखिऽभ्यः । चरथं । सं । ऐरत् । इंद्रः । नृऽभिः । अजनत् । दीद्यानः । साकं । सूर्यं । उषसं । गातुं । अग्निं ॥ १५ ॥ ७ ॥ अपः । चित् । एषः । विऽभ्वः । दमूनाः । प्र । सध्रीचीः । असृजत् । विष्वक्ऽचंद्राः । मध्वः । पुनानाः । कविऽभिः । पवित्रैः । युऽभिः । हिन्वंति । अक्तुऽभिः । धनुत्रीः ॥ १६ ॥

अनु कृष्णे वसुधिती जिहाते उभे सूर्यस्य मंहना यजत्रे ।
परि यत्ते महिमानं वृजध्यै सखाय इन्द्र काम्या ऋजिप्याः ॥ १७ ॥
पतिर्भव वृत्रहन्त्सूनृतानां गिरां विश्वायुर्वृषभो वयोधाः ।
आ नो गहि सख्येभिः शिवेभिर्महान्महीभिरूतिभिः सरण्यन् ॥ १८ ॥
तमङ्गिरस्वन्नमसा सपर्यन्नव्यं कृणोमि सन्यसे पुराजाम् ।
दुहो वि याहि बहुला अदेवीः स्वश्च नो मघवन्त्सातये धाः ॥ १९ ॥
मिहः पावकाः प्रततता अभूवन्त्स्वस्ति नः पिपृहि पारमासाम् ।
इन्द्र त्वं रथिरः पाहि नो रिषो मक्षूमक्षू कृणुहि गोजितो नः ॥ २० ॥
अदेदिष्ट वृत्रहा गोपतिर्गा अन्तः कृष्णाँ अरुषैर्धामभिर्गात् ।
प्र सूनृता दिशमान ऋतेन दुरश्च विश्वा अवृणोदप स्वाः ॥ २१ ॥

अनु । कृष्णे इति । वसुधिती इति वसुऽधिती । जिहाते इति । उभे इति । सूर्यस्य । मंहना । यजत्रे इति । परि । यत् । ते । महिमानं । वृजध्यै । सखायः । इंद्र । काम्याः । ऋजिप्याः ॥ १७ ॥ पतिः । भव । वृत्रऽहन् । सूनृतानां । गिरां । विश्वऽआयुः । वृषभः । वयःऽधाः । आ । नः । गहि । सख्येभिः । शिवेभिः । महान् । महीभिः । ऊतिऽभिः । सरण्यन् ॥ १८ ॥ तं । अंगिरस्वत् । नमसा । सपर्यन् । नव्यं । कृणोमि । सन्यसे । पुराऽजां । दुहः । वि । याहि । बहुलाः । अदेवीः । स्वः । रितिं स्वः । च । नः । मघऽवन् । सातये । धाः ॥ १९ ॥ मिहः । पावकाः । प्रऽततताः । अभूवन् । स्वस्ति । नः । पिपृहि । पारं । आसां । इंद्र । त्वं । रथिरः । पाहि । नः । रिषः । मक्षुऽमक्षु । कृणुहि । गोऽजितः । नः ॥ २० ॥ अदेदिष्ट । वृत्रऽहा । गोऽपतिः । गाः । अंतरिति । कृष्णान् । अरुषैः । धामऽभिः । गात् । प्र । सूनृताः । दिशमानः । ऋतेन । दुरः । च । विश्वाः । अवृणोत् । अप । स्वाः ॥ २१ ॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि सञ्जितं धनानाम् ॥ २२ ॥ ८ ॥

॥ ३२ ॥ ऋषिः—विश्वामित्रः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥ ३२ ॥ इन्द्र सोमं सोमपते पिबेमं माध्यन्दिनं सवनं चारु यत्ते ।
प्रप्रुथ्या शिप्रे मघवन्नृजीषिन्विमुच्या हरी इह मादयस्व ॥ १ ॥
गवाशिरं मन्थिनमिन्द्र शुक्रं पिबा सोमं ररिमा ते मदाय ।
ब्रह्मकृता मारुतेना गणेन सजोषा रुद्रैस्तृपदा वृषस्व ॥ २ ॥
ये ते शुष्मं ये तविषीमवर्धन्नचैन्त इन्द्र मरुतस्त ओजः ।
माध्यन्दिने सवने वज्रहस्त पिबा रुद्रेभिः सगणः सुशिप्र ॥ ३ ॥

शुनं । हुवेम । मघऽवानं । इंद्रं । अस्मिन् । भरे । नृऽतमं । वाजऽसातौ । शृण्वंतं । उग्रं । ऊतये । समत्ऽसु । घ्नंतं । वृत्राणि । संऽजितं । धनानां ॥ २२ ॥ ८ ॥

इंद्र । सोमं । सोमऽपते । पिब । इमं । माध्यंदिनं । सवनं । चारु । यत् । ते । प्रऽप्रुथ्य । शिप्रे इति । मघऽवन् । ऋजीषिन् । विऽमुच्य । हरी इति । इह । मादयस्व ॥ १ ॥ गोऽआशिरं । मंथिनं । इंद्र । शुक्रं । पिब । सोमं । ररिम । ते । मदाय । ब्रह्मऽकृता । मारुतेन । गणेन । सऽजोषाः । रुद्रैः । तृपत् । आ । वृषस्व ॥२॥ ये । ते । शुष्मं । ये । तविषीं । अवर्धन् । अचैतः । इंद्र । मरुतः । ते । ओजः । माध्यंदिने । सवने । वज्रऽहस्त । पिब । रुद्रेभिः । सऽगणः । सुऽशिप्र ॥ ३ ॥

त इन्वस्य मधुमदविवि्र इन्द्रस्य शर्धो मरुतो य आसन् ।
येभिर्वृत्रस्येषितो विवेदामर्मणो मन्यमानस्य मर्म ॥ ४ ॥
मनुष्वदिन्द्र सवनं जुषाणः पिबा सोमं शश्वते वीर्याय ।
स आ ववृत्स्व हर्यश्व यज्ञैः सरण्युभिरपो अणीं सिसर्षि ॥ ५ ॥ ९ ॥
त्वमपो यद्वृत्रं जघन्वाँ अत्याँ इव प्रासृजः सर्तवाजौ ।
शयानमिन्द्र चरता वधेन वव्रिवांसं परि देवीरदेवम् ॥ ६ ॥
यजाम इन्नमसा वृद्धमिन्द्रं बृहन्तमृष्वमजरं युवानम् ।
यस्य प्रिये ममतुर्यज्ञियस्य न रोदसी महिमानं ममाते ॥ ७ ॥
इन्द्रस्य कर्म सुकृता पुरूणि व्रतानि देवा न मिनन्ति विश्वे ।
दाधार यः पृथिवीं द्यामुतेमां जजान सूर्यं उषसं सुदंसाः ॥ ८ ॥

ते । इत् । नु । अस्य । मधुऽमत् । विविग्रे । इंद्रस्य । शर्धः । मरुतः । ये । आसन् ।
येभिः । वृत्रस्य । इषितः । विवेद । अमर्मणः । मन्यमानस्य । मर्म ॥ ४ ॥ मनुष्वत् ।
इंद्र । सवनं । जुषाणः । पिब । सोमं । शश्वते । वीर्याय । सः । आ । ववृत्स्व ।
हरिऽअश्व । यज्ञैः । सरण्युऽभिः । अपः । अणीं । सिसर्षि ॥ ५ ॥ ९ ॥ त्वं । अपः ।
यत् । ह । वृत्रं । जघन्वान् । अत्यान्ऽइव । प्र । असृजः । सर्तवे । आजौ । शयानं ।
इंद्र । चरता । वधेन । वव्रिऽवांसं । परि । देवीः । अदेवं ॥ ६ ॥ यजामः । इत् ।
नमसा । वृद्धं । इंद्रं । बृहंतं । ऋष्वं । अजरं । युवानं । यस्य । प्रिये इति । ममतुः ।
यज्ञियस्य । न रोदसी इति । महिमानं । ममाते इति ॥ ७ ॥ इंद्रस्य । कर्म ।
सुऽकृता । पुरूणि । व्रतानि । देवाः । न । मिनंति । विश्वे । दाधारं । यः । पृथिवीं ।
द्यां । उत । इमां । जजानं । सूर्यं । उषसं । सुऽदंसाः ॥ ८ ॥

अद्रोघ सत्यं तव तन्महित्वं सद्यो यज्जातो अपिबो ह सोमंन् ।
न द्यावं इन्द्र तवसस्त ओजो नाह न मासाः शरदो वरन्त ॥ ९ ॥
त्वं सद्यो अपिबो जात इन्द्र मदाय सोमं परमे व्योमन् ।
यद् द्यावापृथिवी आविवेशीरथाभवः पूर्व्यः कारुधायाः ॥ १० ॥ १० ॥
अहन्नहिं परिशयानमर्णो ओजायमानं तुविजात तव्यान् ।
न ते महित्वमनु भूदध द्यौर्यदन्यया स्फिग्याक्षामवस्थाः ॥ ११ ॥
यज्ञो हि त इन्द्र वर्धनो भूदुत प्रियः सुतसोमो मियेधः ।
यज्ञेनं यज्ञमव यज्ञियः सन्यज्ञस्ते वज्रमहिहत्यं आवत् ॥ १२ ॥

अद्रोघ । सत्यं । तव । तत् । महिऽत्वं । सद्यः । यत् । जातः । अपिबः । ह । सोमं । न । द्यावः । इंद्र । तवसः । ते । ओजः । न । अहा । न । मासाः । शरदः । वरंत ॥ ९ ॥ त्वं । सद्यः । अपिबः । जातः । इंद्र । मदाय । सोमं । परमे । विऽओमन् । यत् । ह । द्यावापृथिवी इति । आ । अविवेशीः । अथ । अभवः । पूर्व्यः । कारुऽधायाः ॥ १० ॥ १० ॥ अहन् । अहिं । परिऽशयानं । अर्णः । ओजायमानं । तुविऽजात । तव्यान् । न । ते । महिऽत्वं । अनु । भूत् । अध । द्यौः । यत् । अन्यया । स्फिग्या । क्षां । अवस्थाः ॥ ११ ॥ यज्ञः । हि । ते । इंद्र । वर्धनः । भूत् । उत । प्रियः । सुतऽसोमः । मियेधः । यज्ञेनं । यज्ञं । अव । यज्ञियः । सन् । यज्ञः । ते । वज्रं । अहिऽहत्यं । आवत् ॥ १२ ॥

यज्ञेनेन्द्रमवसा चक्रे अर्वागैनं सुम्नाय नव्यसे ववृत्याम् ।
यः स्तोमेभिर्वावृधे पूर्व्येभिर्यो मध्यमेभिरुत नूतनेभिः ॥ १३ ॥
विवेष यन्मा धिषणा जजान स्तवै पुरा पार्यादिन्द्रमह्नः ।
अंहसो यत्र पीपरद्यथा नो नावेव यान्तमुभये हवन्ते ॥ १४ ॥
आपूर्णो अस्य कलशः स्वाहा सेक्तेव कोशं सिसिचे पिबध्यै ।
समु प्रिया आववृत्रन्मदाय प्रदक्षिणिदभि सोमास इन्द्रम् ॥ १५ ॥
न त्वा गभीरः पुरुहूत सिन्धुर्नाद्रयः परि षन्तो वरन्त ।
इत्था सखिभ्य इषितो यदिन्द्रा दृळ्हं चिदरुजो गव्यमूर्वम् ॥ १६ ॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि सञ्जितं धनानाम् ॥ १७ ॥ ११ ॥

यज्ञेनं । इंद्रं । अवंसा । आ । चक्रे । अर्वाक् । आ । एनं । सुम्नाय । नव्यसे । ववृत्यां । यः । स्तोमेभिः । ववृधे । पूर्व्येभिः । यः । मध्यमेभिः । उत । नूतनेभिः ॥ १३ ॥ विवेष । यत् । मा । धिषणा । जजानं । स्तवै । पुरा । पार्यात् । इंद्रं । अह्नः । अंहसः । यत्र । पीपरत् । यथा । नः । नावाऽइव । यांतं । उभये । हवंते ॥ १४ ॥ आऽपूर्णः । अस्य । कलशः । स्वाहा । सेक्ताऽइव । कोशं । सिसिचे । पिबध्यै । सं । ऊं इति । प्रियाः । आ । अववृत्रन् । मदाय । प्रऽदक्षिणित् । अभि । सोमासः । इंद्रं ॥ १५ ॥ न । त्वा । गभीरः । पुरुऽहूत । सिंधुः । न । अद्रयः । परि । संतः । वरंत । इत्था । सखिऽभ्यः । इषितः । यत् । इंद्र । आ । दृळ्हं । चित् । अरुजः । गव्यं । ऊर्वं ॥ १६ ॥ शुनं । हुवेम । मघऽवानं । इंद्रं । अस्मिन् । भरे । नृऽतमं । वाजऽसातौ । शृण्वंतं । उग्रं । ऊतये । समत्ऽसु । घ्नंतं । वृत्राणि । संऽजितं । धनानां ॥ १७ ॥ ११ ॥

॥ ३३ ॥ ऋषिः-विश्वामित्रः । देवता-इन्द्रः । छन्दः-त्रिष्टुप् ॥

॥ ३३ ॥ प्र पर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने ।
गावेव शुभ्रे मातरा रिहाणे विपाड्छुतुद्री पयसा जवेते ॥ १ ॥
इन्द्रेषिते प्रसवं भिक्षमाणे अच्छा समुद्रं रथ्येव याथः ।
समाराणे ऊर्मिभिः पिन्वमाने अन्या वामन्यामप्येति शुभ्रे ॥ २ ॥
अच्छा सिन्धुं मातृतमामयासं विपाशमुर्वीं सुभगामगन्म ।
वत्समिव मातरा संरिहाणे समानं योनिमनु सञ्चरन्ती ॥ ३ ॥
एना वयं पयसा पिन्वमाना अनु योनिं देवकृतं चरन्तीः ।
न वर्तवे प्रसवः सर्गतक्तः किंयुर्विप्रो नद्यो जोहवीति ॥ ४ ॥

प्र । पर्वतानां । उशती इति । उपऽस्थात् । अश्वे इवेत्यश्वेऽइव । विषिते इति विऽसिते । हासमाने इति । गावाऽइव । शुभ्रे इति । मातरा । रिहाणे इति । विऽपाट् । शुतुद्री । पयसा । जवेते इति ॥ १ ॥ इंद्रेषिते इतींद्रऽइषिते । प्रऽसवं । भिक्षमाणे इति । अच्छ । समुद्रं । रथ्याऽइव । याथः । समाराणे इति संऽआराणे । ऊर्मिऽभिः । पिन्वमाने इति । अन्या । वां । अन्यां । अपि । एति । शुभ्रे इति ॥ २ ॥ अच्छ । सिंधुं । मातृऽतमां । अयासं । विऽपाशं । उर्वीं । सुऽभगां । अगन्म । वत्संऽइव । मातरा । संरिहाणे इति संऽरिहाणे । समानं । योनिं । अनु । संचरंती इति संऽचरंती ॥ ३ ॥ एना । वयं । पयसा । पिन्वमानाः । अनु । योनिं । देवऽकृतं । चरंतीः । न । वर्तवे । प्रऽसवः । सर्गऽतक्तः । किंऽयुः । विप्रः । नद्यः । जोहवीति ॥ ४ ॥

रमंध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः ।
प्र सिन्धुमच्छा बृहती मनीषावस्युरंहे कुशिकस्य सूनुः ॥ ५ ॥ १२ ॥
इन्द्रो अस्माँ अरदद्वज्रबाहुरपाहन्वृत्रं परिधिं नदीनाम् ।
देवोऽनयत्सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः ॥ ६ ॥
प्रवाच्यं शश्वधा वीर्यं१न्तदिन्द्रस्य कर्म यदहिं विवृश्चत् ।
वि वज्रेण परिषदो जघानायन्नापोऽयनमिच्छमानाः ॥ ७ ॥
एतद्वचो जरितर्मापि मृष्ठा आ यत्ते घोषानुत्तरा युगानि ।
उक्थेषु कारो प्रति नो जुषस्व मा नो नि कः पुरुषत्रा नमस्ते ॥ ८ ॥

रमंध्वं । मे । वचसे । सोम्याय । ऋतऽवरीः । उप । मुहूर्तं । एवैः । प्र । सिंधुं ।
अच्छ । बृहती । मनीषा । अवस्युः । अंहे । कुशिकस्य । सूनुः ॥ ५ ॥ १२ ॥
इंद्रः । अस्मान् । अरदत् । वज्रंऽबाहुः । अप । अहन् । वृत्रं । परिऽधिं । नदीनां ।
देवः । अनयत् । सविता । सुऽपाणिः । तस्य । वयं । प्रऽसवे । यामः । उर्वीः ॥ ६ ॥
प्रऽवाच्यं । शश्वधा । वीर्यं । तत् । इंद्रस्य । कर्म । यत् । अहिं । विऽवृश्चत् । वि ।
वज्रेण । परिऽसदः । जघान । आयन् । आपः । अयनं । इच्छमानाः ॥ ७ ॥
एतत् । वचः । जरितः । मा । आपं । मृष्ठाः । आ । यत् । ते । घोषान् । उत्ऽतरा ।
युगानि । उक्थेषु । कारो इति । प्रति । नः । जुषस्व । मा । नः । नि । करिति कः ।
पुरुषऽत्रा । नमः । ते ॥ ८ ॥

ओ षु स्वसारः कारवे शृणोत ययौ वो दूरादनसा रथेन ।
नि षू नमध्वं भवता सुपारा अधोअक्षाः सिन्धवः स्रोत्याभिः ॥ ९ ॥
आ ते कारो शृणवामा वचांसि ययाथ दूरादनसा रथेन ।
नि ते नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै ते ॥ १० ॥ १३ ॥
यदङ्ग त्वा भरताः सन्तरेयुर्गव्यन्ग्रामं इषित इन्द्रजूतः ।
अर्षादहं प्रसवः सर्गतक्त आ वो वृणे सुमतिं यज्ञियानाम् ॥ ११ ॥
अतारिषुर्भरता गव्यवः समभक्त विप्रः सुमतिं नदीनाम् ।
प्र पिन्वध्वमिषयन्तीः सुराधा आ वक्षणाः पृणध्वं यात शीभम् ॥ १२ ॥
उद्व ऊर्मिः शम्या हन्त्वापो योक्त्राणि मुञ्चत ।
मादुष्कृतौ व्येनसाघ्न्यौ शूनमारताम् ॥ १३ ॥ १४ ॥

ओ इति । सु । स्वसारः । कारवे । शृणोत । ययौ । वः । दूरात् । अनसा । रथेन ।
नि । सु । नमध्वं । भवत । सुऽपाराः । अधःऽअक्षाः । सिंधवः । स्रोत्याभिः ॥ ९ ॥
आ । ते । कारो इति । शृणवाम । वचांसि । ययाथ । दूरात् । अनसा । रथेन । नि ।
ते । नंसै । पीप्यानाऽइव । योषा । मर्यायऽइव । कन्या । शश्वच । तु इति ते ॥१०॥१३॥
यत् । अंग । त्वा । भरताः । संऽतरेयुः । गव्यन् । ग्रामः । इषितः । इंद्रेऽजूतः ।
अर्षात् । अहं । प्रऽसवः । सर्गेऽतक्तः । आ । वः । वृणे । सुऽमतिं । यज्ञियानां ॥११॥
अतारिषुः । भरताः । गव्यवः । सं । अभक्त । विप्रः । सुऽमतिं । नदीनां । प्र ।
पिन्वध्वं । इषयंतीः । सुऽराधाः । आ । वक्षणाः । पृणध्वं । यात । शीभं ॥ १२ ॥
उत् । वः । ऊर्मिः । शम्याः । हंतु । आपः । योक्त्राणि । मुंचत । मा । अदुःऽकृतौ ।
विऽएंनसा । अघ्न्यौ । शूनं । आ । अरतां ॥ १३ ॥ १४ ॥

॥ १४ ॥ ऋषिः-विश्वामित्रः । देवता-इन्द्रः । छन्दः-त्रिष्टुप् ॥

॥ १४ ॥ इन्द्रः पूर्भिदातिरद्दासमर्कैर्विदद्वसुर्दयमानो वि शत्रून् ।
ब्रह्मजूतस्तन्वा वावृधानो भूरिदात्र आपृणद्रोदसी उभे ॥ १ ॥
मखस्य ते तविषस्य प्र जूतिमियर्मि वाचममृताय भूषन् ।
इन्द्र क्षितीनामसि मानुषीणां विशां दैवीनामुत पूर्वयावा ॥ २ ॥
इन्द्रो वृत्रमवृणोच्छर्धनीतिः प्र मायिनाममिनाद्वर्पणीतिः ।
अहन्व्यंसमुशधग्वनेष्वाविर्धेना अकृणोद्राम्याणाम् ॥ ३ ॥
इन्द्रः स्वर्षा जनयन्नहानि जिगायोशिग्भिः पृतना अभिष्टिः ।
प्रारोचयन्मनवे केतुमह्नामविन्दज्ज्योतिर्बृहते रणाय ॥ ४ ॥

इंद्रः । पूःऽभित् । आ । अतिरत् । दासं । अर्कैः । विदत्ऽवसुः । दयमानः । वि । शत्रून् । ब्रह्मऽजूतः । तन्वा । वृधानः । भूरिऽदात्रः । आ । अपृणत् । रोदसी इति । उभे इति ॥ १ ॥ मखस्य । ते । तविषस्य । प्र । जूतिं । इयर्मि । वाचं । अमृताय । भूषन् । इंद्र । क्षितीनां । असि । मानुषीणां । विशां । दैवीनां । उत । पूर्वऽयावा ॥ २ ॥ इंद्रः । वृत्रं । अवृणोत् । शर्धऽनीतिः । प्र । मायिनां । अमिनात् । वर्पऽनीतिः । अहन् । विऽअंसं । उशधक् । वनेषु । आविः । धेनाः । अकृणोत् । राम्याणां ॥ ३ ॥ इंद्रः । स्वःऽसाः । जनयन् । अहानि । जिगाय । उशिक्ऽभिः । पृतनाः । अभिष्टिः । प्र । अरोचयत् । मनवे । केतुं । अह्नां । अविंदत् । ज्योतिः । बृहते । रणाय ॥ ४ ॥

इन्द्रस्तुजो बर्हणा आ विवेश नृवद्दधानो नर्या पुरूणि ।
अचेतयद्धिय इमा जरित्रे प्रेमं वर्णमतिरच्छुक्रमासाम् ॥ ५ ॥ १५ ॥
महो महानि पनयन्त्यस्येन्द्रस्य कर्म सुकृता पुरूणि ।
वृजनेन वृजिनान्त्सं पिपेष मायाभिर्दस्यूँरभिभूत्योजाः ॥ ६ ॥
युधेन्द्रो मह्ना वरिवश्चकार देवेभ्यः सत्पतिश्चर्षणिप्राः ।
विवस्वतः सदने अस्य तानि विप्रा उक्थेभिः कवयो गृणन्ति ॥ ७ ॥
सत्रासाहं वरेण्यं सहोदां ससवांसं स्वरपश्च देवीः ।
ससान यः पृथिवीं द्यामुतेमामिन्द्रं मदन्त्यनु धीरणासः ॥ ८ ॥

इंद्रः । तुजः । बर्हणाः । आ । विवेश । नृऽवत् । दधानः । नर्या । पुरूणि । अचेतयत् । धियः । इमाः । जरित्रे । प्र । इमं । वर्णं । अतिरत् । शुक्रं । आसां ॥ ५ ॥ १५ ॥
महः । महानि । पनयंति । अस्य । इंद्रस्य । कर्म । सुऽकृता । पुरूणि । वृजनेन । वृजिनान् । सं । पिपेष । मायाभिः । दस्यून् । अभिभूतिऽओजाः ॥ ६ ॥ युधा । इंद्रः । मह्ना । वरिवः । चकार । देवेभ्यः । सत्ऽपतिः । चर्षणिऽप्राः । विवस्वतः । सदने । अस्य । तानि । विप्राः । उक्थेभिः । कवयः । गृणंति ॥ ७ ॥ सत्राऽसहं । वरेण्यं । सहःऽदां । ससऽवांसं । स्वः । अपः । च । देवीः । ससानं । यः । पृथिवीं । द्यां । उत । इमां । इंद्रं । मदंति । अनु । धीऽरणासः ॥ ८ ॥

ससानात्याँ उत सूर्यं ससानेन्द्रः ससान पुरुभोजसं गाम् ।
हिरण्ययमुत भोगं ससान हत्वी दस्यून्प्रार्यं वर्णमावत् ॥ ९ ॥

इन्द्र ओषधीरसनोदहानि वनस्पतीँरसनोदन्तरिक्षम् ।
बिभेद वलं नुनुदे विवाचोऽथाभवदमिताभिक्रतूनाम् ॥ १० ॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि सञ्जितं धनानाम् ॥ ११ ॥ १६ ॥

॥ ३५ ॥ ऋषिः—विश्वामित्रः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥ ३५ ॥ तिष्ठा हरी रथ आ युज्यमाना याहि वायुर्न नियुतो नो अच्छ ।
पिबास्यन्धो अभिसृष्टो अस्मे इन्द्र स्वाहा रिरिमा ते मदाय ॥ १ ॥

ससानं । अत्यान् । उत । सूर्यं । ससान । इंद्रः । ससान । पुरुऽभोजसं । गां ।
हिरण्ययं । उत । भोगं । ससान । हत्वी । दस्यून् । प्र । आर्यं । वर्णं । आवत् ॥९॥
इंद्रः । ओषधीः । असनोत् । अहानि । वनस्पतीन् । असनोत् । अंतरिक्षं । विभेद ।
वलं । नुनुदे । विऽवाचः । अथ । अभवत् । दमिता । अभिऽक्रतूनां ॥ १० ॥
शुनं । हुवेम । मघऽवानं । इंद्रं । अस्मिन् । भरे । नृऽतमं । वाजऽसातौ । शृण्वंतं ।
उग्रं । ऊतये । समत्ऽसु । घ्नंतं । वृत्राणि । संऽजितं । धनानां ॥ ११ ॥ १६ ॥
तिष्ठ । हरी इति । रथे । आ । युज्यमाना । याहि । वायुः । न । निऽयुतः ।
नः । अच्छ । पिबसि । अंधः । अभिऽसृष्टः । अस्मे इति । इंद्र । स्वाहा । ररिम ।
ते । मदाय ॥ १ ॥

उपाजिरा पुरुहूताय सप्ती हरी रथस्य धूर्ष्वा युनज्मि ।
द्रवद्यथा सम्भृतं विश्वतश्चिदुपेमं यज्ञमा वहात इन्द्रम् ॥ २ ॥
उपो नयस्व वृषणा तपुष्पोतेमव त्वं वृषभ स्वधावः ।
ग्रसेतामश्वा वि मुचेह शोणा दिवेदिवे सदृशीरद्धि धानाः ॥ ३ ॥
ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी सखाया सधमादे आशू ।
स्थिरं रथं सुखमिन्द्राधितिष्ठन्प्रजानन्विद्वाँ उप याहि सोमम् ॥ ४ ॥
मा ते हरी वृषणा वीतपृष्ठा नि रीरमन्यजमानासो अन्ये ।
अत्यायाहि शश्वतो वयं तेऽरं सुतेभिः कृणवाम सोमैः ॥ ५ ॥ १७ ॥

उप । अजिरा । पुरुऽहूताय । सप्ती इति । हरी इति । रथस्य । धूःऽसु । आ । युनज्मि । द्रवत् । यथा । संऽभृतं । विश्वतः । चित् । उप । इमं । यज्ञं । आ । वहातः । इंद्रं ॥ २ ॥ उपो इति । नयस्व । वृषणा । तपुःऽपा । उत । ईं । अव । त्वं । वृषभ । स्वधाऽवः । ग्रसेतां । अश्वा । वि । मुच । इह । शोणा । दिवेऽदिवे । सऽदृशीः । अद्धि । धानाः ॥ ३ ॥ ब्रह्मणा । ते । ब्रह्मऽयुजा । युनज्मि । हरी इति । सखाया । सधऽमादे । आशू इति । स्थिरं । रथं । सुऽखं । इंद्र । अधिऽतिष्ठन् । प्रऽजानन् । विद्वान् । उप । याहि । सोमं ॥ ४ ॥ मा । ते । हरी इति । वृषणा । वीतऽपृष्ठा । नि । रीरमन् । यजमानासः । अन्ये । अतिऽआयाहि । शश्वतः । वयं । ते । अरं । सुतेभिः । कृणवाम । सोमैः ॥ ५ ॥ १७ ॥

तवायं सोमस्त्वमेह्यर्वाङ् शश्वत्तमं सुमना अस्य पाहि ।
अस्मिन्यज्ञे बर्हिष्या निषद्या दधिष्वेमं जठर इन्दुमिन्द्र ॥ ६ ॥
स्तीर्णं ते बर्हिः सुत इन्द्र सोमः कृता धाना अत्तवे ते हरिभ्याम् ।
तदोकसे पुरुशाकाय वृष्णे मरुत्वते तुभ्यं राता हवींषि ॥ ७ ॥
इमं नरः पर्वतास्तुभ्यमापः समिन्द्र गोभिर्मधुमन्तमक्रन् ।
तस्यागत्या सुमना ऋष्व पाहि प्रजानन्विद्वान्पथ्या३अनु स्वाः ॥ ८ ॥
याँ आभजो मरुत इन्द्र सोमे ये त्वामवर्धन्नभवन्गणास्ते ।
तेभिरेतं सजोषा वावशानो३ग्नेः पिब जिह्वया सोममिन्द्र ॥ ९ ॥

तव । अयं । सोमः । त्वं । आ । इहि । अर्वाङ् । शश्वत्ऽतमं । सुऽमनाः । अस्य । पाहि । अस्मिन् । यज्ञे । बर्हिषि । आ । निऽसद्य । दधिष्व । इमं । जठरे । इंदुं । इंद्र ॥ ६ ॥ स्तीर्णं । ते । बर्हिः । सुतः । इंद्र । सोमः । कृताः । धानाः । अत्तवे । ते । हरिऽभ्यां । तत्ऽओकसे । पुरुऽशाकाय । वृष्णे । मरुत्वते । तुभ्यं । राता । हवींषि ॥ ७ ॥ इमं । नरः । पर्वताः । तुभ्यं । आपः । सं । इंद्र । गोभिः । मधुऽमंतं । अक्रन् । तस्य । आऽगत्य । सुऽमनाः । ऋष्व । पाहि । प्रऽजानन् । विद्वान् । पथ्याः । अनु । स्वाः ॥ ८ ॥ यान् । आ । अभजः । मरुतः । इंद्र । सोमे । ये । त्वां । अवर्धन् । अभवन् । गणः । ते । तेभिः । एतं । सऽजोषाः । वावशानः । अग्नेः । पिब । जिह्वया । सोमं । इंद्र ॥ ९ ॥

इन्द्र पिबं स्वधया चित्सुतस्याग्नेर्वा पाहि जिह्वया यजत्र ।
अध्वर्योर्वा प्रयतं शक्र हस्ताद्धोतुर्वा यज्ञं हविषो जुषस्व ॥ १० ॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि सञ्जितं धनानाम् ॥ ११ ॥ १८ ॥

॥ ३६ ॥ ऋषिः—विश्वामित्रः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥ १६ ॥ इमामू षु प्रभृतिं सातयें धाः शश्वच्छश्वदूतिभिर्यादमानः ।
सुतेसुते वावृधे वर्धनेभिर्यः कर्मभिर्महद्भिः सुश्रुतो भूत् ॥ १ ॥
इन्द्राय सोमाः प्रदिवो विदाना ऋभुर्येभिर्वृषपर्वा विहायाः ।
प्रयम्यमानान्प्रति षू गृभायेन्द्र पिब वृषधूतस्य वृष्णः ॥ २ ॥

इंद्र । पिबं । स्वधया । चित् । सुतस्य । अग्नेः । वा । पाहि । जिह्वया । यजत्र । अध्वर्योः । वा । प्रऽयतं । शक्र । हस्तात् । होतुः । वा । यज्ञं । हविषः । जुषस्व ॥ १० ॥ शुनं । हुवेम । मघऽवानं । इंद्रं । अस्मिन् । भरे । नृऽतमं । वाजऽसातौ । शृण्वंतं । उग्रं । ऊतये । समत्ऽसु । घ्नंतं । वृत्राणि । संऽजितं । धनानां ॥ ११ ॥ १८ ॥

इमां । ऊं इति । सु । प्रऽभृतिं । सातयें । धाः । शश्वत्ऽशश्वत् । ऊतिऽभिः । यादमानः । सुतेऽसुते । वावृधे । वर्धनेभिः । यः । कर्मऽभिः । महत्ऽभिः । सुऽश्रुतः । भूत् ॥ १ ॥ इंद्राय । सोमाः । प्रऽदिवः । विदानाः । ऋभुः । येभिः । वृषऽपर्वा । विऽहायाः । प्रऽयम्यमानान् । प्रति । सु । गृभाय । इंद्र । पिब । वृषऽधूतस्य । वृष्णः ॥ २ ॥

पिबा वर्धस्व तवं घा सुतास इन्द्र सोमासः प्रथमा उतेमे ।
यथापिबः पूर्व्याँ इन्द्र सोमाँ एवा पाहि पन्यो अद्या नवीयान् ॥ ३ ॥
महाँ अमंत्रो वृजनें विरप्श्युग्रं शवः पत्यते धृष्णवोजः ।
नाहं विव्याच पृथिवी चनैनं यत्सोमासो हर्यश्वमंमन्दन् ॥ ४ ॥
महाँ उग्रो बावृधे वीर्यांय समार्चक्रे वृषभः काव्येन ।
इन्द्रो भगो वाजदा अस्य गावः प्र जायन्ते दक्षिणा अस्य पूर्वीः ॥५॥१९॥
प्र यत्सिन्धवः प्रसवं यथायन्नापः समुद्रं रथ्येव जग्मुः ।
अतश्चिदिन्द्रः सदसो वरीयान्यदीं सोमः पृणतिं दुग्धो अंशुः ॥ ६ ॥

पिब । वर्धस्व । तवं । घ । सुतासः । इंद्र । सोमासः । प्रथमाः । उत । इमे । यथा ।
अपिबः । पूर्व्यान् । इंद्र । सोमान् । एव । पाहि । पन्यः । अद्य । नवीयान् ॥ ३ ॥
महान् । अमंत्रः । वृजनें । विऽरप्शी । उग्रं । शवः । पत्यते । धृष्णु । ओजः । न ।
अहं । विव्याच । पृथिवी । चन । एनं । यत् । सोमासः । हरिंऽअश्वं । अमंदन् ॥४॥
महान् । उग्रः । ववृधे । वीर्यांय । संऽआर्चक्रे । वृषभः । काव्येन । इंद्रः । भगः ।
वाजऽदाः । अस्य । गावः । प्र । जायंते । दक्षिणाः । अस्य । पूर्वीः ॥ ५ ॥ १९ ॥
प्र । यत् । सिंधवः । प्रऽसवं । यथा । आयन् । आपः । समुद्रं । रथ्याऽइव । जग्मुः ।
अतः । चित् । इंद्रः । सदसः । वरीयान् । यत् । ईं । सोमः । पृणतिं । दुग्धः ।
अंशुः ॥ ६ ॥

समुद्रेण सिन्धवो यादमाना इन्द्राय सोमं सुषुतं भरन्तः ।
अंशुं दुहन्ति हस्तिनो भरित्रैर्मध्वः पुनन्ति धारया पवित्रैः ॥ ७ ॥
हृदा इव कुक्ष्यः सोमधानाः समी विव्याच सवना पुरूणि ।
अन्ना यदिन्द्रः प्रथमा व्याश वृत्रं जघन्वाँ अवृणीत सोमम् ॥ ८ ॥
आ तू भर माकिरेतत्परि ष्ठाद्विद्मा हि त्वा वसुपतिं वसूनाम् ।
इन्द्र यत्ते माहिनं दत्रमस्त्यस्मभ्यं तद्धर्यश्व प्र यन्धि ॥ ९ ॥
अस्मे प्र यन्धि मघवन्नृजीषिन्निन्द्र रायो विश्ववारस्य भूरेः ।
अस्मे शतं शरदो जीवसे धा अस्मे वीराञ्छश्वत इन्द्र शिप्रिन् ॥ १० ॥

समुद्रेण । सिन्धवः । यादमानाः । इंद्राय । सोमं । सुऽसुतं । भरंतः । अंशुं । दुहंति । हस्तिनः । भरित्रैः । मध्वः । पुनंति । धारया । पवित्रैः ॥ ७ ॥ हृदाःऽइव । कुक्ष्यः । सोमऽधानाः । सं । ईमिति । विव्याच । सवना । पुरूणि । अन्ना । यत् । इंद्रः । प्रथमा । वि । आश । वृत्रं । जघन्वान् । अवृणीत । सोमं ॥ ८ ॥ आ । तु । भर । माकिः । एतत् । परि । स्थात् । विद्म । हि । त्वा । वसुऽपतिं । वसूनां । इंद्र । यत् । ते । माहिनं । दत्रं । अस्ति । अस्मभ्यं । तत् । हरिऽअश्व । प्र । यंधि ॥ ९ ॥ अस्मे इति । प्र । यंधि । मघऽवन् । ऋजीषिन् । इंद्र । रायः । विश्वऽवारस्य । भूरेः । अस्मे इति । शतं । शरदः । जीवसे । धाः । अस्मे इति । वीरान् । शश्वतः । इंद्र । शिप्रिन् ॥ १० ॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि सञ्जितं धनानाम् ॥ ११ ॥ २० ॥

॥ ३७ ॥ ऋषिः-विश्वामित्रः । देवता-इन्द्रः । छन्दः-गायत्री ॥

॥ ३७ ॥ वात्रैहत्याय शवसे पृतनाषाह्याय च । इन्द्र त्वा वर्तयामसि ॥१॥
अर्वाचीनं सु ते मन उत चक्षुः शतक्रतो । इन्द्र कृण्वन्तु वाघतः ॥ २ ॥
नामानि ते शतक्रतो विश्वाभिर्गीर्भिरीमहे । इन्द्राभिमातिषाह्ये ॥ ३ ॥
पुरुष्टुतस्य धामभिः शतेन महयामसि । इन्द्रस्य चर्षणीधृतः ॥ ४ ॥
इन्द्रं वृत्राय हन्तवे पुरुहूतमुप ब्रुवे । भरेषु वाजसातये ॥ ५ ॥ २१ ॥

शुनं । हुवेम । मघऽवानं । इंद्रं । अस्मिन् । भरे । नृऽतमं । वाजऽसातौ । शृण्वंतं । उग्रं । ऊतये । समत्ऽसु । घ्नंतं । वृत्राणि । संऽजितं । धनानां ॥ ११ ॥ २० ॥

वात्रैऽहत्याय । शवसे । पृतनाऽसाह्याय । च । इंद्र । त्वा । आ । वर्तयामसि ॥ १॥
अर्वाचीनं । सु । ते । मनः । उत । चक्षुः । शतक्रतो इति शतऽक्रतो । इंद्र । कृण्वंतु । वाघतः ॥ २ ॥ नामानि । ते । शतक्रतो इति शतऽक्रतो । विश्वाभिः । गीःऽभिः । ईमहे । इंद्र । अभिमातिऽसहे ॥ ३ ॥ पुरुऽस्तुतस्य । धामऽभिः । शतेन । महयामसि । इंद्रस्य । चर्षणिऽधृतः ॥ ४ ॥ इंद्रं । वृत्राय । हंतवे । पुरुऽहूतं । उप । ब्रुवे ॥ भरेषु । वाजंऽसातये ॥ ५ ॥ २१ ॥

वाजेषु सासहिर्भव त्वामीमहे शतक्रतो । इन्द्र वृत्राय हन्तवे ॥ ६ ॥
द्युम्नेषु पृतनाज्ये पृत्सुतूर्षु श्रवःसु च । इन्द्र साक्ष्वाभिमातिषु ॥ ७ ॥
शुष्मिन्तमं न ऊतये द्युम्निनं पाहि जागृविम् । इन्द्र सोमं शतक्रतो ॥८॥
इन्द्रियाणि शतक्रतो या ते जनेषु पञ्चसु । इन्द्र तानि त आ वृणे ॥ ९ ॥
अगन्निन्द्र श्रवो बृहद्द्युम्नं दधिष्व दुष्टरम् । उत्ते शुष्मं तिरामसि ॥ १० ॥
अर्वावतो न आ गह्यथो शक्र परावतः ।
उ लोको यस्ते अद्रिव इन्द्रेह तत आ गहि ॥ ११ ॥ २२ ॥

वाजेषु । ससहिः । भव । त्वां । ईमहे । शतक्रतो इति शतऽक्रतो । इंद्र । वृत्राय । हंतवे ॥ ६ ॥ द्युम्नेषु । पृतनाज्ये । पृत्सुतूर्षु । श्रवःऽसु । च । इंद्र । साक्ष्व । अभिऽमातिषु ॥ ७ ॥ शुस्मिन्ऽतमं । नः । ऊतये । द्युम्निनं । पाहि । जागृविं । इंद्र । सोमं । शतक्रतो इति शतऽक्रतो ॥ ८ ॥ इंद्रियाणि । शतक्रतो इति शतऽक्रतो । या । ते । जनेषु । पंचऽसु । इंद्र । तानि । ते । आ । वृणे ॥ ९ ॥ अगन् । इंद्र । श्रवः । बृहत् । द्युम्नं । दधिष्व । दुस्तरं । उत् । ते । शुष्मं । तिरामसि ॥ १० ॥ अर्वाऽवतः । नः । आ । गहि । अथो इति । शक्र । पराऽवतः । उं इति । लोकः । यः । ते । अद्रिऽवः । इंद्र । इह । ततः । आ । गहि ॥ ११ ॥ २२ ॥

॥ ३८ ॥ ऋषिः-प्रजापतिः । देवता-इन्द्रः । छन्दः-त्रिष्टुप् ॥

॥ ३८ ॥ अभि तष्टेव दीधया मनीषामत्यो न वाजी सुधुरो जिहानः ।
अभि प्रियाणि मर्मृशत्परांणि कँवीरिच्छामि सन्दृशे सुमेधाः ॥ १ ॥
इनोत पृच्छ जनिमा कवीनां मनोधृतः सुकृतस्तक्षत द्याम् ।
इमा उ ते प्रण्योऽवर्धमाना मनोवाता अध नु धर्मणि ग्मन् ॥ २ ॥
नि षीमिदत्र गुह्या दधाना उत क्षत्राय रोदसी समञ्जन् ।
सं मात्राभिर्ममिरे येमुरुर्वी अन्तर्महो समृते धायसे धुः ॥ ३ ॥
आतिष्ठन्तं परि विश्वे अभूषञ्छ्रिय वसानश्चरति स्वरोचिः ।
महत्तद्वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थौ ॥ ४ ॥

अभि । तष्टाऽइव । दीधय । मनीषां । अत्यः । न । वाजी । सुऽधुरः । जिहानः । अभि । प्रियाणि । मर्मृशत् । परांणि । कवीन । इच्छामि । संऽदृशे । सुऽमेधाः ॥ १ ॥ इना । उत । पृच्छ । जनिम । कवीनां । मनःऽधृतः । सुऽकृतः । तक्षत । द्यां । इमाः । ऊं इति । ते । प्रऽन्यः । वर्धमानाः । मनःऽवाताः । अध । नु । धर्मणि । ग्मन् ॥ २ ॥ नि । सीं । इत् । अत्र । गुह्या । दधानाः । उत । क्षत्राय । रोदसी इति । सं । अंजन् । सं । मात्राभिः । ममिरे । येमुः । उर्वी इति । अंतः । मही इति । समृते इति संऽऋते । धायसे । धुरिति धुः ॥ ३ ॥ आऽतिष्ठंतं । परि । विश्वे । अभूषन् । श्रियः । वसानः । चरति । स्वऽरोचिः । महत् । तत् । वृष्णः । असुरस्य । नाम । आ । विश्वऽरूपः । अमृतानि । तस्थौ ॥ ४ ॥

असूत पूर्वो वृषभो ज्यायानिमा अस्य शुरुधः सन्ति पूर्वीः ।
दिवो नपाता विदथस्य धीभिः क्षत्रं राजाना प्रदिवो दधाथे ॥ ५ ॥ २३ ॥
त्रीणि राजाना विदथे पुरूणि परि विश्वानि भूषथः सदांसि ।
अपश्यमत्र मनसा जगन्वान्व्रते गन्धर्वाँ अपि वायुकेशान् ॥ ६ ॥
तदिद्धास्य वृषभस्य धेनोरा नामभिर्ममिरे सक्म्यं गोः ।
अन्यदन्यदसुर्यं वसाना नि मायिनो ममिरे रूपमस्मिन् ॥ ७ ॥
तदिद्धास्य सवितुर्नकिर्मे हिरण्ययीममतिं यामशिश्रेत् ।
आ सुष्टुती रोदसी विश्वमिन्वे अपीव योषा जनिमानि वव्रे ॥ ८ ॥

असूत । पूर्वः । वृषभः । ज्यायान् । इमाः । अस्य । शुरुधः । सन्ति । पूर्वीः । दिवः । नपाता । विदथस्य । धीभिः । क्षत्रं । राजाना । प्रऽदिवः । दधाथे इति ॥ ५ ॥ २३ ॥
त्रीणि । राजाना । विदथे । पुरूणि । परि । विश्वानि । भूषथः । सदांसि । अपश्यं । अत्र । मनसा । जगन्वान् । व्रते । गंधर्वान् । अपि । वायुऽकेशान् ॥ ६ ॥ तत् । इत् । नु । अस्य । वृषभस्य । धेनोः । आ । नामऽभिः । ममिरे । सक्म्यं । गोः ।
अन्यत्ऽअन्यत् । असुर्यं । वसानाः । नि । मायिनः । ममिरे । रूपं । अस्मिन् ॥ ७ ॥
तत् । इत् । नु । अस्य । सवितुः । नकिः । मे । हिरण्ययीं । अमतिं । यां । अशिश्रेत् ।
आ । सुऽस्तुती । रोदसी इति । विश्वमिन्वे इति विश्वंऽइन्वे । अपिंऽइव । योषां ।
जनिमानि वव्रे ॥ ८ ॥

युवं प्रत्नस्य साधथो महो यद्दैवीं स्वस्तिः परिं णः स्यातम् ।
गोपाजिह्वस्य तस्थुषो विरूपा विश्वे पश्यन्ति मायिनः कृतानिं ॥ ९ ॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतयें समत्सु घ्नन्तं वृत्राणिं सञ्जितं धनानाम् ॥ १० ॥ २४ ॥ ३ ॥

॥ चतुर्थोऽनुवाकः ॥ ४ ॥

॥ ३९ ॥ ऋषिः—विश्वामित्रः । देवता—इन्द्रः । छन्दः—त्रिष्टुप् ॥

॥ ३९ ॥ इन्द्रं मतिर्हृद आ वच्यमानाच्छा पतिं स्तोमंतष्टा जिगाति ।
या जार्गृविर्विदथें शस्यमानेन्द्र यत्ते जायंते विद्धि तस्यं ॥ १ ॥

युवं । प्रत्नस्य । साधथः । महः । यत् । दैवीं । स्वस्तिः । परिं । नः । स्यातं ।
गोपाजिह्वस्य । तस्थुषः । विऽरूपा । विश्वे । पश्यंति । । मायिनः । कृतानिं ॥ ९ ॥
शुनं । हुवेम । मघऽवांनं । इंद्रं । अस्मिन् । भरें । नृऽतमं । वाजंऽसातौ । शृण्वंतं ।
उग्रं । ऊतयें । समत्ऽसुं । घ्नंतं । वृत्राणि । संऽजितं । धनांनां ॥ १० ॥ २४ ॥ ३ ॥

इंद्रं । मतिः । हृदः । आ । वच्यमांना । अच्छं । पतिं । स्तोमंऽतष्टा ।
जिगाति । या । जार्गृविः । विदथें । शस्यमांना । इंद्रं । यत् । ते । जायंते । विद्धि ।
तस्यं ॥ १ ॥

दिवश्चिदा पूर्व्या जायमाना वि जागृविर्विदथे शस्यमाना ।
भद्रा वस्त्राण्यर्जुना वसाना सेयमस्मे सनजा पित्र्या धीः ॥ २ ॥
यमा चिदत्र यमसूरसूत जिह्वाया अग्रं पतदा ह्यस्थात् ।
वपूंषि जाता मिथुना सचेते तमोहना तपुषो बुध्न एता ॥ ३ ॥
नकिरेषां निन्दिता मर्त्येषु ये अस्माकं पितरो गोषु योधाः ।
इन्द्र एषां दंहिता माहिनावानुद्गोत्राणि ससृजे दंसनावान् ॥ ४ ॥
सखा ह यत्र सखिभिर्नवग्वैरभिज्ञ्वा सत्वभिर्गा अनुग्मन् ।
सत्यं तदिन्द्रो दशभिर्दशग्वैः सूर्यं विवेद तमसि क्षियन्तम् ॥ ५ ॥ २५ ॥

दिवः । चित् । आ । पूर्व्या । जायमाना । वि । जागृविः । विदथे । शस्यमाना ।
भद्रा । वस्त्राणि । अर्जुना । वसाना । सा । इयं । अस्मे इति । सनऽजा । पित्र्या ।
धीः ॥ २ ॥ यमा । चित् । अत्र । यमऽसूः । असूत । जिह्वायाः । अग्रं । पतत् ।
आ । हि । अस्थात् । वपूंषि । जाता । मिथुना । सचेते इति । तमःऽहना । तपुषः ।
बुध्ने । आऽइता ॥ ३ ॥ नकिः । एषां । निंदिता । मर्त्येषु । ये । अस्माकं । पितरः ।
गोषु । योधाः । इंद्रः । एषां । दंहिता । माहिनऽवान् । उत् । गोत्राणि । ससृजे ।
दंसनाऽवान् ॥ ४ ॥ सखा । ह । यत्र । सखिऽभिः । नवऽग्वैः । अभिऽज्ञु । आ ।
सत्वऽभिः । गाः । अनुऽग्मन् । सत्यं । तत् । इंद्रः । दशऽभिः । दशऽग्वैः । सूर्यं ।
विवेद् । तमसि । क्षियंतं ॥ ५ ॥ २५ ॥

इन्द्रो मधु सम्भृतमुस्रियायां पद्वद्विवेद शफवन्नमे गोः ।
गुहा हितं गुह्यं गूळ्हमप्सु हस्ते दधे दक्षिणे दक्षिणावान् ॥ ६ ॥
ज्योतिर्वृणीत तमसो विजानन्नारे स्याम दुरितादभीके ।
इमा गिरः सोमपाः सोमवृद्ध जुषस्वेन्द्र पुरुतमस्य कारोः ॥ ७ ॥
ज्योतिर्यज्ञाय रोदसी अनु ष्यादारे स्याम दुरितस्य भूरेः ।
भूरि चिद्धि तुजतो मर्त्यस्य सुपारासो वसवो बर्हणावत् ॥ ८ ॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि सञ्जितं धनानाम् ॥ ९ ॥ २६ ॥ २ ॥

इंद्रः । मधु । संऽभृतं । उस्रियायां । पत्ऽवत् । विवेद । शफऽवत् । नमे । गोः । गुहा । हितं । गुह्यं । गूळ्हं । अप्ऽसु । हस्ते । दधे । दक्षिणे । दक्षिंऽणवान् ॥६॥ ज्योतिः । वृणीत । तमसः । विऽजानन् । आरे । स्याम । दुःऽइतात् । अभीके । इमाः । गिरः । सोमऽपाः । सोमऽवृद्ध । जुषस्व । इंद्र । पुरुऽतमस्य । कारोः ॥ ७ ॥ ज्योतिः । यज्ञाय । रोदसी इति । अनु । स्यात् । आरे । स्याम । दुःऽइतस्य । भूरेः । भूरि । चित् । हि । तुजतः । मर्त्यस्य । सुऽपारासः । वसवः । बर्हणाऽवत् ॥ ८ ॥ शुनं । हुवेम । मघऽवानं । इंद्रं । अस्मिन् । भरे । नृऽतमं । वाजऽसातौ । शृण्वंतं । उग्रं । ऊतये । समत्ऽसु । घ्नंतं । वृत्राणि । संऽजितं । धनानां ॥ ९ ॥ २६ ॥ २ ॥

॥ इति तृतीयाष्टके द्वितीयोऽध्यायः ॥ २ ॥

Adhyaya 5.

SOOKTA 184.

Rishi-Agastya; Deity-Ashwins.

We shall invoke you with hymns today tomorrow and thereafter. Here is your holy priest (ready with his offering) as soon as the Dawn breaks out. Wherever you may be O Nasatyas sons of Heaven, we your devoted servants (shall always pray) for our liberal patron. 1

Rejoice O valiant gods in our sacrificial rite, and flushed with joy slay the wretched niggard. Ye heroes adored with excellent hymns and fully aware of (the worshipper's) inmost feelings, hearken unto my prayers with your own ears. 2

O Pushan, (praised are) the two refulgent Divinities, so that they the truthful Ashwins darting forward like a shaft, may be taken to the wedding of Surya; your eminent steeds O Ashwins, are (also) extolled-steeds sprung from heavenly waters like the ancient pair of Varuna the Almighty God. 3

Bestow upon us your greatest gift, ye that always taste the sweet mead, and appreciate this ode sung by your esteened poet. (See ye that) to achieve the deeds of valour people have always rejoiced to sing your glorious exploits. 4

---

१ हे नासत्या, अयं वल्हिः; तौ वाम् अद्य उच्छन्त्याम् उषसि तौ (वाम्) अपरं च उक्थैः हुवेम । हे दिवः नपातः, कुहचित् सन्तौ (वाम्, वयं) अर्यः सुदास्तराय (यजमानाय) हुवेम ।

२ हे वृषणा, अस्मे (अध्वरे) उप मादयेथाम्, (प्रेम्णः) ऊर्म्या मदन्ता च पणीन् उद्वतम् । हे नरा, अच्छोक्तिभिः एष्टा, मतीनाम् च निचेतारा (यूयम्) कर्णैः मे (इवं) श्रुतम् ।

३ हे पूषन् इषुकृतेव (सन्तौ) नासत्या देवा सूर्यायाः श्रिये वहतुम् (एतौ भक्ताः स्तुवन्ति), हे अश्विना वाम् अप्सुजाता ककुहाः भूरेः वरुणस्य जूर्णा युगाइव वच्यते ।

४ हे माध्वी, सावां रात्तिः अस्मे अस्तु, आन्यस्य कारोः स्तोमं हिनोत । हे सुदानू, यत् सुवीर्याय (सर्वे) चर्षणयः वाम् (यशसः) श्रवस्या अनुमदन्ति ।

This your hymn is, O bounteous Ashwins, sung by us the sons of Mana. Come then to our house for us as well as for our sons, and find delight O Nasatyas in me, Agastya your adorer. 5

We have clearly got out of this darkness (of ignorance), and have sung this hymn, O Ashwins, in your honour. Come hither then by paths worthy of gods (like you) that we may enjoy your refreshing support that flourishes quickly. 6 (1)

SOOKTA 185.

Rishi–Agastya; Deity–Heaven-and-earth.

Which of these two is the elder and which younger ? Does any one know, O sages, how they were born ? These themselves sustain all that exists (in this universe) whence the cycle of the Day and Night is rolling onward like a wheel. 1

Though footless and consequently not walking (like us), both of them maintain their countless offsprings endowed with feet and able to work. Like the darling son (sporting) on his parents' knees, preserve us O Heaven and Earth from frightful danger. 2

---

५ हे मघवाना अश्विना, एषवाम् स्तोमः मानेभिः सुवृक्ति अकारि । नासत्या, तनयाय त्मनेच वर्तिः यातम्, अगस्त्ये च मदन्ता (भवतम्)।

६ अस्य तमसः पारम् अतारिष्म । अश्विना एष स्तोमः वाम् प्रति अधायि । देवयानैः पथिभिः इह आ यातम् (येन) इषं जीरदानुं वृजनम् विद्याम ।

१ कवयः, अयोः कतरा पूर्वा, कतरा परा, कथा जाते (इति) को वि वेद । यत् ह विश्वंनाम त्मना बिभ्रतः, (येन) अहनी चक्रियेव वि वर्तेते ।

२ (यदि) द्वे अपदी (सत्यौ पद्भ्याम्) अचरन्ती, चरन्तम् पद्वन्तं भूरिं गर्भम् दधाते । नित्यं सूनुं पित्रोः उपस्थे न, हे द्यावापृथिवी नः अभ्वात् रक्षतं ।

I pray to (God's) infinite generosity (which like His weapon is) stainless, perfect, divine, deathless and commanding respect. Secure that gift, O ye twin Spheres, to him who praises you and protect us O Heaven and Earth from frightful danger. 3

We should closely follow them who never suffer any harm, who Parents of the gods, succour others with their favour and who by turns stay among the gods day and night. Preserve us therefore O Heaven and Earth from frightful danger. 4

Going together and young, sisters or kinswomen, with boundaries intermingled, ye kiss the scion of the world (sporting) on his parents' lap. Preserve us then O Heaven and Earth from frightful danger. 5 (2)

To the two vast abodes (of all) and mighty mothers of the gods, through affection I pray by means of the true worship. (I pray) to them who lovely in appearance have held immortality (for the worshipper). Preserve us then O Heaven and Earth from fearful danger. 6

---

३ अदितेः अनेहः स्ववेत अवधं नमस्वत् दात्रं हुवे । तत् हे रोदसी जरित्रे जनयतम् हे द्यावापृथिवी नः अभ्वात् रक्षतम् ।

४ अतप्यमाने अवसा अवन्ती रोदसी देवपुत्रे अनुष्याम उभे (युवां) अल्हाम् उभयेभिः देवानाम् (मध्ये वतेथे) । तत् हे द्यावापृथिवी नः अभ्वात् रक्षतम् ।

५ (युवां) संगच्छमाने, युवती, समन्ते, स्वसारा, जामीच (स्तः), पित्रोरुपस्थे भुवनस्य नाभिम् अभि जिघ्रन्ती हे द्यावापृथिवी युवाम् अभ्वात् नः रक्षतम् ।

६ ऊर्वी सद्मनी बृहती अवसा च देवानां जनित्री ऋतेन हुवे । ये (युवां) सुप्रतीके अमृतं दधाते, ते हे द्यावापृथिवी युवां नः अभ्वात् रक्षतम् ।

The two vast immense mighty and boundless Powers, I humbly beseech in this sacrifice, and (I pray to them) who blessed and happy easily secure success (to the worshipper); protect us then ye Heaven and Earth from fearful danger. 7

Whatever sins we may have at any time committed against the gods, against our friend or liege lord, may this hymn be the atonement thereof and protect us O Heaven and Earth from fearful danger. 8

May they both laudable and friendly to men protect me, and may both attend me with their favour and succours. Would that, we your worshippers strongly exultant with the freshness (of piety), might move ye O gods in favour of our patrons. 9

Endowed (through their favour) with intellect I have sung this truthful hymn, to the Heaven and Earth that they might listen to it first of all. From reproach and calumny may they Father and Mother, preserve us and protect us with their beneficent attentions. 10

Heaven and Earth ! may this prayer be truly answered, which O Father and Mother I have addressed unto you. Nearest than the gods be ye to us with your favours and may we get that support which flourishes quickly. 11 (3)

---

७ ऊर्वी पृथ्वी बहुले दूरे अन्ते (वाम्) अस्मिन् यज्ञे नमसा उपब्रुवे । ये (युवां) सुभगे सुप्रतूर्ती (सर्वान्) दधाते ते, द्यावापृथिवी युवां अभ्वात् नः रक्षत ।

८ यत् कश्चित् आगः देवान्, सखायं वा सदमित् जास्पतिं वा चकृम, एषां इत्थं धीः अवयानं भूयाः । तत् हे द्यावापृथिवी अभ्वात् नः रक्षतं ।

९ धीरा, नर्या एते उभा माम् अविष्टाम्, उभे ऊती अवसा च माम् सचेतां । हे देवाः (वयं) अर्यः इषा भूरि चित् मदन्तः (वाम्) सुदास्तराय इषयेम ।

१० (तयोः एवअवसा) सुमेधाः तत् (इदं) कृतं (स्तवनं) दिवे पृथिव्यैच अभिश्रावाय प्रथमं अवोचम् । (तत् युवाम्) अवघात् दुरितात् अभीके पाताम्, पिता माता च अवोभिः रक्षताम् ।

११ हे द्यावापृथिवी, हे पितः मातः यद् इह वां उपब्रुवे तत् सत्यं अस्तु । अवोभिः देवानामपि अवमे भूतम् (येन वयं) इषं जीर दाशुषे वृजनं विद्याम ।

SOOKTA 186.

Rishi-Agastya; Deity-Visve-Devah.

Highly pleased with our glorious offerings and excellent prayers, may the Enlivening God loved by all come to our sacrificial assembly, that O youthful gods ye may, when you come, delight us as well as the world by your (super-human) knowledge. 1

To us may come all the gods united together-Mitra Aryaman and Varuna the merciful God; that all may conduce to our prosperity through their might, may they keep our powers free from slackness. 2

With hymns I praise your dearest guest Agni hastening (to the worshippers) and merciful; so that God Varuna of holy glory may be with us and that He the Lord praised by adorers may send to us refreshing strength. 3

To ye I approach with obeisance and hopes of success, O Night and Morn that are like a cow with plenty of sweet milk. While I can measure out in the same day (only) *one* hymn in your honour ye can bear milk of *various* sorts in your self-same udder. 4

---

१ विश्वानरः, देवः सविता नः इळाभिः सुशस्ति च विदथे आएतु । यथा हे युवानः (युष्माकं) अभिपित्वे मनीषा, नः विश्वं जगच्चापि मत्सथ ।

२ आस्काः विश्वे देवाः, मित्रः अर्यमा, सजोषाः वरुणः च नः आ गमन्तु । यथा (ते) विश्वे नः वृधासः भुवन्, सुसहा शवः विथुरं न करन् ।

३ वः प्रेष्ठं अतिथिम् अग्निम् शस्तिभिः गृणीषे । (सोपि) सजोषाः तुर्वणिश्च । यथा सुकीर्तिः सूरिः च वरुणः नः असत्, अरिगूर्तः (सः यथा नः) इषः पर्षत् (तथा कृणुत) ।

४ उषसानक्ता सुदुघा धेनुरिव (युवां, । तत्) वः नमसा जिगीषा च उप एवे । (युवयोः) सस्मिन्, ऊधन् विषुरूपे पयसि (सति, अहं) समाने अहन् अर्के (सकृदेव) विमिमानः ।

May Ahirbudhnya (the Snake of the sky) bless us; may the celestial Sindhu (the milky way) come to us like a cow eager to nourish her young, so that we may move with prayers the Son of (heavenly) waters, whom powerful chargers swift as the thought carry on their backs. 5 (4)

May he also approach us, he merciful Twashtri accompanied, as he comes, by worthy sages. Hither too may come unto us Indra the slayer of Vitra the lord of creation and the mightest of heroes. 6

His good graces, moreover, that bring the steed (of the mind) under control caress us even as the cow, that lick their tender calf. Him therefore these our prayers embrace like so many wedded wives,-him the most dearly loved by them among heroes. 7

May the Maruts at the head of a mighty force, and accompanied by Rodasi (the lightning) rest near us with gratified hearts. The dappled coursers of their car dash onward like torrents and the gods themselves the destroyers of wicked foes are, as it were, wholly united with their friend Indra. 8

The moment they yoke their horses in answer to the prayers sent forth from pure hearts, they (at once) become distinguished by their might; and even on a bright sunny day their troops (the showers of rain) rushing down along with the lightning, flood the soil and ponds with water. 9

---

५ उत अहिबुध्न्यः नः मयः कः, शिशुं न पिप्युषी इव सिंधुः वेति । येन अपाम् नपातं जुनाम, मनोजुवः वृषणः यं वहन्ति ।

६ उत सजोषाः त्वष्टा अभिपित्वे स्मत् सूरिभिः नः ईम् अच्छ आ गन्तु । (अपिच) वृत्रहा, चर्षणिप्राः इंद्रः नरां तुविष्टमः इह नः आगम्याः ।

७ उत गावः ईम् तरुणं शिशुं रिहन्ति न, अश्वयोगाः (इंद्रस्य) मतयः नः रिहन्तु । (मः) गिरःच पत्नी जनयः न, नरां सुरभिष्टमं तमीं नसन्त ।

८ उत वृद्ध सेनाः मरुतः स्मत् रोदसी समनसः, न ईम् (आगत्य) सदन्तु । (एतेषां) रथाः अवनयः न पृषदश्वासः, (एते) देवाः च रिशादसः मित्रयुजः न ।

९ यद् ते (भक्तानां) सुवृक्ति प्रयुजः प्रयुजते (तदानी मेव) एषां महिना (ते) प्र चिकित्रे । अध यत् सुदिने शरु न एषां सेनाः त्रिशुं हरिणं सुषायन्त ।

Entreat the Ashwins and Pushan to secure their favour, for powerful they are with their own might. Merciful too is Vishnu, so are Vayu and the Lord of Ribhus. May then I turn the gods hither for the happiness (of us all). 10

Such is our heartfelt prayer addressed to you O holy Powers. May that be both our inspiration and (your) home. Our prayer longing for the most precious of objects is toiling to reach God; may we then come by that refreshing power which prospers quickly. 11 (5)

SOOKTA 187.

Rishi-Agastya; Deity-Annastutih.

Now I should extol the nourishing Essence (of Soma) that sustains the power even of the mighty, and by whose impetuous vigour Trita was able to slay and hack his enemy. 1

O pleasant Mead, O sweet Mead we fix our choice upon thee; so be our kind protector. 2

---

१० अश्विनौ अवसे प्र कृणुध्वम्, पूषणम् च प्रकृणुध्वम् स्वतवसोहि सन्ति । विष्णुः अद्रेषः, वातः ऋभुक्षा (एतावपि अद्रेषौ), देवान् सुम्नाय अच्छा वक्षतीय।

११ यजत्राः इयं सा वः अस्मे दीधितिः अपिप्राणीच सदनीच भूयाः । या वसूयुः देवेषु नि यतते, (तेन) इषं जीरदानुं वृजनं विद्याम ।

१ महः तविषीं (च) धर्माणं पितुं स्तोषं तु, यस्य ओजसा त्रितः वृत्रं विपर्वं अदंयत् ।

२ हे स्वादो पितो, हे मधो पितो वयं त्वा वक्षमहे अस्माकं अविता भव ।

Approach near us O blessed Mead, with thy blessed succours. Beneficent, friendly and free from malice art thou that knowest not duplicity. 3

Those essential juices of thine O Mead, are diffused throughout the realms of the Rajas like the wind that dwells in the sky. 4

Those that taste thy savoury juices, O bounteous Mead, thy pleasent juices O sweetest Mead go about like (the athletes) with stout necks. 5 (6)

On thee O Mead the heart of the great gods is set; and with (the aid of) thy foresight every good deed is done (as when) he slew the dragon with thy help. 6

Although O Mead, thou be turned to the sparkling water of the clouds, come even thence to us O sweet Mead in large quantities for our nourishment. 7

Whatever portion of water or of vegetation we consume, be thou the strengthening essence thereof O permeating Mead. 8

---

३ हे पितो शिवः त्वम् शिवाभिः द्युतिभिः नः उप आचर, मयोभुः अद्विषेण्यः सुशेवः अद्वयाः सखा (भव)।

४ पितो तव ते रसाः दिवि वाताः श्रिताः इव रजांसि अनु विष्ठिताः।

५ पितो, ददतः तव, हे स्वादिष्ठ पितो ते रसनां स्वाद्मानः तुविग्रीवा इव ईरते।

६ हे पितो ते महानां देवानां मनः हितम् (अपिच) तव केतुना चारु अकारि (यद्) तव अवसा अहिं अवधीत्।

७ हे पितो यद् अदः पवतानां विवस्व अजगन्, अत्र चित् मधो पितो, नः भक्षाय अरं गम्याः

८ यद् आपां ओषधीनां परिशं आ रिशामहे, हे वातापे (तस्य) पीवः इत् भव।

What O Soma we partake of the dishes (made) of milk or corn, be thou the strengthening essence thereof, O permeating Mead. 9

Be our bolus-dish O wholesome Plant, be the strengthening fluid of our heart, enlightening our wits, and be the strengthening essence thereof O permeating Mead. 10

Thus O Mead, from thee as from a milch cow we have by means of prayers acquired our sacrificial necessaries, from thee who, though always enjoying thyself in company of the gods, dost also (condescend to) make thyself at home in company of mortals like us. 11 (7)

SOOKTA 188.

Rishi-Agastya; Deity-Apriyah.

Enkindled thou, our God and victor in a thousand battles, dost beautifully shine out today along with all thy divinities. Pray, do thou, our sage mediator, bear to them our offerings. 1

O self-born Agni, for the righteous patron is performed this sacrifice blent with the sweet mead-this sacrifice that holds out a thousand refreshing powers. 2

Invoked by us and worthy of our praise, bear thou hither the honoured gods; verily thou O Agni dost bestow countless favours. 3

---

९ हे सोम गवाशिरः यवाशिरः ते भजामहे, हे वातापे (तस्य) पीवः इत् भव ।

१० हे ओषधे त्वं करंभः भव, त्वं पीवः लं वृक्कः उदारथिः (भव) हे वातापे पीवः इत् भव ।

११ पितो, तं त्वा वयं वचोभिः गावः न हव्या सुषूदिम, । देवेभ्यः त्वा सधमादं अस्मभ्यंच सधमादं त्वां (सुषूदिम) ।

१ हे सहस्रजित्, त्वं समिद्धः देवः देवैः अद्य राजसि (त्वं) कविः दूतः (सन्) हव्या वह ।

२ हे तनुनपात् यज्ञः ऋतं यते मध्वा समज्यते सहस्रिणीः इषः च दधत् ।

३ आजुह्वानः ईड्यः त्वं यज्ञियान् देवान् नः आवक्षि, अग्ने (त्वं) सहस्रसा असि ।

They have spread east-wards this Kusa-carpet worthy of him who is a match for thousands; and such a seat you have graced O Adityas. 4

The gates called the queen, the empress, the boundless the supreme, the numerous, the countless and so on, have shed their unctuous fluid. 5 (8)

Well unbellished and of a lovely form may the Night and Morn glistening with splendour come and seat them here (on the sacred carpet). 6

May the too divine Priests and sages, sweet tongued and most ancient, accomplish this our sacrifice. 7

O ye Bharati, Ila and Sarnswati all of whom I am now addressing, urge us on to (holy) wealth. 8

Twashtri the Lord that shapes every form, has made all these cattle. Sacrifice to him that their numbers may be multiplied for us. 9

Yield of thy own accord, O sovereign of the woods, the sacrificial offering intended for the gods, and Agni will make them sweet. 10

Agni the foremost among the gods is honoured with the Gayatri song, and he glows with pleasure when the offering is sanctified with the word Swaha. 11 (9)

---

४ सहस्रवीरं बर्हिः प्राचीनं अस्तृणन् हे आदित्याः (तत्) ओजसा विराजथ ।

५ याः विराट् सम्राट् विभ्वीः प्रभ्वीः बह्वीः भूयसीः च (इति नाम्न्यः) ता दुरः घृतानि अक्षरन् ।

६ सुरुक्मे सुपेशसा श्रिया अधि विराजतः (ते) उषासौ इह आ सीदताम् ।

७ प्रथमा सुवाचसा कवी दैव्या होतारा, नः इमं यज्ञं यक्षतां ।

८ हे भारति इळे सरस्वति याः वः सर्वाः उप ब्रुवे ताः नः श्रिये चोदयत ।

९ रूपाणि प्रभुः त्वष्टा विश्वान् पशून् समानजे, तेषां (पशूनां) स्फातिं नः (अर्थम्) आ यज ।

१० वनस्पते त्मन्या देवेभ्यः पाथः उप सृज, अग्निः हव्यानि सिष्विदत् ।

११ देवानां पुरोगाः अग्निः गायत्रेण समज्यते स्वाहा कृतीषु रोचते ।

SOOKTA 189.

Rishi-Agastya; Deity-Agni.

Lead us O Agni, by exalted paths, on to the highest wealth,-thou O God that knowest every religious duty. Remove from us sin that degrades us; and we shall offer to thee our heartiest prayers and adoration. 1

Thou O Agni worthy of praise lead us by means of thy blessed powers safely across all dangers and calamities. Be thou unto us as a castle immense manifold and extensive, that our sons and their descendants may live in happiness and honour. 2

Repel from us O Agni all the diseases which are sure to afflict those whom thou Agni dost not shield. Again, for our true welfare, come O most holy God, unto our land with all thy immortal deities. 3

And protect us, O Agni, with thy never failing succours, thou glowing with splendour in thy dear home; let no peril threaten thy worshipper, O most youthful Victor, either today or any time hereafter. 4

O Agni surrender us not to sin or crime, (and a prey) to enemy or malice; yield us not to the fanged that bite, nor to those that are toothless, nor O conqueror, give us up to him that would slay (us). 5 (10)

---

१ हे देव अग्ने त्वं विश्वानि वयुनानि विद्वान् सुपथा अस्मान् राये नय । जुहुराणम् एनः अस्मत् युयोधि, ते भूयिष्ठां नमउक्तिम् विधेम ।

२ अग्ने नव्यः त्वम् स्वस्तिभिः विश्वा दुर्गाणि अति पारय । नः तोकाय तनयाय शंयोः पृथ्वी, बहुला उर्वाच पूः भव ।

३ अग्ने, त्वम् अमीवाः अस्मत् युयोधि, (ततः) अनग्निचाः कृष्टीः (ते) अभ्यमन्त । यः पुनः हे यजत्र, देव अस्मभ्यं सुविताय विश्वेभिः अमृतेभिः क्षां (आ गहि) ।

४ उतहे अग्ने (स्वे) प्रिये सदने आ शुशुक्वान् अजस्रैः पायुभिः नः पाहि । हे यविष्ठ ते जरितारं भयं नूनं मा विदत्, हे सहस्वः अपरम् (अपि) मा (विदत्) ।

५ हे अग्ने अघाय, अविष्यवे रिपवे, (वा) दुच्छुनायै (वा) नः मा अवसृजः । दत्वते दशते, (उतवा) अदते नः मा (अवसृज), हे सहसावन् रिषते (अपि) मा परा दाः ।

O Agni that dost manifest thyself only in the True faith, thy worshipper who extols thee is sure to get on armour to protect himself from every miscreant and every slanderer. Verily O God, it is thou that dost repress the wicked tormentor. 6

Thou O Agni hast a full knowledge of both (the human and the divine), and yet, O holy God, thou comest to men early in the morn, thou wouldst in the evening become docile for Manu's sake, and although fierce thou wouldst permit thyself to be adorned by thy worshipper (as they liked). 7

For Him we have uttered our praises; and I too son of Mana have (placed my faith) in the conquering Agni. May we win thousands of benefits through the Rishis and enjoy the refreshing vigour and strength that flourish very quickly. 8 (11)

SOOKTA 190.

Rishi-Agastya; Deity-Brihaspatih.

Exalt with hymns Brahaspati (the Lord of prayers) who is invincible, valiant, sweet tongued and worthy of praise, to whom while he is being extolled as the resplendent leader of praises the God and mortals would listen with rapt attention. 1

On Him all the prayers offered from time to time do attend, who was sent forth as the fountain spring of (the love of) the faithful adorers. It is Brihaspati that makes (us) clearly perceive the greatest good; and as Matarishvan he the pervading godhead, has made his appearance at the true Sacrifice. 2

---

६ हे ऋतजात अग्ने त्वावान् (त्वाम्) गृणानः तन्वे विश्वात् रिरिक्षोः उत वा निनित्सोः वरूथं च वि यंसत् । दे देव त्वम् अभिद्रुताम् विष्पद् असि ।

७ हे यजत्र अग्ने, तान् उभयान् विद्वान् (अपि त्वम्) प्रपित्वे मनुषः वेषि, अभिपित्वे मनवे शास्यः अक्तःन उशिग्भिः मर्मृजेन्यः च भूः ।

८ अस्मिन् निवचनानि अवोचाम । (अहं) मान्नस्य सूनुः सहसाने अग्नौ (नि तिष्ठामि) । ऋषिभिः वयं सहस्रं सनेम, इषं जीरदानुं वृजनंच विद्याम ।

१ अनर्वाणम् वृषभं, मंद्रजिव्हं नव्यं बृहस्पतिं अर्कैः वर्धय, यस्य गाथान्यः सुरुचः नवमानस्य, देवाः मर्ता आ शृण्वन्ति ।

२ तम् ऋत्विया: वाचः उप सचन्ते, यः देवयताम् सर्गः न असर्जि । स हि बृहस्पतिः वरीमन् अञ्जः (खलु) । स विश्वा मातरिश्वा ऋते सुसभवत् ।

A desire to praise and adore, a love of industry and of glory may He implant (in his worshippers' hearts), even as the Sun extends his beaming arms (towards this earth). Through the power of his merciful self, the Sun that makes the day appears like a lion terrible and powerful. 3

Up ascends his fame into heaven, and like some swift force it courses throughout this earth too,–(his fame) that he is all discerning and the source of all honourable impulses Like the shafts that strike the deer, these weapons of Brihas pati fly towards the heavens which astutely change their aspect like a snake. 4

Those wealthy but wicked persons who though thinking thee as being of no account yet seek to subsist by thee the blissful God; on scoundrels such as these thou dost never bestow thy choicest boon, (but on the contrary) O Brihaspati thou dost chastise those evil doers. 5 (12)

Like a pleasant and easy path covered with green grass he is accessible, and though he brooks no restraint he is easily pleased like a friend. And even they who as unconquered are now glancing at us, were (at first) engrossed but (were afterwards) able to extricate themselves. 6

To him our praises go forth like furious torrents or rivers which eddying under the banks rush on into the sea. And He the omniscient Brihaspati is by his divine insight viewing closely upon both the vessel and the waters (*i. e.* the faith and the Rite). 7

---

३ उपस्तुतिं नमसः उद्यतिं श्लोकं च सविता बाहू इव (सः) प्र यसत् । अस्य अरक्षसः क्रतौ यो अहन्यः सः सूर्योपि) भीमः मृगः न तुविष्मान् अस्ति ।

४ अस्य श्लोकः यक्षभृत विचेताः (इति), दिवि इयते पृथिव्यां अत्यः न यंसत् (च) । मृगाणां न बृहस्पतेः इषाः हेतयः अहिमायान् धून् अभि यन्ति ।

५ हे देव ये पापाः पत्रोः त्वा उक्थिकम् मन्यमानाः (अपि) भद्रं (त्वाम्) उपजीवन्ति । तस्मै दृष्ये वामं नानु ददासि (किंतु) हे बृहस्पते तं पियारुम् चयसे इत् ।

६ त्वं सूयवसः पंथा न सुप्रेतुः, दुर्नियन्तुरपि त्वं मित्रः न परिप्रीतः (भवसि) । ये अनर्वाणः नः अभि चक्षते (ते) अपिवृताः (पर पश्चात्) अपोर्णुवन्तः अस्थुः ।

७ यं स्तुभः अवनयः न, रोधचक्राः स्रवतः न सं यन्ति । विद्वान् सः गृध्रः (सन्) उभयं तरः अपश्च अंतः चष्टे ।

Thus has Brihaspati the great God accessible to pious energy, mighty and showering bounties, been set (in our hearts). May he praised by us bestow (on us) the wealth of valour and knowledge, so that we may enjoy that refreshing strength which prospers quickly. 8 (13)

SOOKTA 191.

Rishi-Agastya; Deity-Aptrinasuryah.

A slightly or terribly venomous reptile or a venomous aquatic animal both being of a virulent type, or some invisible poisonous insects (seem to) have throughly infected me. 1

A certain herb kills the unseen poison if simply it is brought near (the affected part); another herb kills it as it is being moved backwards (from the wound). There is yet another herb which destroys the virus, when the herb is struck down (on the ground), or which crushes the venom when the herb itself is crushed. 2

The unseen poisonous insects infesting the reed and other kinds of grass such as *kushara, darbha, sairya, munja* and *bairina* have infected me all at once. 3

The kine were reposing in their stalls the deer had repaired to their shelter and the banner of (human) intellect was hauled down (by sleep), when the unseen poisons infected me. 4

These venomous animals are to be seen lurking in the dark like so many thieves. Now take care O ye reptiles that see others but are yourselves invisible. 5 (14)

---

८ एवं महः तुविजातः तुविष्मान् वृषभः बृहस्पतिः देवः अधायि । सः स्तुतः वीरवत् गोमत् नः धातु (येन) इषम् जीरदानुं वृजनम् विद्याम ।

१ कंकतः न कंकतः अथो सतीन कंकतः द्वौ इति क्रुषी इति (अथो वा) अदृष्टाः मां नि अलिप्सत ।

२ (काचित् ओषधीः) आयती अदृष्टान् हन्ति, अथो (काचित्) परायती हन्ति । अथो अवघ्नती हन्ति, अथो पिंषती पिनष्टि ।

३ शरासः कुशरासः दर्भासः सैर्याः उत मौञ्जाः बैरिणाः (एतेषु निलीनाः) सर्वे अदृष्टाः साकं (मां) नि अलिप्सत ।

४ गावः गोष्ठे नि असंदन्, मृगासः नि अविक्षत, जनानाम् (अपि) केतवः नि (अभवन्, एतस्मिन् काले) अदृष्टाः नि अलिप्सत ।

५ एते उल्खे (अदृष्टाः) तस्कराः इव प्रदोषे अदृश्रम् । हे अदृष्टाः विश्वदृष्टाः (यूयं) प्रतिबुद्धाः अभूतन ।

(Like ourselves), Heaven is your father also, the Earth is your mother, the Soma is your brother and Aditi your sister. Then ye poisons (or insects) that see others but are themselves unseen, stop to depart in peace. 6

Those that move on their shoulders (like lizards) or creep on their belly (like snakes); those that sting and are most venomous, and all those unseen (poisons), wherever ye may be, may ye exhaust and vanish all at once. 7

There in the east rises the Sun discerning all, slaying the unseen poison, and crushing all secret (foes) and all the witches of the Night. 8

There Aditya the Sun scorching severely all (the wicked) has arisen from the hills, (has arisen) observing all, and killing those that lurk unseen. 9

I lay my poison in the orb of the Sun even as a wine skin in the house of him upon whom wine has no effect. He will not die nor shall we die; for he that rides the golden steeds has dissipated that poison, and by his sweetening Power turned it into sweet mead. 10 (15)

(Look at) the little bird, it is so very small but has swallowed up all thy poison; yet it will not die, nor shall we die; for he that rides the golden steed has dissipated the poison and by his sweetening Power turned into sweet mead. 11

---

६ (यथा अस्माकं तथा) वः (अपि) द्यौः पिता, पृथिवी माता, सोमो भ्राता, अदितिः स्वसा (अस्ति), तस्मात् हे विश्वदृष्टाः अदृष्टाः तिष्ठत, सु कं इलयत ।

७ ये अंस्याः ये च अङ्गया, ये सूचीकाः, (ये च) प्रकंक ताः (इति) हे अदृष्टा, किंचन इह वः (ते) सर्वे (यूयं) साकं निजस्यत ।

८ विश्वदृष्टः अदृष्टहा सूर्यः सर्वान् अदृष्टान् सर्वाश्च यातुधान्यः जंभयन् पुरस्तान् उदेति ।

९ असौ आदित्यः सूर्यः विश्वानि पुरु जूर्वन्, अदृष्टहा विश्वदृष्टः (च सन्) पर्वतात् उदपप्तत् ।

१० दृतिं सुरावतः गृहे (इव) सूर्ये विषम् आ सजामि । सो चिन्नु न मराति, नो वयं मराम, हरिष्ठाः (सः) अस्य योजनं आरे (चकार । हे विष) त्वा मधुला (सः) मधु चकार ।

११ इयत्तिका शकुंतिका सका ते विषे जघास, (परं सोचिन्नु न मराति, नो वयं मराम, हरिष्ठाः (सः) अस्य योजनं आरे (चकार, हे विष) त्वा मधुला मधु चकार ।

The three times seven sparks have consumed the poison's deadly effect. But they will not die, nor shall we die; for he that rides the golden steed has dissipated the poison and by his sweetening Power turned it into sweet mead. 12

Of the nine and ninety that destroy the poison, I have recounted the names of all of them, and he that rides the golden steed has dissipated the poison and by his sweetening Power turned it into sweet mead. 13

The three times seven peahens like so many maidens and sisters, have removed my venom far away as girls bear water in pitchers. 14

The mangoose is a small creature, but (if the agonies of venom do not subside) I shall crush the animal with a stone; (and so) I am able to turn the poison away, far away unto distant regions. 15

Then the mangoose issuing out from the mountain's side spake: O it is only the feeble venom of a scorpion, (Look here), O scorpion thy venom is but weak. 16 (16)

End of Mandala I.

---

१२ त्रिः सप्त विष्पुलिंगाः विषस्य पुष्यम् अक्षन् ताः चिन्नुवमरन्ति, नो वयं मराम, हरिष्ठाः (सः) अस्य योजनं आरे (चकार। हे विष) त्वा मधुला मधु चकार।

१३ नवानां नवतीनां विषस्य रोपुषीणाम् सर्वासां नाम अग्रभम्। हरिष्ठा। अस्य योजनं आरे (चकार। हे विष) मधुला त्वा मधु चकार (सः)।

१४ त्रिः सप्त मयूर्यः (याश्च) अग्रुवः सप्त स्वसाराः ताः ते विषं, कुंभिनीः उदकम् इव विजभ्रिरे।

१५ इयत्तकः कषुंभकः (परं यदि विषम् नाप गच्छति तर्हि) तकं अश्मना भिनद्मि। ततः विषं अनु पराचीः संवतः प्र वावृते।

१६ तत, गिरेः प्रवर्तमानकः कुषुंभकः अब्रवीत् (यद् इदं) वृश्चिकस्य विषम् (इदं) अरसं। हे वृश्चिक ते विषम् अरसम्।

॥ इति चतुर्विंशोऽनुवाकः। प्रथमं मंडलं समाप्तं ॥

MANDALA 2.

ANUVAKA 1.

SOOKTA 1.

Rishi-Gritsamadah; Deity-Agni.

O Agni, intensely glowing with thine effulgence, thou springest in thy holiness from the celestial waters, from the flint, from out of the forests or the herbs, O Lord of men. 1

To thee, O Agni, appertains the Hotri's office; thine is Potri's duty which is to be timely performed, and to thee also belongs the Neshtri's (or leader's) task and also of the kindler in the sacrifice (commenced) by the faithful worshipper. Thou art the Prashastri (the Director), thou the ministering Priest, as also the Brahma (or supervisor) and the Master of the house in our homes. 2

Thou O Agni art Indra the foremost among the holy; thou art Vishnu all pervading and adorable; thou Lord of prayers, art Brahma that knows the wealth (of the sacred Lore) and O saviour, divine wisdom follows in thy foot-steps. 3

---

१ हे अग्ने त्वम् अशुशुक्षणिः त्वम् अद्भ्यः, त्वम् अश्मनः परि, त्वम् वनेभ्यः, त्वम् ओषधिभ्यः, हे नृणां नृपते त्वम् शुचिः (सन्) जायसे।

२ हे अग्ने, होत्रं तव, ऋत्वियं पोत्रं तव (इत्) तव नष्ट्रं, ऋतायतः त्वम् अग्नित् (एव)। तव प्रशास्त्रं, त्वम् अश्वरीयसि (त्वम्) ब्रह्मा च, नः दमे गृहपतिश्चासि।

३ अग्ने सतां वृषभः इंद्रः त्वमसि, त्वम् उरुगायः नमस्यः विष्णु रसि। ब्रह्मणस्वते (अग्ने) त्वम् रयिविद् ब्रह्मा सि। हे विधर्तः त्वम् पुरंध्या सचसे।

Thou, O Agni, art king Varuna whose laws none can break; thou art Mitra the worker of miracles and praised by all. Thou likewise art Aryaman the Lord of the wise, whose joyous favours, O God, thou as Amsha dost distribute in the sacrificial assembly. 4

Thou O Agni art Twastri (the embodiment of) the manliness of thy worshipper, and with thy divine powers and pleasant lustre thy nature is the same (as this universe). Coming with the swiftness (of lightning) thou bestowest the noble steed (of intellect) and as a host of heroes, thou art rich in thy wealth (of divinity). 5 (17)

Thou, O Agni art Rudra the supreme Spirit of the great sky, thou art the army of the Maruts and the ruler of might. Thou as Home of bliss art to be seen blended with the ruddy lustre of the morning breezes, and as the Nourisher of all, thou thyself dost protect thy worshipper. 6

Thou, O Agni, grantest the wealth of vigour to him who adores thee; thou art God that inspires and holds the store of precious gems to bestow. As Fortune thou art, O Lord of men, the master of the object most dearly cherished and the defender of him who has sought thy protection. 7

---

४ हे अग्ने, धृतव्रतः वरुणो राजा त्वमसि, दस्मः ईड्यः च मित्रः त्वम् (असि)। त्वम् सत्पतिः अर्यमाच; हे देव, यस्य (अर्यम्णः) संभुजम् विदथे भाजयुः अंशः (अस्ति, स) त्वमेव।

५ हे अग्ने विधते सुवीर्यं (यः) त्वष्टा (सः) त्वमसि, तव मित्रमहः मावः (विश्वेन) सजात्यम्। त्वम् आशु हेमा॰स्वश्व्यं ररिषे। त्वम् पुरुवसुः नरां शर्धः असि।

६ अग्ने महः दिवः असुरः रुद्रः (स) त्वमसि, मारुतं शर्धः त्वमेव, पृक्षः ईशिषे। त्वम् शंगयः अरुणैः वातैर्यासि, त्वम् पूषा सन् विधतः त्मना पासि नु।

७ हे अग्ने त्वम् अरंकृते द्रविणोदाः, रत्नधाः सविता देवः त्वम् असि। नृपते त्वम् भगः वस्वः ईशिषे, यस्य ते अविधत् (तस्य) त्वम् पायुः भवसि।

O Agni thee they are adoring in thine home-thee the Lord of people and the most bountiful king. Thou of dignified appearance rulest the universe and art a match (not only) for ten, or for a hundred but yea for a thousand or more. 8

O Agni thee as Father, men do implore with sacrifice, thee in thy glowing form they seek with righteous acts for thy brotherly love. Thou art a son to him who serves thee, and as his most trusted friend guardest him from attack. 9

A Ribhu art thou, O Agni, at once to be adored-thou the ruling Lord of wealth of the might of holiness. Thou blazest forth brilliantly, thou burnest to be generous towards the worshipper; and accomplishing his sacrifice dost direct him (in the path of righteousness). 10 (18)

O Agni, O God, thou art the Infinite (Aditi) to thine adorer. Thou as Hotra and Bharati art exceedingly delighted with the sacred hymns. Thou art also (the eternal) Ila of hundred winters to strengthen his capacities, and thou art the slayer of Vitra, as also Saraswati, O Lord of the sacred Treasure. 11

---

८ हे अग्ने विश्पतिं त्वां, (जगतः) सुविदत्रं राजानं त्वाम् विशः ऋञ्जते। हे स्वनीक त्वं विश्वानि प्रत्यसे, त्वम् दश, शता, सहस्राणि (अपि) प्रति (जयसे)।

९ अग्ने, नरः (जगतः) पितरम् त्वां इष्टिभिः (वर्धयन्ति), भ्रात्रायच तनूरुचम् त्वाम् शम्या (प्रसाधयन्ति), यस्ते अविधत् तस्य त्वम् पुत्रः भवसि, त्वम् सुशेवः सखा सन् आवृषः पासि।

१० अग्ने नमस्यः ऋभुः त्वम् आके असि, क्षुमतः वाजस्य रायः त्वम् ईशिषे। दावने त्वम् विभासि अनु धक्षि, त्वम् विशिक्षुः यज्ञम् आततिः असि।

११ हे अग्नेदेव, त्वम् दाशुषे अदितिरसि, त्वम् होत्रा, भारती (च सन्) गिरा वर्धसे। दक्षसे त्वम् शतहिमा इळा असि; वसुपते त्वम् इत्रद्धा सरस्वती च असि।

O Agni well developed in form, thine is the prime of life, and in thy gay and fascinating hue all the beauties do dwell. Thou art the mighty energy that rescues (us from sin) and thou the manifold heavenly wealth that surpasses all. 12

Thee, O Agni, the Adityas have taken as their mouth; the holy Powers also have made thee O wise Agni, their tongue; and those generous celestial Powers following thee to the sacrifice, partake of the oblation offered into thee. 13

Verily O Agni, all the divinities immortal and free from hatred, eat with thy mouth the oblation offered into thee. Through thee the mortals also (are able to) taste their sweet beverage, and thou alone dost appear in plants as their embryo sparkling and pure. 14

With thy superhuman might, (not only) thou art like unto them, but O God of noble origin, thou dost also (in splendour) excel all of them put together, for, thy power in the height of its greatness would diffuse throughout both heaven and Earth. 15

---

१२ हे अग्ने, सुभृतः त्वम् उत्तमं वयः (असि), तव स्पार्हे संदृशि वर्णे आ (निखिलाः) श्रियः (अधिवसन्ति) । प्रतरणः बृहन् वाजः त्वमसि, बहुलः विश्वतस्पृधुः च रायिः त्वमेव ।

१३ हे अग्ने आदित्यासः त्वाम् आस्यम् (चक्रिर), हे कवे, शुचयः (देवाः) त्वाम् जिह्वा चक्रिरे । रातिषाचः देवाः त्वाम् अध्वरेषु सश्चिरे, त्वे च आहुतम् हविः अदन्ति ।

१४ हे अग्ने, अद्रुहः विश्वे अमृतासः देवाः त्वे आहुतं हविः आसा अदन्ति । मर्तासः (अपि) आसुतिं त्वया (एव) स्वदन्ते, वीरुधां त्वं शुचिः गर्भो जज्ञिषे ।

१५ अग्ने त्वम् मज्मना (न केवलं) तानू च सम् असि, प्रति च असि, (किंतु) हे सुजात देव प्र रिच्यसे च । यत् अत्रतेपृक्षः त्व महिना द्यावापृथिवी रोदसी उभे अनु वि भुवत् ।

